सि-ले-तु-
२

नमेतमिति तच्छब्दः प्रकृतपरमात्मपरः एतच्छब्दः नित्यापरोक्षजीवपरः तथा च जीवाभिन्नं परमात्मानं वेदान्तव
चनादिभिर्वेदितुमिच्छन्तीत्यर्थः अनशनादिलक्षणतपोव्यावृत्तये तपसेति पदं विशेषणमनाशकेनेति तपश्चाहितत्वमि
ति मेध्याशनादिरूपं तप इह विवक्षितमिति लभ्यते ननु विविदिषायामपुरुषार्थभूतायां कथं विनियोगः त
त्राह विद्यासंपादनद्वारेति ततश्च गौणपुरुषार्थत्वं तस्याः संभवतीत्यर्थः ननु मुक्तिं प्रति प्रत्यासन्नत्वात् वि
द्यायामेवास्यामेव विनियोगः कुतो न कल्प्यते श्रुतत्वाद्विशेषाच्च कामनाविषयत्वेन श्रुतस्वर्गादेरेव कर्मफलतया
न्यत्रस्वीकाराच्चेति मत्वाशंकते नन्विति स्वर्गकामादिवाक्येषु यागादेर्विधिप्रत्ययेनेष्टसाधनत्वे बोधिते किं

५

नमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतेर्विद्यासंपादनद्वा
रा ब्रह्मावाप्त्युपायभूतायां विविदिषायामुपयोगः नन्विष्यमाणायां विद्यायामुपयोगः किं न स्यात्
न स्यात् प्रत्ययार्थस्य प्राधान्यात् विद्यासंप्रयोगात्प्रत्यासन्नानि विद्यासाधनानि शमदमादीनि
विविदिषासंप्रयोगात्तु वाह्यतराणि यज्ञादीनीति सर्वापेक्षाधिकरणभाष्याच्च

तदिष्टमिति विशेषाकांक्षायां समभिव्याहृतविशेषणत्वेन श्रुतयोः कामनास्वर्गयोरन्यतरस्यापि स्यादतः प्राधा
न्याभावेन तत्रार्थतः प्राधान्यस्यैवाश्रयणीयत्वे स्वतः पुरुषार्थतया स्वर्गस्यैव फलत्वेनान्वयः सिद्धे ततः यागः
स्वर्गसाधनमिति न तु कामनायाः इह तु वेदनकामनाया एव फलत्वेनान्वय उचितः शब्दतः प्राधान्याददतः
फलप्रत्यासन्नत्वादिकमप्यकिंचित्करमिति मत्वा समाधत्ते न स्यादिति सन्प्रत्ययः प्रत्ययशब्दार्थः विवि
दिषायामेव विनियोग उक्तं भाष्यसंमतिमाह विद्यासंप्रयोगादिति विद्यासाधनत्वादित्यर्थः प्रत्यासन्ना
नीति यावद्विद्योदयमनुष्ठेयानीत्यर्थः शमादिवैषम्यं कर्मसु दर्शयति विविदिषासंप्रयोगात्त्विति तत्साध
नत्वादेवेत्यर्थः वाह्यतराणीति विविदिषोदयपर्यन्तमेवानुष्ठेयानीति यावत् विद्योत्पत्तौ सर्वाणि कर्माणि

[illegible]

पृ. २

द्वितीयप
रिच्छेदपत्र
१ H.२

श्रीगणेशाय नमः॥ आपन्नार्पसमाश्रितस्य रत्नं प्राप सद्दुर्लभं। कृष्णाकृष्णस्य महिषीं तं कृष्णं संश्रयेऽन्वहं ॥२॥ पूर्वं
परिच्छेदे तेन ब्रह्मप्राप्तिरूपमोक्षस्य विद्यैकप्राप्यत्वमुक्तं तत्र विद्याप्राप्यत्वमुपेत्य मोक्षस्यैकपदलभ्यं साधनं
तत्र चावच्छेदमसहमानः समुच्चयवादी प्रत्यवतिष्ठते ननु कथमिति यावत् इति यस्मादित्यर्थः स्मृतौ तमदं
ब्रह्म परमं तत्त्वमिति तेनैति ब्रह्मवित् पुण्यकृदित्यादिश्रुतेरिति शेषः तेन ब्रह्मवेदनपुण्ययोः समुच्चयेन ए
तीति ब्रह्म प्राप्नोतीति श्रुत्यर्थः ज्ञानकर्मणोः समुच्चयस्य ब्रह्मप्राप्तिहेतुत्वश्रवणमनुमोदते समस्तमिति ब्र
ह्मप्राप्तेर्विद्यामात्रसाध्यत्वप्रतिपादकश्रुत्यन्तरेण उपपत्तिसहितेन विरोधात् समुच्चयश्रवणं तन्मूलकस्मृ
तिवचनं च तत्समसमुच्चयपरं तत्पाने तदभिमतासायेनाह नान्यः पन्था इति ब्रह्मज्ञानापेक्षया अन्यः ज्ञानकर्मस

ननु कथं विद्ययैव ब्रह्मप्राप्तिर्यावता कर्मणामपि तत्प्राप्तिहेतुत्वं स्मर्यते तत्प्राप्तिहेतुर्विज्ञानं कर्म।
चोक्तं महामुने इति स्मृतेः नान्यः पन्था इति श्रुतेर्नियमसिद्धब्रह्मावाप्तौ कण्ठगतविस्मृतकनकमाला
वाप्तितुल्यायां विद्यातिरिक्तस्य साधनत्वासंभवात् ब्रह्मावाप्तौ परं परया कर्मापेक्षामात्रपरा तादृशी
स्मृतिः क्व तर्हि कर्मणामुपयोगः अत्र भामतीमतानुवर्तिन आहुः

मुच्चयरूपः केवलकर्मरूपो वा पन्थाः उपायः मोक्षं प्रति नास्तीति श्रुत्यर्थः नित्यमात्मस्वरूपतया सिद्धस्य ब्रह्मणो
वाप्तिः अज्ञानत्वभ्रमादिनिवृत्तिरूपा भ्रमादिनिवृत्तिश्च ज्ञानमात्रसाध्या न तु लोके दृष्टा पयाकं कण्ठगतायामेव कनकमा
लायां विस्मृतायां तस्यां तस्यामज्ञानत्वभ्रमेण वक्तु विध्यविधेयं श्रान्तस्याप्तोपदेशजन्यज्ञानमात्रेण अज्ञानत्वभ्रम
निवृत्तिरूपा पूर्वसिद्धकनकमालावाप्तिः तत्तुल्यायां नित्यसिद्धब्रह्मावाप्तौ विद्यातिरिक्तसाधनापेक्षाभावा
त् तदतिरिक्तस्य भ्रमादिनिवृत्तौ सामर्थ्याभावाच्चेत्यर्थः परंपरया मुक्तावुक्तकर्मणामुपयोगं प्रपंचयितुं पृ
च्छति क्व तर्हीति तर्हि ज्ञानवत्साक्षान्मुक्तिहेतुत्वाभावे सति क्व विविदिषायां विद्यायां वा साधनत्वं तेषामित्यर्थः

शि·ले·
त·
२

एतच्चानुभवसिद्धमिति भावः अधीतसांगस्वाध्यायः पुरुषो वेदांतैः ब्रह्मणो निरतिशयानंदरूपत्वं विद्यायां तत्प्राप्ति
साधनत्वं च ज्ञात्वा तस्मिन्नर्थे संपन्नविश्वासो भवतीत्युक्ते तथाविधानामपि पुरुषाणां बहूनां तस्मिन्नर्थे विश्वाससं
पत्तेरदर्शनादित्याशंक्याह प्राचीनेति प्राचीनेषु बहुषु जन्मसु स्वनुष्ठितानि फलाभिसंधिरहितानि च यानि नित्य
नैमित्तिकानि कर्माणि तेरुपसंजातो यश्चित्तप्रसादः शुद्धिविशेषस्तस्य महिम्नेत्यर्थः तथा च स्मृतिः मनुष्या ।
णां सहस्रेषु कश्चिद्यतति सिद्धय इति कश्चिदिति उक्तचित्तप्रसादवानित्यर्थः सिद्धये विद्यालाभाय न सर्वे
इति भावः ननु ब्रह्मप्राप्तितत्साधनविद्यागोचरोत्कटेच्छायां सत्यां तत्साधनश्रवणादौ प्रवृत्तिपर्यंता रुचिर्भवे
देवेति कृतं तत्संपत्त्यायनुष्ठानेनेत्यत आह अनादीति दुरितदोषेण प्रतिबंधात् रुचिर्न जायत इति संबंधः ननु

वन्निरतिशयानंदरूपं ब्रह्म तत्प्राप्तौ विद्या साधनमित्यर्थे प्राचीनबहुजन्मानुष्ठितानभिसंहितफलनि
त्यनैमित्तिककर्मोपार्जितचित्तप्रसादमहिम्ना संपन्नविश्वासस्य पुरुषस्य ब्रह्मावाप्तौ विद्यायां च तदौत्क
ट्यलक्षणायामिच्छायां सत्यामप्यनादिभवसंचितानेकदुरितदोषेणास्तिककामुकस्य हेयकर्मणि
वा विषयभोगे श्रावणे संपादयता प्रतिबंधाद्विद्यासाधने श्रवणादौ प्रवृत्तिपर्यंता रुचिर्न जायत इ
ति प्रतिबंधनिरासपूर्वकं तत्संपादकयज्ञादिविधानोपपत्तेरिति

२

पूर्वोक्तचित्तप्रसादमहिम्ना ब्रह्मविद्यादौ संपन्नविश्वासस्यास्तिकतमस्याप्यनर्थबहुले विषयभोगे श्रावणे एवं क
थं संभवतीत्याशंक्यानुभवसिद्धदृष्टांतेन तत्संभावयति आस्तिककामुकस्येति विहितानुष्ठानादवश्यं श्रेयो
भवति निषिद्धकरणादितरच्चावश्यं महाननर्थो भवतीति शास्त्रप्रामाण्यादिति निश्चयवानास्तिकः तस्यापि कस्य
चित्कामोद्रेको निंदितागम्यागमनादौ श्रावणे च यथा पापविशेषात्संभवति तथा यथोक्तमुमुक्षोरपीत्यर्थः
प्रतिबंधेति अनादिभवसंचितानेकदुरितदोषकृतप्रतिबंध इत्यर्थः तत्संपादकेति विविदिषाशब्दिता
या श्रवणादौ प्रवृत्तिपर्यंता रुचिः तत्संपादके इत्यर्थः

३·
२

विविदिषाविनियोगं प्रकारान्तरेणाह यदीति नन्विति वेदनेच्छाया यज्ञादिफलत्वे वेदनेच्छागोचरे ब्रह्मणि यज्ञाद्यनु
ष्ठानं वाच्यं वेदनेच्छायाश्च स्वतः फलत्वाभावाद्वेदनद्वारा मुक्तिफलकत्वं वाच्यं तथा चायं क्रमः प्रथमं सत्त्वशुद्धिस्ततः
पुरुषार्थत्वज्ञानादिच्छा ततो वेदने मुक्तिसाधनत्वज्ञानादिच्छा ततो वेदनेच्छायां वेदनसाधनत्वज्ञानादिच्छा तया
च यज्ञाद्यनुष्ठानमिति तथा च वेदनेच्छारूपविविदिषोद्देशेन यज्ञाद्यनुष्ठाने प्रवर्तमानस्य ब्रह्मवेदने विविदिषा
फले किमिच्छास्तित्वेनाश्रयेत यज्ञाद्यनुष्ठानवैयर्थ्यमिति तमभिप्रेत्याह वेदनगोचरेति वेदनगोचरेच्छाया एव विवि
दिषात्वादिति भावः सिद्धत्वेन विविदिषार्थं यज्ञाद्यनुष्ठानायोगादिति संबन्धः नद्वितीयः विविदिषाफले वेदने का
मनायाः असत्त्वे विविदिषायामपि कामनाया अभावाद्विविदिषोद्देशेन यज्ञाद्यनुष्ठानायोगादित्याह तदभावादिति वेद

ननु विविदिषार्थं यज्ञाद्यनुष्ठानं वेदनगोचरेच्छावत्त्वे विविदिषायाः सिद्धत्वेन तदभावे वेदनोपायेवि
विदिषायां कामनासंभवेन च विविदिषार्थं यज्ञाद्यनुष्ठानायोगात् न यज्ञादीनां विविदिषायां विनियो
गो युक्त इति चेन्न अन्नद्वेषेण कार्श्यं प्राप्तस्य तत्परिहाराय ज्वरविषयीकृतस्य [illegible] सत्याम
पुनस्तक जीर्णान्नप्रयुक्त पातवैषम्यदोषान्न न प्रवृत्तिपर्यन्तारुचिर्जायते इति तद्दोषचौषधविधि

नगोचरेच्छायाश्च भावइत्यर्थः विविदिषार्थं यज्ञाद्यनुष्ठानं तत्त्वैव वेदनगोचरेच्छानचैतावतानदनुष्ठान
वैयर्थ्यं विविदिषाया [illegible] फलेः तथाहि वेदनेच्छा द्विविधा विद्यायामोक्षमुखे [illegible] च
तत्र यज्ञाद्यनुष्ठानात्प्रागपि वेदने वर्तते इति तामादाय वेदनसाधनभूतायां विविदिषायां कामनासंभव
तीति विविदिषार्थं यज्ञाद्यनुष्ठानमुपपन्नं द्वितीया तु यज्ञादिफलभूता तदनुष्ठानानन्तरभाविनीति युक्तए
वं विविदिषायां यज्ञादिविनियोग इति समाधानमभिप्रेत्याह नेति वेदनेच्छायाः द्वैविध्ये यज्ञाद्यनुष्ठानादौ च
दृष्टान्तमाह अन्नद्वेषेणेति तत्परिहारायेति कार्श्यपरिहाराय अन्नभक्षणविषयको नष्टेच्छायां सत्यामपीत्यर्थः
उक्तेति अधिकेत्यर्थः पातवैषम्यप्रयोजकानामतानशनादिसंग्रहार्थमादिपदं तत्रेति अन्नभक्षणइत्यर्थः

भि॰ से॰
त॰
३

यज्ञैर्विविदिषायाः साधनत्वं यज्ञस्य वेदनसाधनत्वमेवादरणीयमित्यर्थः इच्छाया विषयत्वेन समभिव्याहारात् जोक्षे।
वलौकिकवैदिकप्रयोगेषु प्रत्ययार्थतया प्रधानामपीच्छां मुख्यत्वेनाविषयेष्वेव समभिव्याहारात् पदार्थान्तरान्वयद
र्शनाच्चेत्याह प्रत्ययेनेति तदन्वेष्टव्यमिति तद्वह्याकाशाख्यं ब्रह्म विचार्यमित्यर्थः विजिज्ञासितव्यमिति तदेव ब्र
ह्म ध्यातव्यमित्यर्थः निदिध्यासितव्य इति आत्मा ध्यातव्य इत्यर्थः ननु दृष्टान्तप्रयोगेषु इच्छायाः अस्मादिसाधना
द्यन्वयायोग्यत्वान्नस्याः परित्याग इति चेत्तर्हि प्रकृतेपि वेदनेच्छायाः तदयोग्यत्वात् ब्रह्मवेदनस्य च ब्रह्मानंद
साक्षात्कारत्वपयाप्फलत्वेनान्वेतुं योग्यत्वाद्वेदन एव यज्ञाद्यन्वयो न विविदिषायामिति तुल्यमिति भावः विद्या।

3

मनादावन्वयस्य वक्तुमशक्यत्वाच्च प्रकृतमभिहितार्थं विद्यायां यज्ञादीनां विनियोगः ननु तपसा तिया
वद्दिरयादर्थ्यं कर्मानुष्ठानापत्तेस्त्यजतैव हि तत् ज्ञेयमित्यादिश्रुतिसिद्धकर्मस्वरूपस्य संन्यासस्य वि।
द्यार्थत्वमपि प्रतीयतेति चेन्न अग्नीजाद्यायाः कर्षणेन तदनंतरमकर्षणमिति कर्षणाकर्षणाभ्यां ब्रीह्यादि।
निष्पत्तिवदारुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यत इत्यादिव
चनानुसारेण तस्याः शुद्धो विविदिषादिरूपप्रत्यक्श्रावणादय पर्यन्तकर्मानुष्ठानं ततः संन्यास इति
कर्मतत्संन्यासाभ्यां विद्यानिष्पत्त्युपगमात्

विनियोगपक्षे विध्यंतरविरोधं शंकते नन्विति
कर्माणि त्यजतैव मुमुक्षुणा त्यक्तः स्वस्य प्रत्यगात्मस्वरूपं पदं ब्रह्मसाक्षात्कर्तव्यं न तत्त्यजतेति श्रुत्यर्थः यथा य
रब्राडित्युपक्रम्य ब्रह्मभूयाय कल्पत इत्यंतेन श्रुत्यंतरेणापि परिव्राट् शाठ्योपात्तसंन्यासस्य ब्रह्मभूयशब्दि
तब्रह्मसाक्षात्कारहेतुत्वमुक्तं एवं श्रुत्यंतरेष्वभिहितमिप्रमेयादिपदं द्रष्टव्यं विविदिषावाक्यसंन्यासविधेर
विरोधः सहष्टांतं सप्रमाणं च दर्शयति नत्यामिति वचनेकारणपदद्वयकर्तव्यार्थकं शमः संन्यासः चित्तशु
द्धिविविदिषादिरूपप्रत्यक्श्रावणेन तच्छीलवचनगतयोगपदव्याख्यानमिति बोध्यं॥

उ॰
३

कथं तर्हि कर्मणामुपयोग इत्यत्र श्रौते विद्यायां विनियोगादुक्ति श्रुतिवचनान्तरमवतारयति विवरणेति पूर्ववद्यज्ञादीनां
तृतीयाश्रुत्या साधनत्वेनावगतानां साध्याकांक्षायां विविदिषैव साध्यत्वेनान्वेति तस्याः शब्दतः प्रधानत्वात् शब्दतः प्र
धानस्यैव पदार्थस्य राजपुरुषमानयेत्यादौ सर्वत्र समभिव्याहृतपदार्थान्तरेणान्वयस्य व्युत्पत्तिसिद्धत्वादिति साध्ये
न यज्ञादीनां विविदिषायां विनियोग उक्तः तत्राक्षरसंदर्शयन् विद्यायां तेषां विनियोगमुपपादयति प्रकृतीति
प्रकृतिप्रत्ययार्थयोर्वेदनतदिच्छयोर्मध्ये प्रत्ययार्थस्य विविदिषालक्षणस्य प्रत्ययार्थत्वाच्छब्दतः प्राधान्यं तत
स्य विविदिषाया एव यज्ञादिफलत्वेनान्वय इत्यत्र हेतुभूतो यः सामान्यन्यायो राजपुरुषमानयेत्यादौ प्रसिद्धः श
ब्दतः प्रधानस्यैव समभिव्याहृतक्रियाकारकान्वय इत्येवंरूपः तस्मादित्यर्थः विधिप्रत्ययेनेष्टसाधनत्वेनाव

विवरणानुसारिणस्त्वाहुः प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति सामान्यन्यायादिच्छाविष
यतया शाब्दोऽप्येवमानुसाधनतान्वय इति स्वर्गकामादिवाक्ये तु न विशेषन्यायस्य बलीयस्त्वादश्वेन
जिगमिषतीत्यसिनाजिघांसतीत्यादिलौकिकप्रयोगेऽश्वादिरूपसाधनस्य तदन्वेषणं तद्भावविजिहा
सितकामनिदिध्यासितव्य इत्यादिवैदिकप्रयोगे तत्त्वार्थभूतविशेष्यस्य सन्प्रत्ययाभिहितेच्छाविषय एवं ग

गतयागादेरिष्टविशेषाकांक्षायां सत्यां शब्दतः प्राधान्याभावेऽपि स्वर्गस्य फलत्वेनान्वयः कृत इत्यर्थः शब्दप्राधा
न्याभावाविशेषे कामनाया एव यागादिफलत्वेनान्वयः कुतो न कल्पितस्तत्राह इच्छाविषयतयेति इच्छावि
षयत्वस्य फलत्वव्यंजकत्वात् पुरुषार्थत्वेन प्रतीतस्य स्वर्गस्यैव फलत्वं न कामनाया इत्यर्थः ननु कामनाविषयत्व
स्य युक्तिसाधारणत्वात् सैव यागादिफलं कस्मान्न कल्प्यते तत्राह शब्दबोध्यत इति यदीयसाकांक्षत्वेन शब्देने
व बुध्यत इति न्यायान्नातिप्रसंगः तथा चेच्छायाः समभिव्याहारे इष्यमाणस्यैव प्राधान्यं न त्विच्छाया इति
विशेषन्यायेनोक्तसामान्यन्यायबाधस्स्वर्गकामो यजेतवाक्ये तूक्तः न त्वत्र हि विधीयतीत्यत्रापि प्रत्ययार्थत्वप्र

सि॰ ले॰ नः ५

लभते एवमिहापीत्यभिप्रेत्याह नावश्यमिति विविदिषाविनियोगपक्षस्य संस्कारे कर्मणां विनियोगपक्षं दृष्टां
तयति यस्यैतेयति यस्य पुरुषस्य एते प्रोतस्मार्त्तधर्मोऽष्टाचत्वारिंशत्संख्योकाः संस्काराः संति गर्भादिसंप
त्तिश्चवर्त्ततेतस्य कर्मभिः संस्कृतस्य विद्याधिकारिणः श्रवणादिसंपत्तौ सत्यां तत्त्वज्ञानद्वारा परब्रह्मप्राप्ति
र्भवति तदसंपत्तौ च पुण्यलोकावाप्तिरिति कर्मणां संस्कारकत्वपक्षे यथा ज्ञानोत्पादकत्वनियमो नास्ति
संस्कारजननमात्रेण संचरितार्थानां कर्मणां विद्योत्पत्तिपर्यंतव्यापाराभावात् तथा तेषां विविदिषार्थत्वप
क्षेपीत्यर्थः आत्मज्ञानयोग्यताकार्यकारणसंबन्धात्तन्निष्ठात्तदापादको यो मलापकर्षणगुणाधानल ।

4

विविदिषार्थत्वपक्षे तु श्रवणादिप्रवृत्तिजननसमर्थोत्कटेच्छासंपादनमात्रेण कृतार्थतेति नाव
श्यं विद्योत्पादकत्वनियमः यस्यैतेऽष्टाचत्वारिंशत्संस्कारा इति स्मृतिमूले कर्मणां आत्मज्ञानयोग्य
तापादकमलापकर्षणगुणाधानलक्षणसंस्कारार्थत्वपक्षं उवेति वदंति ननु केषां कर्मणामय
मुदाहृतश्रुत्या विनियोगो बोध्यते

क्षणो संस्कारोऽतदर्थत्वपक्षाउत्यर्थः कर्मणां विविदिषार्थत्वपक्षे संस्कारार्थत्वपक्षे च ज्ञानोत्पत्त्यनियमे
समानेऽपि विविदिषार्थत्वपक्षे प्रापिकी ज्ञानोत्पत्तिः तीव्रबुभुक्षाया इव दृढविविदिषायाः सर्वप्रयत्नेन
विद्यासंपादनसमर्थत्वात् संस्कारार्थत्वपक्षे तु ब्रह्मज्ञानयोग्यतामात्रसिद्धावपि विविदिषाया अप्यनि
यतत्वेन विद्योत्पत्तिः प्रायिकापि न भवतीति विविदिषासंस्कारार्थत्वपक्षयोरपि भेद ऊहनीय इ
ति भावः केषामिति किमाश्रमकर्मणामेव किं वा अन्येषामपीत्यर्थः ॥

उ॰ ५

रागादिराहित्यरूपचित्तशुद्धिर्विविदिषा वैराग्यप्रकृष्टदेवतादिभक्तलक्षणश्रवणकृषावत एव जन्मपर्यंतकर्मानुष्ठान
मित्यत्र सुरेश्वराचार्यसंमतमाह उक्तं हीति शुद्धितइति शुद्धिद्वारेत्यर्थः अस्तमायांतीति त्यागमायांतीत्यत्र
वाक्येवमभवंति कृतप्रयोजनत्वादित्यर्थः कृतप्रयोजनानां निवृत्तौ दृष्टांतमाह प्रावृडंतइति वर्षाकालाव
सानइत्यर्थः विविदिषायां विनियोगपक्षे विविदिषोदयपर्यंतमेव यज्ञाद्यनुष्ठानमित्यविवादं विद्यायां विनि
योगपक्षेप्येवं चेत्कस्तयोर्भेदइतिशंकते कर्मणामिति अनुष्ठाने विशेषाभावेपि फलतो विशेषोस्तीत्याह
अयंभेदइति वक्ष्यमाणइत्यर्थः उपरतावितित्यागेपीत्यर्थः अदृष्टद्वारेति शेषः विविदिषाविनियोगपक्षे

उक्तं हि नैष्कर्म्यसिद्धौ प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः कृतार्थान्यस्तमायांति प्रावृडंते घ
नाइवेति कर्मणां विद्यार्थत्वपक्षेपि विविदिषापर्यंतमेव कर्मानुष्ठाने विविदिषार्थत्वपक्षात्को भेद इति
अयं भेदः कर्मणां विद्यार्थत्वपक्षे द्वारभूतविविदिषासिद्ध्यनंतरमुपरतावपि फलपर्यंतानि विविदिषाद्यु
गुरुलाभान्निर्विघ्नश्रवणमनननिदिध्यासनानि निर्वृत्तिप्रमुखानि संपाद्य विद्योत्पादकत्वनियमो ॥६॥

हि यज्ञादिकर्मजनितादृष्टं श्रवणादिप्रवृत्तिपर्यंतं विविदिषाश्रयहितं तन्निमित्तमात्रयनश्यति फलैकनाश्य
त्वाददृष्टस्य विविदिषोत्पत्त्यनंतरं च श्रवणादिप्रतिबंधकदुरिताभावे सति विविदिषाबलादेव श्रवणादि
कं संपाद्य विद्यां लभते श्रवणादिप्रतिबंधकदुरितसत्वे तु तत्सत्वं मत्वे कृतेपि श्रवणाद्यलाभेन निश्चिंतमत
निवृत्तस्य पापमनुतिष्ठति श्रमेण तन्निवृत्तेः कोपायोपायानुष्ठाने वा तदनुष्ठानस्यापि विघ्नबाहुल्ये वा श्रवणाद्यसं
भवात् न ज्ञानोदयः यथा श्रीमधवीर्येण लभ्यतेण रज्जुमतौ सत्यामपि प्रतिबंधेनाज्ञलाभेन दृष्टेण
न कार्यपर्यंतनिवृत्तिं लभते तद्वलाभेन तल्लाभाय यतते यत्ने कृतेपि यथावन्न लभते तेन दानकार्यपर्यंतं निवृत्तिं

सि॰ ले॰
न॰ प॰

आश्रमधर्मव्यतिरिक्तानां वर्णधर्माणामप्यस्ति विद्योपयोग इत्येवंकारार्थं हेतुमाह अंतरा चापि तु तद्दृष्टेः इति विद्यां प्रति बहि-
रंगसाधनेषु कर्मस्वंतरंगसाधनेषु चानाश्रमिणामधिकारोऽस्ति न वेति संदेहे सति नास्त्यधिकार इति पूर्वपक्षः आश्र-
मकर्मणामेव विद्यायां विनियुक्तत्वात्तेषामाश्रमकर्माभावात् साधनचतुष्टयसंपन्नस्यैव श्रवणादिष्वधिकाराच्चानाश्र-
मिणां च साधनचतुष्टयांतर्गततत्समुदायवति शास्त्रीयसंन्याससत्ताभावेन तत्संपत्त्यभावादिति सिद्धांतस्तु सूत्रे तु शब्दः पू-
र्वपक्षव्यावृत्त्यर्थः अंतराशब्दः आश्रमाणामंतरालमनाश्रमित्वमाह तथा चानाश्रमित्वे वर्तमानोऽपि पुरुषः श्रव-
णादिषु विद्यार्थकर्मसु चाधिक्रियते कुतः श्रुतिस्मृतिषु रैक्ववाचक्नवीप्रभृतीनामनाश्रमिणामपि विद्यावत्त्वोपलब्धेः

अंतरा चापि तु तद्दृष्टेरित्यधिकरणे आश्रमरहितविधुराद्यनुष्ठितकर्मणामपि विद्योपयोगनिरूपणात् न च
विधुरादीनामनाश्रमिणां प्रागुन्नतानुष्ठितयज्ञाद्युत्पादितविविदिषाणां विद्यासाधनश्रवणादावधिका-
रनिरूपणमात्रपरं तदधिकरणं न तु तदनुष्ठितकर्मणां विद्योपयोगनिरूपणपरमिति शंक्यं ॥

परिव्राजकस्य श्रवणादिषु मुख्याधिकारे गृहस्थादीनामिव ह्यनाश्रमिणामपि गौणाधिकारोपपत्तेः तथा च तदधिक-
रणे भाष्ये दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणार्थिनमधिकरोति श्रवणादिषु इति अविद्यानिवृत्तिः विद्यायाः दृ-
ष्टफलं तदर्थिनमविद्यानिवर्तकसाक्षात्कारार्थिनमधिकारित्वेन स्वीकरोति शूद्रस्येव वेदांतश्रवणादिषु नाश्रमि-
णां प्रतिषेधाभावात् गौणाधिकारे संन्यासापेक्षा नास्तीति मत्वा मात्रपदमिति भाष्यार्थः अंतरा चापि तु इत्यधि-
करणमनाश्रमिणां श्रवणाद्यधिकारमात्रनिरूपणपरं न त्वनाश्रमिकर्मणामपि विद्योपयोगनिरूपणपरं तथा
च सोऽत्राश्रमकर्मपदस्य वर्णधर्मोपलक्षणत्वेन नासिद्ध्यतीति शंकते न च विधुरादीनामिति ननु तेषां विद्यार्थक-
र्माभावे विविदिषोदयासंभवादनाश्रमिणां श्रवणाधिकारनिरूपणमयुक्तमित्याशंक्याह प्रागजन्मेति
अनाश्रमिणोऽपि पूर्वजन्मांतरीयाश्रमकर्मानुष्ठानजनितविविदिषावंतः संन्यासहेतुतीव्रवैराग्याभावात् मुख्या-

नन्वाश्रमधर्माणामपि सर्वेषां विविदिषावाक्ये श्रवणाभावान्नेषामपि सर्वेषां विनियोगो न लभ्यते तत्राह वेदानुवच
नेनेति वेदस्य गुरुवचनमनु शिष्यस्य वचनं वेदानुवचनं वेदाध्ययनं तच्च ब्रह्मचारिधर्माणां मध्ये प्रधानं तेन तद्
धर्माः सर्वे गृह्यन्त इत्यर्थः एवमुत्तरत्रापि प्राधान्यं द्रष्टव्यं तपः कृच्छ्रचान्द्रायणादिरूपं वानप्रस्थाश्रमाचरणमिह तपः
शब्देनोच्यत इति भावः अनाश्रितः कर्मफलं कार्यं कर्म करोति यः इत्यादिस्मृतिषु नित्यमाश्रमिणां कार्यं कर्म
यं यं यत्कर्म विहितं तत्सर्वं फलाभिसंधिमन्तरेण यः करोति स योगयुक्तो दिनं सर्वोक्तचित्तशुद्धिविविदिषादिरूपं प्र
त्यक्षप्रावर्णं लभत इति प्रतिपादनात् तन्मूलभूते विविदिषावाक्येपि सर्वेषामाश्रमकर्मणामुपलक्षणं शक्यमिति
मन्तव्यं आश्रमकर्मणामेव विनियोग इत्यत्र हेतुं निगमयति अत एवेति आश्रमकर्मणामेव विनियोगाभ्युपगमा

अत्रैवोदाहृतं वेदानुवचनेनेति ब्रह्मचारिधर्माणां यज्ञेन दानेनेति गृहस्थधर्माणां तपसानाशकेनेति
वानप्रस्थधर्माणां चोपलक्षणमित्याश्रमधर्माणामेव विद्योपयोगः अत एव विहितत्वाच्चाश्रमक
र्मापीति शारीरकसूत्रे विद्यार्थकर्मस्वाश्रमकर्मपदप्रयोग इति कल्पतरोरुक्तं नाश्रमधर्माणामेव विद्योप

देवेत्यर्थः आश्रमकर्मणां विविदिषावाक्ये न विद्यादौ विनियुक्तानां त्वकामनारहितेनाश्रमिणा स्वाश्रमविहितं क
र्मानुष्ठेयमिति शंकायामुत्तरसूत्रेणापि कर्त्तव्यमेव तत् अपि विहितत्वादन्यथाश्रमवापत्त्यसंगादिति सूत्रार्थो
बोध्यः अन्येषामपि विनियोग इति पक्षे नित्यकर्ममात्रविषयत्वमाश्रयमं दर्शयति कल्पतरोरिति कल्पतरावु
क्तमिति संबंधः आश्रमधर्मव्यतिरिक्तानामप्यस्ति विद्योपयोग इति कल्पतरुकारमतमप्युक्तसूत्रे विद्यार्थकर्म
स्वाश्रमकर्मपदप्रयोगविरोधान्नेत्यवसीनाश्रमकर्मपदस्य वर्णधर्मेऽप्युपलक्षणत्वोपपत्तेर्न तद्विरोध इति
वाच्यं तत्र तेषामेव प्रमाणाभावादित्याशंक्य तत्र नियामकं दर्शयति नाश्रमधर्माणामेव विद्योपयोग इ

सि॰ ले॰
तृ॰
६

द्वयफलकत्वमप्यस्तु तथा च तेषामपि विद्यापेक्षितत्वे द्वयफलत्वात्तोपकारजनकत्वं संभवतीत्यत आह तेषांतु नित्यद्व
यफलकत्वे मानाभावेन विद्योपकारकत्वस्यालक्षणत्वादिति भावः कर्मणां विद्यायां विनियोगविधेः लक्षणोपकारे नित्यक
र्मभिरेव चारितार्थ्ये दृष्टान्तमाह तत्र यथेति यज्ञाकाम्यानां पापक्षयफलकत्वस्यान्यतः प्राप्त्यभावेपि यज्ञादीनां विनि
योगबलादेव तेषां तत्कल्पनामिति तेनेत्याह तत्रेति काम्यकर्मणां विद्यापेक्षितोपकारहेतुत्वाल्लक्षणोपसत्वामित्यर्थः
ननित्येति गौरवादिति भावः आश्रमकर्मव्यतिरिक्तानामपि विनियोग इति पक्षे काम्यसाधारण्यं दर्शयति सर्वेषेति
अविशेषादिति यज्ञादिशब्दानां नित्ययज्ञादिष्विव काम्ययज्ञादिष्वपि प्रवृत्त्यविशेषात् नित्यानामिव काम्यानामपि
विनियोगः स्यादभातीति तत्साधारण्येन कर्मणामुपकारः कल्पन इत्यर्थः काम्यसाधारण्येन विद्योपयोग्युप

तत्र यथा प्रकृतौ क्लृप्तोपकारकाणामङ्गानामतिदेशो मतिन प्राकृतोपकारातिरिक्तोपकारकल्पनमेवं ज्ञाने
विनियुक्तानां यज्ञादीनां क्लृप्तनित्यफलपापक्षयातिरेकेण नित्यकाम्यसाधारण्य विद्योपयोग्युपकारक
ल्पनमिति सर्वेषेत्यादौ रिक्ते तु नित्यानां काम्यानां च कर्मणां विनियोग उक्तः यज्ञादिशब्दाविशेषात् प्र
कृतौ क्लृप्तोपकाराणां पदार्थानां क्लृप्तप्राकृतोपकारातिदेशाभावेन विकृतिष्वतिदेशेन संबंधो न तु
पदार्थानामतिदेशानन्तरमुपकारकल्पनेति न तत्र प्राकृतोपकारातिरिक्तोपकारकल्पनाप्रसक्तिः

कारकल्पनं न संभवति तत्कल्पने पूर्वतन्त्रन्यायविरोधादिति मत्वा विकृतिष्वतिदिष्टान्यङ्गानि दृष्टान्तत्वेन कल्पनया
वुदाहृतानि न तु नित्ययज्ञादीनां दृष्टान्तत्वेनोदाहरणयोग्यानीत्याह प्रकृताविति दर्शपूर्णमासादिषु प्रकृतियागा
दिषु यः पदार्थानां क्लृप्त उपकारः तस्यैव प्रथममतिदेशः तत्पृष्ठभावेन पदार्थानां विकृतिषु सौर्यपश्वादियागादिषु ति
देशाभावेन प्राकृतपदार्थानामतिदेशेन विकृतिषु विनियोगानन्तरं पदार्थानामुपकारकल्पनमिति न तत्र क्लृ
प्तोपकारपरित्यागेनोपकारान्तरप्रसक्तिरित्यर्थः एतदुक्तं भवति प्रकृते यज्ञादीनां विनियोगानन्तरमुप
कारकल्पनमतिदेशस्थले तु उपकृतोपकारकल्पनानन्तरं प्राकृतपदार्थानां विकृतिषु विनियोगः
ततो दृष्टान्तो विषम इति

6

तृ॰
६

ननुअंतराचापितुतद्दृष्टेरितिसूत्रेविद्यार्थकर्मसुविधुरादीनामधिकारेप्रसाधितेऽनाश्रमिणांरैक्वावाचक्नवीप्रभृतीनांविद्यावत्त्व
दर्शनंहेतुत्वेनोक्तंतदयुक्तंरैक्वावाचक्नवीविदुरप्रभृतीनांजन्मांतरीयविद्यासाधनानुष्ठानबलादेवविद्याजातेतिश
क्यसंभवादतोऽनाश्रमिकर्मणांविद्योपयोगाद्युपपत्तेषांविद्यावत्त्वदर्शनमनन्यथासिद्धंलिंगंनभवतीत्यस्वरसादन्य
थापासिद्धंहेतुमन्यमभिप्रेत्योक्तं विशेषानुग्रहश्चेति विशेषः धर्मविशेषैः जपादिलक्षणैः ब्राह्मणत्वादिवर्णमा
त्रसंबंधिभिरपिचित्तशुद्धिविविदिषाद्वाराश्रमधर्मैरिवविद्याया अनुग्रहः उपकारः संभवत्येवह्युक्तं जप्येनैवतु
संसिध्येत्ब्राह्मणोनात्रसंशयः गंगायांस्नानमात्रेणमुच्यतेनात्रसंशयः यस्यस्मरणमात्रेणेत्यादिवचनैः जप
तीर्थस्नानदेवताध्यानादिधर्माणांशुद्ध्यादिद्वाराविद्यासाधनत्वप्रतिपादनादितिसूत्रार्थः तदनुष्ठितानामि
ति अनाश्रमिणः तद्दृष्ट्यार्थः एवमनाश्रमिधर्माणामपिसूत्रकारेणवस्तुष्टविद्योपयोगस्यसाधिततयातद्विरो

विशेषानुग्रहश्चेतितदधिकरणसूत्रतद्भाष्ययोस्तदनुष्ठितानांजपादिरूपवर्णमात्रधर्माणामपिविद्यो
पयोगस्यैवंकर्मोक्तेर्विहितत्वाच्चाश्रमकर्मापीति सूत्रेआश्रमपदस्यवर्णधर्माणामप्युपलक्षणत्वादित्यभिप्रा
धायोनमाश्रमधर्मातिरिक्तानामप्यस्तिविद्योपयोगः किंतु नित्यानामेवतेषांहिफलंदुरितक्षयंवि
द्यापेक्षते नकाम्यानांफलंस्वर्गादि

धायसौत्रमाश्रमकर्मपदंवर्णधर्माणामप्युपलक्षकंवाच्य
मित्याशयेनाह सूत्रइति एवंकल्पतरुकाराणामभिप्रायमुपवर्ण्यतन्मतमुपपादयति आश्रमधर्मेत्यादिना
ननुयज्ञादीनांविनियोगः कल्प्यमानः किंकाम्यसाधारण्येन कल्प्यतेकिंवानित्यानामेवनाद्यः काम्यकर्मफलस्य
स्वर्गादेर्विद्यामानपेक्षितत्वेनतेषांविद्योपकारकत्वासंभवात् नद्वितीयः नित्यकर्मफलस्यदुरितक्षयस्यापि
प्रमाणसाध्यविद्यापेक्षितत्वेमानाभावेनतेषामपिविद्याविनियोगानुपपत्तेरितिशंकते किंत्विति समाधत्ते
नित्यानामेवेति ज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणः इत्यादिवचनैर्नित्यकर्मफलस्यदुरितक्षयस्यविद्य
यापेक्षितत्वेनसूचयति हीति प्रमाणजन्यायाअपिविद्यायांदुरितस्यप्रतिबंधकत्वसंभवात् दुरितक्षया
पेक्षायुक्तेतिभावः काम्यकर्मणांविद्यायामुपकारकत्वंमंदीकरोति नेति नचकाम्यानांनित्यानामिवदुरित

सिं॰ले॰ त॰ ७

ननदतिदेशाप्रामाण्यरूपबाधासंभवाद्दतो बाधनिरूपणमसिद्धमर्थं प्रकृतिस्तन्नोपकारमनुविनैव प्राकृतानामन्वयो
विकृतिष्विति दशमाध्यायप्रथमाधिकरणे साधितं तथा च यत्र पदार्थानां विनियोगानन्तरमुपकारकल्पनं तत्र।
अतन्नत्वपदार्थसामर्थ्यानुसारेण प्रथमावगतविनियोगनिर्वाहायान्तन्नोपकारकल्पनं मीमांसकसंमतमिति
प्रतीयते यदि विनियोगानन्तरमुपकारकल्पनाभ्युपगमेपि तन्नोपकारासंभवे विनियुक्तपदार्थपरित्या
गएव न तत्तन्नोपकारकल्पनं न तत्संमतं भवेत्तदा उपकारमनुविनैव पदार्थानामतिदेश इति निरूपणप
रमधिकरणं व्यर्थं स्यात् पदार्थानामेव प्रोक्षणावघातादीनामतिदेशेन विनियोगेपि विकृतिगतकृष्ण
लादिष्ववघातादेर्विहितेपि तुषविमोकरूपदृष्टोपकारस्य लोकसिद्धस्याभावादन्नोपकारकल्पना।

नोपइतिसंप्रतिपद्येव वा धूलत्वाणारंभसिद्धार्थमुपकारमभ्यवो विकृतिषु प्राकृतानान्वयो द
शामाद्येसमर्थितः किंच तन्नोपकारालाभान्नित्यानामेवार्थं विनियोग इत्यभ्युपगमे
नित्येभ्य इति दुरिततक्षयस्य तस्मादज्ञानोत्पत्तेरन्यतःसिद्धत्वादर्थापं विनियोगः

७

नंगीकाराच्च श्रवणादेरननुष्ठानादिलक्षणबाधस्य दशमाध्यायेनिरूपणीयस्यासंभवेन तदर्थमुपकार
मनुविनैव पदार्थानामतिदेश इति निरूपणस्यानपेक्षितत्वात् तस्माद्विविदिषावाक्येनाविशेषेण नित्यका
म्यसाधारणो विनियोगे प्रथममवगते सति तन्निर्वाहायान्तन्नोपकारकल्पनं युक्तमेवेति वस्तुतस्तु नित्य
कर्मस्वपि विद्यापेक्षितोपकारजनकत्वं तन्नित्यसिद्धमित्याह किंचेत्यादिना अलाभादिति काम्येष्विति
शेषः नित्यानां विद्यापेक्षितदुरितक्षयलक्षणोपकारद्वारा विद्याहेतुत्वं विविदिषावाक्यादन्य
तःसिद्धमसिद्धं वा तत्र नाद्यः विविदिषावाक्यवैयर्थ्यप्रसंगादित्याह नित्येभ्य इति विनियोग इति
शेषस्तद्रूपविनियोगबोधकशास्त्र इत्यर्थः

ऊ॰ ७

इहविनियोगेतिवाक्यार्थः प्रकृतानुगुणं दृष्टान्तमाह उपदिष्टानामिति दर्शपूर्णमासादिप्रकरणोपन्यस्तत्वाम्नातानां
पदार्थानां श्रुतिलिंगादिभिः दर्शपूर्णमासादिषु विनियुक्तानां प्रथमावगतविनियोगनिर्वाहाय यथायोग्यं दृष्टादृ
ष्टलक्षणउपकारः कल्प्यते यथा तथात्र उपकारो ऽत्रापि कल्प्य एवं न तु प्रथमावगतविनियोगपरित्याग उचितः यत्ना
द्विशेषणकृतविबाधप्रसंगादित्यर्थः सामान्यशास्त्रेति नित्यकाम्यसाधारणयज्ञादिशास्त्रेत्यर्थः यथा दृष्टोप
कारातिरिक्तोपकाराकल्पनं कल्प्यतत्कार्योक्तं मीमांसकसंमतं तथा प्रथमावगतविनियोगानुसारेण ।
दृष्टोपकारकल्पनमपि मीमांसकसंमतमेवेत्याह अध्वरेष्विति कर्ममीमांसकैरपि संप्रतिपन्नमेव प्राक्

इह तु प्रयत्नस्तु यथा प्रथममेव विनियुक्तानां यज्ञादीनामुपदिष्टानामिव पश्चात्कल्पनीयस्तु उपकारः
प्रथमावगतविनियोगनिर्वाहाय दृष्टोऽपि सामान्यशास्त्रोपात्तसकलनित्यकाम्यसाधारणः कथं
न कल्प्यः अध्वरेष्वध्वरमीमांसकैरपि ह्युपकारमुखेन पदार्थान्वय एव दृष्टोपकारनियमः
पदार्थान्वयानन्तरमुपकारकल्पने त्वदृष्टोऽपि विनियुक्तपदार्थानुगुण एवोपकारः कल्प

नान्वयः समर्थित इति संबंधः पदार्थान्वय एवेति पदार्थान्वयस्थल एवेत्यर्थः दृष्टोपकारनियमः दृष्टोपका
रातिरिक्तोपकाराकल्पनमित्यर्थः एवकारव्यावर्त्यमाह पदार्थान्वयानन्तरमिति उपकारकल्पनस्थले त्वित्यर्थः
संप्रतिपन्नैवेति स्वीकृतैवेत्यर्थः बाधलक्षणेति बाधाख्यापारभाषिधर्मेत्यर्थः प्राकृतान्वय इति प्रकृतिसाग
दीये पशुतायो पदार्थाः तेषां विकृतियागादिष्वतिदेशेन प्राप्तिरित्यर्थः एतदुक्तं भवति पूर्वतन्त्रे दशमाध्याये
विकृतावतिदिष्टानामङ्गानां प्रकृतौ दृष्टत्वाददृष्टोपकारस्यासंभवबाधो निरूप्यते तच्च बाधनिरूपणं विकृतिष्व
तिदेशेन पदार्थप्राप्त्यनन्तरमुपकारकल्पनप्रसंगेनासिध्यति प्रकृतौ श्रुत्यादिभिर्विनियुक्तपदार्थानां दृष्टोपका
रासंभवे ऽदृष्टोपकारकल्पनयातिरिक्तद्वार्थसर्वथामेवांगानामनुष्ठानावश्यंभावेन केषांचिदंगानामनुष्ठा

सि. ले. टी. ५

ज्ञानापेक्षितोपकारो नित्येष्वस्तु मन्त्र इति मतं निरालम्बनमिति मत्वाभिप्रेत्य काम्येष्विव नित्येष्वप्यस्तूपकारकल्पनं तु ।
त्वमिति निरूपयति तर्हीति नित्येषु ज्ञानोपकारकत्वनियमासिद्धाविति भावः नन्वेवमपि नित्यानामेव विनियो
गपक्षे विधेर्लाघवमस्ति तेषां पापक्षयज्ञानप्रतिबन्धकदुरितनिवर्हकत्वस्य वचनान्तरात्प्राप्तत्वेन नियममात्र
स्य विधिफलत्वात् काम्येषु तु ज्ञानप्रतिबन्धकदुरितनिवर्हकत्वं सर्वपापनप्राप्तमिति काम्यानामपि विनियो
गपक्षे विधेर्लाघवगौरवमपरिहार्यमिति चेत् सत्यं तथापि यज्ञादिश्रुतीनां संकोचलक्षणबाधपरिहारा
य काम्यानामपि विनियोग आवश्यक इत्यत्रैव तात्पर्यं बोध्यं नित्यानां ज्ञानप्रतिबन्धकदुरितस्येव तत्प्रत्यूपशुद्धि
विशेषलाभेऽपि तावन्मात्राज्ज्ञानोत्पत्तिरस्ति प्रमाणप्रमेयासंभावनादिरूपदृष्टप्रतिबन्धकसत्त्वादतः तन्नि

8

तर्हि नित्यानामप्यस्तु तन्मेव नियमतो ज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवर्हणत्वे ज्ञानसाधनविधि
दृष्टगुरूलाभश्रवणमननादिसंपादकापूर्वं च द्वारं कल्पनीयमित्यस्तूपकारकल्पनाविशेषात्
सामान्यश्रुत्यापादितो नित्यकाम्यसाधारणो विनियोगो भञ्जनीय इति नन्वेवमपि कथं कर्मणैव हि
संसिद्धिमास्थिता जनकादय इत्यादिस्मरणनिर्वाहः

ज्ञानोपयोगिनामस्तु दृष्टगुरूलब्धीनश्रवणमननध्यानादीनां संपादकादृष्टजनकत्वं नित्यानामस्तु तन्मेव विवि
दिषावाक्यीयविनियोगबलात्कल्पनीयमित्याह ज्ञानसाधनेति एवं विविदिषाद्वारा विद्यायां कर्मणां विनि
योगं निरूप्य तेषु त्रैवर्णिकानामधिकार इति निरूपणार्थमात्रे पव्राजेन प्रसंगं दर्शयति नन्वित्यादिना एवम
पीति तत्त्वाप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने इति ज्ञानकर्मसमुच्चयप्रतिपादकस्मरणस्य विविदिषावाक्या
विरोधेन ज्ञानं साक्षाद्ब्रह्मप्राप्तिसाधनं कर्म च विद्याद्वारा तत्प्राप्तिसाधनमिति क्रमसमुच्चयपरतया निर्वाहे
पीत्यर्थः अत्रावधारणेन संसिद्धिप्राप्तिं तं मुक्तिं प्रति कर्मातिरिक्तोपायनिषेधात् जनकाद्यनुष्ठितकर्मणां मु
क्तिं प्रति साक्षादेवोपयोगः प्रतीयते स च विविदिषावाक्यविरुद्ध इति समुच्चयस्मरणवदस्य स्मरणस्य नि

टी. ५

द्वितीये नित्येष्वपि विनियोगोपकारकत्वमस्त्वित्यमेव कल्पनीयमिति नित्यकाम्यसाधारणोपकारकल्पनं युक्तमेवेत्याह
अन्यतरस्यादसिद्धाविति नित्यानां विनियोगोपकारकत्वासिद्धावित्यर्थः अन्यतः सिद्धिपक्षमवलम्ब्य विनियोगापेक्षत्वं श
कते नन्विति दुरितं तावत्त्रिविधं ज्ञानोत्पत्तिप्रतिबंधकं ज्ञानोत्पत्तिप्रत्युदासीनं सञ्चरकादिप्रदं च तत्र चाद्यं नित्या
नां ज्ञाने विनियोगाभावे नित्यकर्मभिर्ज्ञानप्रतिबंधकदुरितस्यैव क्षयस्तन्मात्रमानं नास्ति धर्मेण पापमपनुदति
यज्ञो दानं तपश्चैव पावनानि मनीषिणामित्यादिश्रुतिस्मृतिवचनानां नित्यानां दुरितसामान्यक्षयहेतुत्वबोधनमात्र।
परत्वादतो नियमेन ज्ञानप्रतिबंधकदुरितक्षयहेतुत्वं नित्यकर्मणामन्यतो न प्राप्नोतीति तत्प्राप्त्यर्थोऽपि विनियोग इष्ट
र्थः नित्यैरेव यज्ञादिभिर्दुरितक्षयद्वारा ज्ञानं संपादयेदिति प्रकारेण विविदिषावाक्यीयेन नित्यानां ज्ञाने विनियोगो

अन्यतरस्यादसिद्धौ ज्ञानापेक्षितोपकारजनकत्वं नित्येषु न स्यान्नित्यविशेषान्नित्यकाम्यसाधारणविनियो
गो दुर्वारः नन्वनित्यानां दुरितक्षयमात्रहेतुत्वस्यान्यतः सिद्धावपि विशिष्य ज्ञानोत्पत्तिप्रतिबंधकदुरित
निवर्हकत्वं न सिद्धं किं तु अस्मिन् विनियोगे सति ज्ञानोद्देशेन नित्यान्यनुतिष्ठतो वश्यं ज्ञानं भवति इतर
थाशुद्धिमात्रमनियतज्ञानोत्पत्तिरिति सार्थको विनियोग इति चेत्

सत्यं वा कथं ज्ञानप्रतिबंधकदुरितस्यैव क्षयो नित्यानुष्ठानतो लभ्यत इति एष्टव्यमिति किं विति तत्प्रभप्रकारमाह
अस्मिन्निति अवश्यमिति नित्यानुष्ठानात् ज्ञानप्रतिबंधकदुरितक्षये सति प्रतिबंधकरहितमहावाक्यादवश्यं ज्ञा
नं भवतीत्यर्थः इतरथेति एतद्विनियोगाभाव इत्यर्थः दुरितसामान्यक्षयरूपा शुद्धिर्भवति न तु नियमेन ज्ञान
प्रतिबंधकदुरितक्षयरूपशुद्धिविशेषो भवति ज्ञानोद्देशेन नित्यानामननुष्ठानात् तथा च बहुजन्मसु नि
त्यकर्मानुष्ठानशीलस्यापि नियमेन ज्ञानं न जायते किंतु दैवयोगात्कदाचित्ज्ञानप्रतिबंधकदुरितसंघस्य
निःशेषक्षयसंभवात् ज्ञानमपि कदाचित्भवतीत्यनियतज्ञानोत्पत्तिरित्यर्थः

सि· ले· तं· ५

ज्ञादिविधावुद्देश्यविशेषणसमर्पकतया ब्राह्मणस्याप्यधिकारप्रापकत्वं किं वा विधेयकत्वे समर्पकतया तदुभय
समर्पकत्वाभावेपि स्वसंनिधिमात्रेण तन्मात्रस्याधिकारप्रापकत्वं वा गत्यंतराभावात् तत्र नाद्य इत्याह नहीति
यज्ञादीनां विद्यालक्षणफले विनियोगपरे विधौ विद्याकामस्याधिकारः सिद्ध एव तथा च ब्राह्मणपदवि शि
ष्टस्य विद्याकामस्याधिकारो विवक्षित इति स्वीकृत्य ब्राह्मणपदस्याधिकारिविशेषणसमर्पकत्वं वक्तुं न
शक्यते विधेययज्ञादिनिरूपितोद्देश्यतायाः विद्याकामस्यात्रैपर्यवसानसंभवेन ब्राह्मणरूपविशेषण
स्यानाकांक्षिततया विद्याकामं प्रति विशेषणत्वेनान्वयायोगात् विशिष्टस्योद्देश्यत्वकल्पने गौरवाच्च विद्याका

परिगणिते विद्याकामाधिकारविधौ ब्राह्मणपदस्याधिकारिविशेषसमर्पकत्वं युज्यते उद्देश्यवि
शेषणत्वायोगात् नापि राजा स्वाराज्यकामो राजसूयेन यजेतेति स्वाराज्यकामाधिकारे राजसूयविधौ स्वारा
ज्यकामो राजकर्तृकेण राजसूयेन यजेतेति कर्तृतया यागविशेषणत्वेन विधेयमध्ये राज्ञा राजकर्तृकरा
जसूयस्य राज्ञा संपादयितुमशक्यत्वादर्थादधिकारिकोटिनिवेशवदिह यज्ञादिकर्तृतया विधेय
स्य ब्राह्मणस्यार्थादधिकारिकोटिनिवेश इति युज्यते

७

स ब्राह्मणपदयोः प्रत्येकमुद्देश्यत्वे च वाक्यभेदप्रसंगात् विद्याकामो यज्ञादीननुतिष्ठेत् ब्राह्मणो यज्ञादीननुति
ष्ठेदिति भावः द्वितीयं सदृष्टांतमाशंक्य निराकरोति नापीति स्वाराज्यकामवाक्ये राजपदस्य पूर्वोक्तरीत्या स्वा
राज्यकामं प्रति विशेषणत्वायोगात् कर्तृविधायकत्वं स्वीकृत्य स्वाराज्यकामो राजसूयेन यजेतेति राजसूये राज्ञः स
तः स्वाराज्यकामस्याधिकारः साधित इत्यर्थः राज्ञोर्थादधिकारकोटिनिवेशवदिति संबंधः अर्थादिति पदोक्ता
मर्थापत्तिं स्फुटयति राजकर्तृकेति इहेति विविदिषावाक्य इत्यर्थः विधेयस्येति विद्याकामो ब्राह्मणकर्तृकय
ज्ञादीननुतिष्ठेत् इत्येवं विधेयस्येत्यर्थः अर्थादिति ब्राह्मणकर्तृकयज्ञादेरब्राह्मणेन संपादयितुमशक्यत्वा

यस्यापि विविदिषावाक्याविरुद्धसिद्धान्ताभिमतमर्थं मायांवक्तुं निषेधति न च तस्येति विद्यार्थेति अस्मिन्स्मरणे संसि
द्धिपदं विद्यापरं तथा च शुद्धिद्वारा कर्मणैव विद्याप्राप्तिरिति स्मरणार्थ इति भावः तस्य स्मरणस्य विद्यार्थक
र्मानुष्ठानपरत्वं न चेत्तत्र हेतुमाह विविदिषावाक्यादिति अत इति विविदिषावाक्यबोधे विद्यासाधनकर्म।
णि त्रैवर्णिकानामनधिकारादित्यर्थः उपलक्षणत्वादिति तथा च भाष्ये ब्राह्मणग्रहणमुपलक्षणार्थं
अविशिष्टो ह्यधिकारः त्रयाणां वर्णानामिति तथा च विद्यार्थकर्मसु जनकादीनामप्यधिकारसत्त्वात् क
र्मणैव हीति स्मरणं विद्यार्थकर्मानुष्ठानपरमेवेति न तद्बलात् तमेव विदित्वाति मृत्युमेति नान्यः पन्था इत्या
दिश्रुतिविरुद्धः साक्षादेव कर्मणां मुक्त्युपयोगो वक्तव्य इति भावः अत्र भवंतत्र इति सूज्या इत्यर्थः आत्मबोध

न च तस्य विद्यार्थकर्मानुष्ठानपरत्वं विविदिषावाक्ये ब्राह्मणानामेव विद्यार्थकर्मण्यधिकारप्रती
तेः अतो जनकाद्यनुष्ठितकर्मणां साक्षादेव मुक्त्युपयोगो वक्तव्यः मैवं विविदिषावाक्ये ब्राह्मणग्र
हणस्य त्रैवर्णिकोपलक्षणत्वात् यथाहुः अत्र भवंतो वार्तिककारा ब्राह्मणग्रहणं चात्र द्विजानामुपल
क्षणं अविशिष्टाधिकारित्वात्सर्वेषामात्मबोधन इति नहि विद्याकामो यज्ञादीनन्नुतिष्ठेदिति वि

न इति आत्मबोधसाधनयज्ञादिकर्मणीत्यर्थः विद्यार्थकर्माधिकारस्यैव प्रकृतत्वादिति मंतव्यं ननु विविदि
षावाक्ये ब्राह्मणपदस्य त्रैवर्णिकोपलक्षणत्वसिद्धे त्रयाणां वर्णानामविशेषेण विद्यार्थकर्मस्वधिकारः सिध्य
ति तत्र सर्वेषामविशिष्टाधिकारत्वे सिद्धे तदनुरोधेन ब्राह्मणग्रहणस्योपलक्षणत्वं सिध्यतीति परस्पराश्र
यत्वप्रसंग इति चेन्न ब्राह्मणग्रहणस्य द्विजोपलक्षणत्वमनुपजीव्यैव सर्वेषां द्विजानां विद्यार्थकर्मस्वधिका
रसिद्धेर्वार्तिकवचनेन विवदितत्वात् ननु विविदिषावाक्ये ब्राह्मणग्रहणेन ब्राह्मणस्यैव विद्यार्थकर्म
स्वधिकारे प्रतीयमाने कथं वर्णत्रयसाधारणाधिकारः सिध्येदिति चेत्तत्र वक्तव्यं किं ब्राह्मणपदस्य

सि॰ ले॰ टी॰ १०

उक्तन्यायेनेति । अधिकारिणमसंकोचस्य विधिगतस्य चापकत्वलक्षणप्रमाणोपपादकत्वादिति भावः । अन्यत्र ।
लौकिकन्यायानुपपत्तिरत्र यथाश्रुत्यापि त्रैविद्यपरत्वे प्रयोगाधिकारस्य ब्राह्मणपदं श्रुतवादकमित्याशंक्याह विधिसंसर्ग-
हीनेति । उद्देश्यसमर्पकतया विधेयसमर्पकतया वा विधिवाक्यार्थान्वयबोधानुपयोगी यस्यार्थः राजसूयवा-
क्ये राजसूयस्यात्रैवर्णिकविधेयत्वेन त्रैवर्णिकाधिकारिकत्वेनान्यत्रात्वे सति तत्संयुक्तं विधिसंसर्गहीनं राजपदस-
मभिव्याहारमात्राद्राजकर्तृनियम इति भावः । ननु श्रुतन्यायेन ब्राह्मणपदस्याभावेऽपि त्रैविद्यपरत्वे प्रयोगे विब्राह्मण-
स्यापि विद्यार्थकर्मण्यधिकारः सिद्धः ब्राह्मणग्रहणं व्यर्थमेव स्यादिति चेन्न विद्यार्थकर्मसु ब्राह्मणस्य स्वाधि-
कारज्ञानार्थतोपपत्तेः वैयर्थ्याभावकाध्यात्यादिति भावः । ब्राह्मणग्रहणस्योपलक्षणत्वपरत्वेनेति प्रसंगात् शंकते ॥

वर्णिकाधिकारिकत्वे च तत्र नानामिहापि त्रैवर्णिकाधिकारान्नविद्यार्थत्वेन विधीयमानानां यज्ञादीनां
त्रैवर्णिकाधिकारित्वस्य युक्ततया विधिसंसर्गहीनब्राह्मणपदसमभिव्याहारसंकोचासंभवेन ब्राह्म-
णपदस्य यथाप्राप्तविद्याधिकारिमात्रोपलक्षणत्वमात् ननु विद्याधिकारिमात्रोपलक्षणत्वे शूद्र-
स्यापि विद्यायामर्थित्वादिसंभवेन तस्यापि विद्यार्थकर्माधिकारप्रसंगः इति चेन्न अध्ययनगृहीतस्वाध्या-
यजन्यतदर्थज्ञानवत एव वैदिकेऽधिकार इति शूद्राधिकरणे अध्ययनवेदवाक्यश्रवणादिविधुर-
स्य शूद्रस्य विद्याधिकारनिषेधात्

20

नन्विति अविधेयायां हि विद्यायामधिकारो नाम विद्यार्थित्वमात्रं
तच्च शूद्रस्यापि संभवतीति तत्र विद्यादेरिव तस्यापि विद्यार्थकर्मस्वधिकारोऽनिवार्य इत्यर्थः । शूद्रस्य सुयुक्तस-
गुणब्रह्मविद्यासु निर्गुणब्रह्मविद्यासु निर्गुणब्रह्मविद्यासाधनवेदांतश्रवणादिषु चाधिकारमाशंक्यानन्त-
स्याधिकार इति निर्णीतम् अपशूद्राधिकरणे तस्याधिकाराभावे च भाष्ये हेतुरुपन्यस्तः वेदाध्ययनाभावादिति
शूद्रस्य वेदोच्चारणश्रवणसाधारणनिषेधे वेदाध्ययनाभावेऽपि वेदार्थभूतोपासनाद्यनुष्ठानं किं न स्या-
दित्याशंक्य अध्ययनविधिना वेदजन्यपदार्थज्ञानवेदार्थानुष्ठाने श्रुतिनियमिततया तदध्ययनशून्यस्य तदभावात्
न सगुणनिर्गुणविद्यानुष्ठानेऽधिकार इत्युक्ततया च तत्स्वार्थतया विद्यार्थकर्मस्वप्यधिकारो नास्तीत्यर्थः

कृ॰ २०

अर्थादधिकारिकोटिनिवेश इत्यपि न युज्यत इत्यत्र दृष्टान्तवैषम्यमभिप्रेत्य हेतुमाह सर्वथापीत्यादिना यज्ञादीना
माश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे च यावज्जीवादिवाक्येषु येऽग्निहोत्रादयो धर्मा विहितास्त एवानुष्ठेयाः श्रु
तश्रुतिस्मृतिरूपोभयलिङ्गात् श्रुतिस्तावद्विविदिषावाक्यगतयज्ञादिश्रुतिरेव तया प्रसिद्धयज्ञादीनां प्रसिद्धदाना
दीनां च प्रत्यभिज्ञायमानत्वात् पूर्वं यज्ञादिविधायकत्वे प्रत्यभिज्ञाविरोधात् प्रसिद्धयज्ञाद्यनुवादेन फलसंब
न्धमात्रबोधनेन लाघवाच्च यज्ञादीनां सर्वत्र यज्ञादिपदोपात्तत्वेन नवविधेयप्रतीतेश्च स्मृतिश्च अनाश्रितः कर्मफ
लमित्याद्या प्रसिद्धयज्ञादीनामेव फलाभिसंधिं विनानुष्ठितानां विद्याहेतुत्वं दर्शयतीति सूत्रार्थः अन्यत्रेति विविदि
षावाक्यादन्यत्र कर्मकाण्ड इत्यर्थः उभयविधानादिति राजसूयवाक्ये तत्कर्त्रादिगुणविधिविशिष्टस्य पूर्वकर्मण एव

सर्वथापि त एवोभयलिङ्गादिति सूत्रेऽन्यत्र विहितानामेव यज्ञादीनां विविदिषावाक्ये फलविशेषसंबं ।
धविधिर्न तु पूर्वयज्ञादिविधिरिति व्यवस्थापितत्वेन प्राप्तयज्ञाद्यनुवादेनैकस्मिन्वाक्ये कर्तृरूपगुण
विधिः फलसंबन्धविधिश्चेत्युभयविधानात् वाक्यभेदापत्तेः नापि राजसूयवाक्ये राज्ञः कर्तृतया विधेयत्वाभा
वपक्षे राजपदसमभिव्याहारमात्राद्विशिष्टकर्तृत्वलाभवदिह वाक्यभेदापकर्तृतया ब्राह्मणस्य विधानेऽपि
ब्राह्मणपदसमभिव्याहारमात्रेण ब्राह्मणकर्तृत्वलाभात्तदधिकारपर्यवसानमित्युपपद्यते ॥ अन्यत्रेत्ये

विधिप्रयोगमात्रवाक्यभेदप्रसक्तिरिति तत्र राजपदस्य कर्तृरूपगुणविधायकत्वं युक्तमिति भावः तृतीयमपि
सदृष्टान्तमाशङ्कां निराकरोति नापीति राज्ञ इति राज्ञः कर्तृतया विधेयत्वाभावेऽपि राज्ञ एव राजसूयाधिकारः
सिध्यति राजपदसंनिधानेन स्वाराज्यकामपदस्य क्षत्रियपरत्वावगमादन्यथा राजपदवैयर्थ्यप्रसङ्गादित्यतस्त
र्वेणापि येषामतो राज्ञः कर्तृतया विधिर्नाभ्युपगम्यते तेषां पक्ष इत्यर्थः ब्राह्मणाधिकारपर्यवसानमित्यपि नोप
पद्यत इत्यत्र हेतुमाह अन्यत्रेति कर्मकाण्ड इत्यर्थः इहापीति विविदिषावाक्येऽपीत्यर्थः त्रैवर्णिकाधिकारा
न्तविषयेति ब्राह्मणाः सर्वेऽविशेषेण यपयोरपि विद्यायामधिकारत्वलक्षणाधिकाराविशेषात् शूद्रस्येव विद्यार्थय
ज्ञादिष्वतयोः प्रतिषेधाभावाच्चेत्यर्थः ॥

सि॰ ले॰ व॰ ११

मन्त्राद्यायानतो विद्यामहिमावगत्युपायासंभवेन विद्यायामर्थित्वलक्षणाधिकारानुपपत्तिरिति तदनूद्य निराकरोति
न च शूद्रस्येति श्रावयेदिति ब्राह्मणा इति शेषः यद्वा क्षत्रियादीन् श्रावयेन्नदादिविशेषमाह कृत्वेति पुराणादिभिः
साधनश्रुतेरवगतविद्यामाहात्म्येन शूद्रेण सतत्यान्तस्येत्यर्थः मतिनिषेधवचनस्य संकोचं दर्शयति अशूद्रा
येति अन्यथेति शास्त्रार्थज्ञानमात्रदाननिषेधपरत्व इत्यर्थः शूद्रस्य ततः पुराणादिपठननिषेधादन्येभ्यो
पि पुराणादिश्रवणाभावे स्वधर्मावगतिर्न संभवतीत्यर्थः उपपत्तिमाशंक्याह शूद्रश्चतुर्थो वर्ण इत्यादिना

न च शूद्रस्य विद्यायामर्थित्वासंभवः श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः इत्यादीतिहासपुरा
णश्रवणे चतुर्वर्णाधिकारस्मरणेन पुराणश्रवणगतविद्यामाहात्म्यस्य तस्यापि विद्यार्थित्वसंभवात्
न शूद्राय मतिं दद्यादिति स्मृतेश्च तदनुष्ठानानुपयोगाग्निहोत्रादिकर्मज्ञाननिषेधपरत्वात् अन्यथा
तस्य स्ववर्णधर्मस्याप्यवगत्युपायासंभवेन शूद्रः चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौच
माचमनार्थे पाणिपादप्रक्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारतुष्टिः परिचर्या चोत्तरेषामि
त्यादि तद्धर्मविभाजकवचनानामनुष्ठानलक्षणाप्रामाण्यापत्तेः ॥

११

जातिर्जन्म उपनयनाख्यं द्वितीयजन्म इत्यर्थः प्रक्षालनमेवेति न तु पंचप्राणाचमनं गात्रसंप्रोक्षणादिकं वेत्येवकारार्थः
उत्तरेषामिति द्विजानामित्यर्थः न शूद्राय मतिं दद्यादिति स्मृतेः शास्त्रार्थज्ञानमात्रदाननिषेधपरत्वेपि वृद्धौ
च मातापितरौ भार्या साध्वी सुतः शिशुः अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदित्यादिवचनदर्शनेन येब्रा
ह्मणाः उक्तलक्षणमात्रादिसंरक्षणोपयोग्यर्थलाभाय शूद्रान्प्रति पुराणादिपठने प्रवर्त्तन्ते तेभ्योपि विद्या
माहात्म्यस्वधर्मयोरवगतिसंभवान्न काप्यनुपपत्तिरिति मन्तव्यम् ॥

३॰ ११

ननु शूद्रस्य वेदोक्तयज्ञादिष्वधिकाराभावेपि वर्णमात्ररीत्या तस्य विद्यासाधनकर्मण्यसंभवाद्विद्याकामनया शूद्रस्यापि
तेषामनुष्ठानं संभवतीत्याशंक्य तस्य विद्याकामनैव न संभवतीत्याह नशूद्रायेति मतिः शास्त्रार्थज्ञानं विद्यामहिमानि
रतिशयानंदरूपब्रह्मसाक्षात्कारसाधनत्वं शूद्रस्यापि विद्यार्थकर्माधिकारप्रसंगादुत्पन्नदुःखापनिनीरस्याह अन्येत्विति
केचन तु नः सर्ववर्णाधिकारो यस्मिन् तादृशविद्यादिजपे मन्त्रपात्रः श्रीमत्पंचाक्षरमेव मंत्रः राजविद्यास्वादिषु
च आगमिकपौराणिकमंत्रांतरसंग्रहार्थं तथा च ब्रह्मोत्तरखंडे किंतस्य बहुभिर्मंत्रैः किं तीर्थैः किं तपोऽध्वरैः यस्य
नमः शिवायेति मंत्रो हृदयगोचरः मंत्राधिराजराजोयं सर्ववेदांतशेखरः सर्वज्ञाननिधानं च सोयं शैवषडक्षरः
प्रणवेन विना मंत्रः सोयं पंचाक्षरः स्मृतः स्त्रीभिः शूद्रैश्च संकीर्णैर्धार्यते मुक्तिकांक्षिभिरिति पाकयज्ञादीत्यादि

न शूद्राय मतिं दद्यादिति स्मृतेः यद्यपि ततोपि तस्य विद्यामहिमाऽवगत्युपायाऽसंभवेन तदर्थित्वानुपपत्ते
अतस्य विद्यायामनधिकारादिति केचित् अन्ये त्वाहुः शूद्रस्याप्यस्त्येव विद्यार्थकर्माधिकारः तस्य वेदा।
नुवचनाऽग्निहोत्राद्यसंभवेपि कंठोक्तसर्ववर्णाधिकारश्रीपंचाक्षरमंत्रराजविद्यादिजपयागयज्ञयहेतु
तपोदानपाकयज्ञादिसंभवात् वेदानुवचनेन यज्ञेन दानेनेत्यादिष्टकारणविभक्तिश्रुतेर्विद्युरा
दीनां विद्यार्थजपयज्ञादिमात्रानुष्ठानानुमतेश्च वेदानुवचनादिसमुच्चयाऽनपेक्षणात्

यदं द्विजशुश्रूषानामकीर्तनतीर्थस्नानादिसंग्रहार्थं ननु विविदिषावाक्ये शूद्रस्याधारणवर्णधर्माणामनुपल
क्षणेपि यज्ञादीनामेकवाक्योपादानात्तेषां समुच्चयस्यैव विद्यासाधनत्वं भाति यज्ञादिषु समुच्चयपक्षे शूद्रे बाधितत्व
त्कपंतस्य विद्यार्थकर्माधिकार इत्याशंक्य हेत्वसिद्ध्या दूषयति वेदानुवचनेनेति वेदानुवचनेन विविदिषंति
यज्ञेन विविदिषंतीत्यादिरूपेणाप्येकैकसाधनत्वप्रतीतेः न समुच्चयापेक्षा तद्धि वचनं स्यात् हि वेदानुवचनयज्ञ
दानतपोभिर्विविदिषंतीति वाक्यं स्यात् एवं पञ्चकारणविभक्तिश्रवणेपि वेदानुवचनेन च यज्ञेन च दानेन च त
पसा चेति प्रतिपदार्थं चकारः प्रयुक्तो वा क्वस्यात् यदग्नये चेत्यादिवदिति भावः

सि॰ ले॰
त॰
१२

ननु शूद्रस्य विद्यायामर्थित्वलक्षणाधिकारसत्त्वेऽपि तदतिरिक्तस्याधीतवेदत्वादिरूपविशेषणांशस्याभावात्कथं त
स्याधिकारो विद्यायामित्यत आह अविधेयायामिति च यावत् शंकानिरासार्थः तदतिरिक्तेति अर्थित्वातिरिक्तेत्य
र्थः स्वर्गानुभववत् ब्रह्मानंदानुभवरूपायां निर्गुणविद्यायाः फलरूपत्वादविधेयत्वं फलस्याविधेयत्वात्तथा च
यथा स्वर्गानुभवादौ फले तदर्थित्वमात्रमधिकारस्तथा निर्गुणविद्यायामपि तदर्थित्वमात्रमेवाधिकारः स च नि

१२

अविधेयायां च तस्यां तदतिरिक्ताधिकाराप्रसक्त्या तन्निषेधाऽयोगात् न च तस्य वेदांतश्रवणासंभवे
विद्यार्थकर्मानुष्ठानसंभवेऽपि विद्यानुत्पत्तेस्तस्य तदर्थकर्मानुष्ठानं व्यर्थमिति वाच्यं तस्य वेदांतश्रवणाधि
काराभावेऽपि भगवत्पादैः श्रावयेच्चतुरो वर्णानिति चेतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणा
द्वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितमित्यपशूद्राधिकरणोपसंहारभाष्ये ब्रह्मात्मैक्यप
रपुराणादिश्रवणे विद्यासाधनेऽधिकारस्य दर्शितत्वात्

षडुमथावयः विधेयेष्वेवोपासनादिषु शूद्रोक्ताधिकारविशेषणांतरापेक्षा शास्त्रेण निरूपितेति विषमो दृष्टांत
इति भावः असंभव इति अपशूद्राधिकरणन्यायेन तदसंभवे सतीत्यर्थः तस्य वेदांतश्रवणाभावेऽपि ब्रह्मा
त्मैक्यपरपुराणादिश्रवणेऽधिकारस्य भाष्ये दर्शितत्वात् शूद्रस्यापि संभवति विद्योत्पत्तिरित्यर्थः भाष्ये तु
शाब्दावधारणार्थः ॥

उ॰
१२

न चैवमिति शूद्रस्यापि विद्यार्थकर्माधिकारस्वीकारे तदर्थः निर्विषयत्वमिति तदधिकरणस्य शूद्राधिकारनिषेध
परत्वादितिभावः स्यात्तदधिकरणं शूद्राधिकारनिषेधपरं किंतु विद्यार्थकर्माधिकारनिषेधपरं न भवति वेदां
तश्रवणाधिकारनिषेधपरत्वात्तस्येति परिहरति तस्य न शूद्र इत्यादिना वेदांतश्रवणसगुणोपासनेष्वधि
काराभावे हेतुगर्भविशेषणमाह गुरूपसदनाद्येति शूद्रस्य संस्कारशून्यत्वे मानमाह न शूद्र इति पातक
मिति भक्ष्याभक्षणादिकृतमित्यर्थः संस्कारो द्विविधः अध्ययनांगोपनयनलक्षणः विद्यांगोपनयनलक्षण
श्च द्विविधमपि संस्कारं निषेधति न च संस्कारमर्हतीति शिष्यत्वेन स्वीकृत्य समीपे स्थापनरूपं विद्यांगोपनय

न चैवं सत्यपि शूद्राधिकरणस्य निर्विषयत्वं तस्य न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीति स्मृते गुरूप
सदनाद्यविद्यांगोपनयनं संस्कारविधुरस्य शूद्रस्य सगुणविद्यासु निर्गुणविद्यासाधनवेदांतश्रवणा
दिषु चाधिकारनिषेधपरत्वान्निर्गुणविद्यायां शूद्रस्यापि विषयसौंदर्यप्रयुक्तसार्थित्वस्य निषेद्धुमशक्यत्वा
त्

न माचार्यकर्तृकं तच्च शिष्यकर्तृकगुरूपसदनपूर्वकत्वात् गुरूपसदनाद्येमित्युक्तं गुरूपसदनं च तद्विज्ञानार्थं गुरु
मेवाभिगच्छेदित्यादिना विद्यांगत्वेन विहितं तथा तं होपनिन्य इत्यादिश्रुत्या विद्यांगत्वेनोपनयनं च प्रतीयत इतिभावः
तं विद्यार्थिनं गुरुरुपनीतवानित्यर्थः ननु श्रुतसगुणोपासनेष्विव निर्गुणविद्यासाधनवेदांतश्रवणादिष्विव च नि
र्गुणविद्यायामप्यधिकारनिषेधपरमपशूद्राधिकरणं किं न स्यादिति गमकाभावात्तथा च निर्गुणविद्यायामधिकारा
भावे तत्साधनकर्मसु शूद्राधिकारो न सिध्येदित्यत आह निर्गुणविद्यायामिति ब्रह्मविद्यालक्षणस्य विषयसौंदर्य
मुक्तिसाधनत्वेन तद्ज्ञानप्रयुक्तस्य विद्यायामर्थित्वलक्षणाधिकारस्य तदधिकरणन्यायेन निषेद्धुमशक्यत्वादित्यर्थः

सि॰ले॰
तृ॰
२३

कृतमिति न भाष्यविरोधोपि तथा च वेदान्तश्रवणैकसाध्या विद्या तदभावे शूद्रस्य नास्तिश्ये देवेमस्वरसोदाह विद्योमति।
येनयेति मन्त्रार्थत्वमिति सगुणब्रह्मोपासनमिति शेषः विद्यामनर्थामिति शूद्रस्य तदनुष्ठितधर्माणां विद्यानर्थत्वे
भविष्यतीति निश्चयेन तदनुष्ठानसंभवादित्यर्थः तस्मादिति शूद्रस्य विद्यार्थकर्मानुष्ठाने बाधकाभावादित्यर्थः
विद्याधिकारिमात्रेति ननु ब्राह्मणपदस्य ब्राह्मणमात्रपरत्वं न त्रैवर्णिकमात्रपरत्वमिति तिमात्रमाहार्थः ब्राह्मण
पदस्य द्विजोपलक्षणत्वे वार्त्तिकवचनेमो हेतुरुक्तः त्रयाणामानमेवाध्ययनसाधनकर्मस्वधिकाराविशेषादिति तस्य
हेतोः शूद्रसाधारणत्वादिति भावः किंद्वारेति किमदृष्टद्वारा विद्योपयोगः किं वा दृष्टद्वारा नाद्यः विद्योत्पत्तिप्र
तिबंधकदुरितस्य यज्ञाद्यनुष्ठानजनितापूर्वेणैव निवर्तितत्वेन संन्यासजनितापूर्वनिवर्त्यदुरिताभावेन संन्यास

ननु यज्ञादिकर्मणां चित्तशुद्धिद्वारा विद्योपयोगः संन्यासस्य किंद्वारा तदुपयोगः केचिदाहुः विद्योत्पत्तिप्रति
बंधकदुरितानामनंतत्वात् किंचिद्यज्ञाद्यनुष्ठाननिवर्त्यं किंचित्संन्यासापूर्वनिवर्त्यमिति कर्मवच्चित्तशु
द्धिद्वारैव संन्यासस्यापि तदुपयोगः तथा च गृहस्थादीनां कर्मच्छिद्रेषु श्रवणे प्रवृत्तिष्ठतां न तस्मिन् जन्मनि
विद्यावाप्तिः किंतु जन्मान्तरे संन्यासं लब्ध्वैव येषां तु गृहस्थानामेव सतां जनकादीनां विद्योदयस्तेषां
पूर्वजन्मनि संन्यासाद्विद्यावाप्तिः अतो न विद्यायाः संन्यासापूर्वव्यभिचारशंकापीति॥

वैयर्थ्यप्रसंगात् न द्वितीयः तदनुपलंभादित्याद्येपाभिप्रायः तत्राद्यपक्षं समर्थयन्ते केचिदाहुरिति ननु संन्यास
पूर्वस्य न विद्योदयहेतुत्वं असंन्यासिनामपि केषांचिद्विद्योद्देशेन श्रवणाद्यनुष्ठानदर्शनात् केषांचित्संन्यासं विने
व विद्योदयस्य प्रमाणसिद्धत्वाच्चेत्यत आह तथा चेति संन्यासस्य विद्यां प्रति दृष्टद्वारानुपलंभेनादृष्टद्वारैव वि
द्यावाप्तिहेतुत्वे संन्यासविधिना सिद्धमितीत्यर्थः न च दृष्टद्वारानुपलंभो ऽप्रसिद्धः लौकिकवैदिकव्यापारविक्षिप्तचि
त्तस्य विद्योदयासंभवेन सर्वकर्मसंन्यासस्य विक्षेपनिवृत्तिरूपदृष्टद्वारा विद्याहेतुत्वसंभवादिति वाच्यं लौकिकवै
दिककर्मवतामपि केषांचित्पुरुषधौरेयाणां दैन्यहर्षक्रोधभयादिलक्षणविक्षेपनिवृत्तेरनुभवसिद्धत्वेन

तृ॰
२३

श्रावयेच्चतुरो वर्णानिति वचनेन शूद्रस्य पुराणादिश्रवणाभ्यनुज्ञानेऽपि मननिदिध्यासनयोरभ्यनुज्ञानाभावात् म
ननाद्यनुष्ठानं तस्य सिध्यति न च मननादेः श्रवणाङ्गत्वात् न पृथगभ्यनुज्ञानापेक्षेति वाच्यं प्रयाजदर्शपूर्णमा।
सादेरिव प्रकृते शेषशेषिभावबोधकप्रमाणाभावेन श्रवणादित्रयाणां मिथोभावव्यवहारस्य गौणत्वात् यच्च शूद्रस्ये
तिहासपुराणादिभाषाश्रवणेऽधिकृतेऽपि विद्याया दर्शनासंभवात् विद्यार्थकर्मानुष्ठानवैयर्थ्यं तदवस्थमेवेत्यस्मादाह वि।
द्योत्पत्तियोग्यत्वेति यद्वा इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति वचनादितिहासादिगतब्रह्मात्मैक्यपरभाग
स्य वेदान्तश्रवणजन्यज्ञानितवेदान्तार्थज्ञानोपकारकत्वमात्रमेव न तु वेदान्तश्रवणमनपेक्ष्य स्वातन्त्र्येण ब्रह्मात्मैक्य
ज्ञानजनकत्वमिति निश्चीयते तथा सत्येव तद्वचनं पूर्वार्धसंगतं स्यात् इति बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति अप

विद्योत्पत्तियोग्यविमलदेवशरीरनिष्पादनद्वारामुत्रापवर्गं भविष्यतीति त्रैवर्णिककाम्यकर्ममुक्तिफलकस
गुणविद्यार्थकर्मानुष्ठानवत् वेदान्तश्रवणयोग्यत्रैवर्णिकशरीरनिष्पादनद्वारा विद्योत्पत्त्यपवर्गं भविष्य
तीति शूद्रस्य विद्यार्थकर्मानुष्ठानाविरोधाच्च तस्माद्धि विद्विषाकाले ब्राह्मणपदस्य पापाज्ञा न विद्याधि
कारिमात्रोपलक्षणत्वेन शूद्रस्यापि विद्यार्थकर्माधिकारः सिद्ध इत्यमेवेति

मर्थः अल्पं वेदमात्रं श्रुतं विचारितं येन पुरुषेण सोऽल्पश्रुतः तस्मात्तु रूपान्तरेण श्रुतो वेदो बिभेतीक थं बिभेति ।
मामिति अयमल्पश्रुतः पुरुषो मां श्रुतं वेदं प्रतरेत् महिचारनृपापी मीमांसान्यायाभासत्वादिशंकया मामयथा
र्थतया परं संभावयेत् इति शङ्को हेत्वर्थः एवं च तादृशसंभावाहेतोः इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् इ
तिहासपुराणवचनैर्मीमांसानुसारिभिः तत्र संदेहस्थापत्तनिश्चयं सम्पादयन् द्वारा मीमांसानिर्णीतार्थं एवमपि वेदस्योप
बृंहितमिति तथा शूद्रस्य वेदान्तश्रवणरहितस्य वेदान्तार्थोपबृंहणरूपब्रह्मात्मैक्यपरेतिहासादिश्रवणेऽप्रवृत्तावपि ।
नास्ति विद्योदयः श्रावयेच्चतुरो वर्णानिति वचनमपि शूद्रस्य स्वर्गहेतुपरं पुराणादिश्रवणं योऽग्रहद्युपर्थमभ्यनुज्ञा
नं अपशूद्राधिकरणभाष्यमपि शूद्रस्येतिहासपुराणश्रवणे द्विवर्णानं विभेत्यल्पश्रुतादिति वचनं नास्तीति ज्ञात्वा।

मैसि-ले-
तृ-
२५

संन्यासापूर्वस्याधिकारिविशेषणत्वेहेतुंतंतरमाह सहकार्यंतरेत्यादिनाश्रुतिपादनादिमंतेनसहकार्यंतरस्यविद्यांप्रति
साधनंतरस्यमौनस्यविधिरपूर्वनियतिश्रुतिसूत्रभाष्यार्थः सोत्रपदंतद्वतइतितस्यव्याख्यानं विद्यावतइति श्र
वणाद्यनुष्ठानोपयोग्यापातज्ञानवतइत्यर्थः तद्वतः सहकार्यंतरविधिरितिसूत्रेसंन्यासिनइत्यनुक्तत्वात्क
थंसंन्यासिनइतिलभ्यतेतत्राह तस्मादिति तस्मादित्यपिश्रुतिपदमेवयस्मादतीताःब्राह्मणाःआपातंतोब्र
ह्मात्मानंविदित्वातत्साक्षात्कारार्थंव्युत्थानशब्दितंसंन्यासंकृतवंतः तस्मादिदानीतनोपि ब्राह्मणोप्यस्त्वः

सहकार्यंतरविधिरितिसूत्रभाष्येतद्वतोविद्यावतः संन्यासिनोबाल्यपांडित्यापेक्षयातृतीयमिदंमौ
नंविधीयतेतस्माद्ब्राह्मणःपांडित्यमित्यादिश्रुतौततःप्राक्शुभित्वाचर्यंचरंतीतिसंन्यासाधिकारादितिश्र
तिपादनात् सत्ताशेषकृतियस्यैवसंसारंप्रतिहासतः जिज्ञासोरेवचैकात्म्यंविश्यंतेप्यधिकारितेति
वार्त्तिकोक्तेश्चसंन्यासापूर्वस्यविद्यासाधनवेदांतश्रवणाद्यधिकारिविशेषणत्वमितितस्यविद्योपयोगमा
ह-

14

संन्यस्यपांडित्यादिकंतत्साक्षात्कारार्थमनुतिष्ठेदितिश्रुत्यर्थः पांडित्यंश्रवणंमौनंध्यानंततइतितस्माद्ब्राह्मण
श्रुतिवाक्यात्पूर्वमित्यर्थः संन्यासापूर्वस्याधिकारिविशेषणत्वेवार्त्तिकसंमतिरूपहेतुंतरमाह सत्तेति वार्त्तिके
प्यमविशेषणंसंन्यासपरंततश्चसंन्याससमुमुक्षाजिज्ञासानांसमुच्चयार्थंचकारेमुमुक्षात्वादेरिवसंन्यासस्या
पिवेदांतश्रवणादिष्वधिकारिविशेषणत्वंभातीतिभावः संन्यासापूर्वस्येति संन्यासस्यत्यागलक्षणक्रिया
रूपत्वात्स्वरूपेणानुष्ठानयोगादपूर्वपर्यंतधावनमितिबोध्यं॥

ड-
२५

संन्यासस्याहष्टद्वारकत्वपक्षमेवावलंब्य संन्यासापूर्वं श्रवणाद्यधिकारिविशेषणत्वेन विद्योपयोगं सप्रमाण
माह अन्येत्विति शांतउक्तितितिक्षुः समाहितः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिशेषः शमः अंतरिं
द्रियनिग्रहः दमो बाह्येंद्रियनिग्रहः उपरतिर्नित्यकर्मत्यागः ननु शांतदांतपदाभ्यामेव कर्ममात्रस्य वारितत्वाउ
परतिश्रुतिर्व्यर्थेति चेन्न शमदमविधिशास्त्रस्यसत्वाज्ञ एनित्यकर्मविधिना विशेषशास्त्रेण नित्यनैमित्तककर्मव्य।
तिरिक्तवासांतःकरणव्यापारनिवृत्तिमात्रपरतया संकोचे सति नित्यकर्मत्यागालाभात् पुनरुपरतिश्रुत्यानि

अन्येत्विति शांतोदांत उपरत इत्यादिश्रुतौ उपरतपदात् गृहीतस्य संन्यासस्य साधनचतुष्टयांतर्गतत्वात्॥

त्यकर्मत्यागो बोध्यत इति न तत्पौनरुक्त्यमिति तितिक्षुः शीतोष्णादिद्वंद्वसहिष्णुः समाहितः श्रवणाद्यपेक्षितचित्तसमाधा
नवान् श्रद्धा गुरुवेदांतवाक्येषु विश्वासः श्रद्धावित्तो भूत्वेत्यस्य पदस्यैकमन्वयः आत्मन्येव कार्यकारणसंघातप्र
वेसंघातसाक्षिणमात्मानमहं ब्रह्मास्मीति पश्येदिति श्रुत्यर्थः साधनचतुष्टयेति नित्यानित्यवस्तुविवेकः ऐहि
कामुष्मिकभोगविरागः शमादिषट्कं मुमुक्षुत्वं चेति साधनचतुष्टयं तच्छ्रवणाद्यधिकारिविशेषणमिति भाव

श्रवणेत्यपमहदिति भावः

सि-ले-
तः
२५

वणार्थं गतमेव विद्याफलकत्वं न तत्र दृष्टद्वारेति सिद्धमित्यभिसन्धायाव्योनेऽनन्यकार्यापात्वत्तयेत्यस्य विक्षेपनिवृ
त्तिद्वारेणार्थो विवक्षितः तस्येति संन्यासस्येत्यर्थः ननु संन्यासस्य विक्षेपनिवृत्तिद्वारा श्रवणाद्यंगभावमापन्न
स्य विद्यासाधनत्वमुक्तमनुपपन्नं संन्यासं विनापि विक्षेपनिवृत्तेः केषुचित् श्रवणाधिकारिषु संभवादिति
शंकते यद्यपीति अनलसस्येति सत्वगुणप्रधानस्येति यावत् धीमत इति विषयेषु दोषदर्शनशीलस्येति वि
षयेभ्यः सकाशादिन्द्रियाणां निग्रहे समर्थस्येत्यर्थः एतैर्विशेषणैर्विक्षेपहेतूनामभावसूचनात् विक्षेप
निवृत्तिरुक्ता संन्यासफलस्य विक्षेपाभावस्य संन्यासादिव संन्यासादन्यतोपि प्राप्तौ संन्यासस्य विधिस्सिन
स्य श्रवणाद्यपेक्षितविक्षेपनिवृत्तिप्रतिपत्तेः प्राप्तिः पक्षे चाप्राप्तिरिति लभ्यते तथा च भूतसंन्यासाश्र

साश्रमपरिग्रहेणैव श्रवणादिनिर्वर्तनीयमिति नियमोऽभ्युपेय इति नन्वस्मिन्पक्षद्वये क्षत्रियवैश्य
योः कथं वेदान्तश्रवणानुष्ठानं संन्यासस्य ब्राह्मणाधिकारित्वात् ब्राह्मणो निर्वेदमायात् ब्राह्म।
णो व्युत्थाय ब्राह्मणः व्रजेदिति संन्यासविधिषु ब्राह्मणग्रहणात् अधिकारिविशेषस्तानाय ब्रा
ह्मणग्रहः न संन्यासविधिर्यस्मात् स्मृतौ क्षत्रियवैश्ययोरिति वार्त्तिकोक्तेश्चेति चेत्

15

म विधिरपूर्वविधिः नियमविधिस्तु भवेदेवेति समाधत्ते तदेति परिग्रहेणैवेति विक्षेपनिवृत्तिद्वारेति शे
षः नन्वस्मिन्पक्षद्वय इति संन्यासस्याभावे हेतुमाह अधिकारिविशेषणत्वपक्षे श्रवणाङ्गत्वपक्षे चेत्यर्थः क
थमिति संन्यासाभावादिति भावः तयोः संन्यासाभावे हेतुमाह संन्यासस्येति ब्राह्मणस्यैव संन्यासाधिकारे मा
नमाह ब्राह्मण इति निर्वेदं वैराग्यं तत्पूर्वकसंन्यासं कुर्यादित्यर्थः निर्वेदशब्दितवैराग्यस्य संन्यासप्रतिसा
मग्रीत्वेन तस्मिन् सति संन्यासस्यावश्यकत्वात् संन्यासविधिरेवायमिति भावः व्युत्थायेति संन्यस्येत्यर्थः
मस्मात्कुत्राधिकारिविशेषस्तानाय ब्राह्मणग्रहः तस्मात् क्षत्रियवैश्ययोः संन्यासविधिर्नास्तीति वार्त्तिक

२५

संन्यासस्य दृष्टद्वारा विद्योपयोग इति द्वितीयपक्षं समर्थयते अपरे त्विति ननु संन्यासस्य विद्यांगत्वबोधकश्रुत्यादि
वत् श्रवणस्यांगत्वबोधकप्रमाणाभावाद्विवरणोक्तिरयुक्तेत्याशंक्य तत्तात्पर्यमाह अनन्यव्यापारत्वेति
कादाचित्कं श्रवणादिकं विद्योदयद्वारा नामृतत्वसाधनं किं तु सार्वकालिकं ब्रह्मसंस्थोऽमृतत्वमेतीत्यासुप्तेरा ।
मृतेः कालं नयेद्वेदान्तचिंतयेत्यादिश्रुतिस्मृतिशतेभ्यः तथा चानन्यव्यापारतया श्रवणाद्यनुष्ठानं विदधता
शास्त्रेण संन्यासोऽपेक्ष्यते गृहस्थादेः स्वाश्रमविहितकर्मव्यग्रस्य सदा श्रवणाद्यनुष्ठानासंभवात् तथा वि
द्यासाधनत्वेन संन्यासं विदधतापि शास्त्रेण द्वारतया निरंतरश्रवणाद्यनुष्ठानमपेक्ष्यते संन्यासस्य साक्षा
द्विद्यासाधनत्वाभावात् दृष्टद्वारसंभवे अदृष्टद्वारकल्पनानुपपत्तेश्च तत्रापि श्रवणादिकं तत्वव्यंजकत्वा

अपरे त्वश्रवणांगत्वं तयात्मज्ञानफलत्वात् संन्यासस्य सिद्धमिति विवरणोक्तेरनन्यव्यापारतया श्रवणादि
निष्पादनं कुर्वतस्तस्य विद्यायामुपयोगः दृष्टद्वारसंभवे न अदृष्टकल्पनायोगात् यदि त्वनलसधी
मतः पुरुषधौरेयस्याश्रमांतरस्थस्यापि कर्मच्छिद्रेषु श्रवणादि संपद्यते तदा चतुर्थाश्रमेषु संन्या

दर्पतः प्रधानं भवति संन्यासस्योक्तहेत्वभावाद्गुणीभूततयावतिष्ठते एवं श्रवणादिविधौ संन्यासविधेश्च
परस्परापेक्षाबलादेकवाक्यभावमापन्नाभ्यां विधिभ्यां संन्यासांगकं मनननिदिध्यासनसहितं श्रवणं विधी
यत इति सिद्धं संन्यासस्य श्रवणांगत्वं तयात्मज्ञानफलकत्वमिति भावः यद्वा विवरणोक्तेरयमभावः श्रवण
विधिस्तावत् श्रवणसाधनतया विक्षेपनिवृत्तिं तद्धेतुं संन्यासं चापेक्षते विक्षिप्तस्य चेतसः श्रवणाद्यनुष्ठानेष्व
वृत्त्यसंभवात् गृहस्थादेश्च स्वाश्रमकर्मकरणकालातिरिक्तकालेऽपि वृद्ध्यादिव्ययतया विक्षेपावश्यंभावा
त् संन्यासविधेरपि विक्षेपनिवृत्तिरूपदृष्टद्वारा श्रवणादिकं घटयित्वा विद्यां संपादयतः संन्यासस्य विधाने
न चारितार्थ्यसंभवे अदृष्टद्वारा विद्यासाधनसंन्यासविधाय्यकत्वासंभवात् तथा च पूर्ववत् संन्यासस्य श्र

सि॰ ले॰ त॰ २६

एवं संन्यासविधीनामेकवाक्यत्वे स्थिते सति ब्राह्मणः क्षत्रियो वा वैश्यो वेति स्मृतिवचनं जाबालश्रुतिलाभयोत्तानमूलत्वादप्र
माणमित्याह विरोधाधिकरणन्यायेनेति श्रुत्यर्थविरुद्धस्मृतिवचनमप्रमाणमिति विरोधाधिकरणन्या
यः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिश्रुतौ संन्यासाधिकारानुरोधेन ब्राह्मणः संन्यस्य पाण्डित्यादिकमनुतिष्ठे
दिति वाक्यार्थलाभात् विद्यार्थसंन्यासे विविदिषुणा क्रियमाणे ब्राह्मणस्यैवाधिकार इति भगवतो भाष्यकारस्य
मतं यद्यपि वार्त्तिकवचनस्य प्रमाणमूलभाष्यकारमतविरुद्धार्थतात्पर्यकल्पने तत्तदा संन्यासस्य साधारण्यप्रतिपाद
कस्मृतिवचनवद्वार्त्तिकवचनमपि हेयमेव स्यात् अतो भाष्याविरुद्धार्थपरं वार्त्तिकवचनमित्याह तद्विद्वत्संन्या

विरोधाधिकरणन्यायेन श्रुत्यविरुद्धस्यैव स्मृत्यर्थस्य ग्राह्यत्वात् यत्तु संन्यासस्य सर्वाधिकारत्वे वार्त्ति
कवचनं तद्विद्वत्संन्यासविषयं न त्वातुरविविदिषासंन्यासे भाष्याभिप्रायविरुद्धसर्वाधिकारप्रतिपादन
परं सर्वाधिकारविद्धेदिविज्ञानं चेदुपपद्यते कुतोऽधिकारनियमो व्युत्थाने क्रियते बलादित्यनंतरश्लोके
न ब्रह्मज्ञानोदयानंतरं जीवन्मुक्तेन क्रियमाणो विद्वत्संन्यास एवाधिकारनियमनिराकरणात् एवं च
ब्राह्मणानामेव श्रवणाद्यनुष्ठाने संन्यासोंगं क्षत्रियवैश्ययोस्तु निरपेक्षः श्रवणाद्यधिकार इति तयोः
श्रवणाद्यनुष्ठाननिर्वाहः

26

सविषयमिति विविदिषासंन्यासे सर्वाधिकारप्रतिपादनपरं न संभवतीत्यत्र हेत्वंतरमाह सर्वाधिकारेति
क्षत्रियवैश्ययोस्तत्त्वज्ञानमप्युपेयते न वा नाद्यः जनकादीनां तत्त्वज्ञानवत्त्वप्रतिपादकशास्त्रविरोधान्नान्त्यः
तत्त्वज्ञानेन कर्माधिकारप्रयोजकवर्णाश्रमाद्यध्यासनिवृत्तौ सकलकर्मनिवृत्तिरूपविद्वत्संन्यासस्य क्षत्रि
यवैश्ययोरपि वारयितुमशक्यत्वात् विविदिषासंन्यास इव विद्वत्संन्यासेपि ब्राह्मणस्यैवाधिकार इति नियमा
संभवादिति भावः कुतो बलान्नियमः क्रियते ताह्यावलंबनाल्लीमर्थः एवं चेति श्रवणांगत्वेनाधिकारि
विशेषणत्वेन वा विद्यासाधने विविदिषासंन्यासे ब्राह्मणस्यैवाधिकार इति सिद्धमित्यर्थः

उ॰ २६

अथवेचिदिति तयोः श्रवणाद्यनुष्ठानसिद्धिं समर्थयत इति संबंधः ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्र
जेदिति पूर्वं श्रुतौ चतुर्णामप्याश्रमाणां समुच्चयं प्रतिपाद्य तेषां विकल्पं दर्शयति यदि वेतरथेति यदि वे
त्यस्य ब्रह्मचर्याश्रम एव वैराग्यमुत्पन्नं चेदित्यर्थः तत्र तदनुत्पन्नावाह गृहाद्वेति गृहाश्रमेऽपि तदनुत्पन्नावा
ह वनाद्वेति अविशेषेति ब्राह्मणादिविशेषग्रहरहितेत्यर्थः अत एवेति वर्णत्रयसाधारणत्वात् संन्यास।
स्य श्रुतिस्मृतिसिद्धत्वादेवेत्यर्थः यदा यद्दिवेति श्रुतौ श्रूयते तदा उपलक्षणं वैराग्यस्येति संबंधः अन्येत्विति

अथवेचिद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेत्यविशेषश्रुत्या ब्राह्मणः क्षत्रियो वापि वै
श्यो वा प्रव्रजेद्गृहात् त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति स्मृतेश्च गृहीतया क्षत्रियवैश्ययो
रपि संन्यासाधिकारः सिद्धः श्रुत्यन्तरे तु ब्राह्मणग्रहणं अत एव वार्तिकेऽप्यधिकारविशेषस्योक्ते
केन भाष्याभिप्रायमनुक्त्वा त्रयाणामविशेषेण संन्यासः श्रूयते श्रुतौ यदा उपलक्षणार्थं सा ब्राह्मणग्र
हणं तदेतदन्तरश्लोकेन स्वमते क्षत्रियवैश्ययोरपि संन्यासाधिकारो दर्शित इति तयोः श्रवणाद्यनु
ष्ठानसिद्धिं समर्थयते अन्ये त्वनेकेषु संन्यासविधिवाक्येषु ब्राह्मणग्रहणादुदाहृतजाबालश्रुतौ सं
न्यासविधिवाक्ये ब्राह्मणग्रहणाभावेऽपि श्रुत्यन्तरसिद्धं ब्राह्मणाधिकारमेव सिद्धं कृत्वा संन्यासा
वस्थायामयज्ञोपवीती कथं ब्राह्मण इति ब्राह्मणपरामर्शाच्च ब्राह्मणस्यैव संन्यासाधिकारः

भाष्यानुवार्तिकेनेत्यर्थः श्रुत्यन्तरसिद्धमिति ब्राह्मणो व्युत्थायेत्यादिश्रुत्यन्तरसिद्धमित्यर्थः सिद्धं कृत्वेति वि
धेयोद्देशेन संन्यासविधिवाक्यानां सर्वेषामेकवाक्यत्वादिति भावः कथमिति तानवयज्ञोपवीतादेर्ब्राह्मणत्व
व्यञ्जकत्वात् परमहंससंन्यासे च तदभावादित्यर्थः यद्यत्र क्षत्रियवैश्ययोरपि संन्यासोऽभिमतः स्यात्त
दा कथं ब्राह्मण इति वत्कथं क्षत्रियः कथं वैश्य इत्यपि पृच्छेत न तु पृच्छ्यते तेन ब्राह्मणस्यैव संन्यासः श्रुत्यभिमत

उ०ना०

सि॰ टी॰ नृ॰ १२

ने नैव जीवतीत्यादि वचनसंग्रहार्थमादिपदं मननं तत्त्वचिंतनं तद्रहितो जीवन्नेव मृत इत्यर्थः अयं च मुख्योधिकारः संन्या
सिनामेवेत्याह यावेति वैषम्याद्यक्तितत्वादित्यर्थः सार्वकालिकी वित्तेषु निवृत्तिः संन्यासिनां न भवतीति भावः न
मुख्योस्तीति यावत्तो योधिकारो नास्तीत्यर्थः अयं भावः ब्रह्मसंस्थोमृतत्वमेतीति श्रुत्या यावदित्याश्रममेव ब्रह्मनिष्ठाधर्मकः
संन्यासाश्रमो विधीयते ब्रह्मसंस्थाशब्दिताया ब्रह्मनिष्ठायाः संन्यासाश्रमे संभवादाश्रमान्तरे त्वसंभवादिति प्रतिपादि
तं संन्यासाधिकरणभाष्यादौ तथा च ब्रह्मनिष्ठत्वस्य संन्यासाश्रमधर्मत्वेन विहितत्वात् संन्यासिनो ब्राह्मणस्य ब्रह्मनि।
ष्ठत्वं स्वधर्म इति संन्यासिनः तत्र मुख्योधिकारः तस्य ब्रह्मनिष्ठत्वव्यतिक्रमे प्रत्यवायावगमाच्च तथा परमहंसोप।
निषदि स्मृ यत्र काष्ठदंडो धृतो येन सर्वाशी ज्ञानवर्जितः स याति नरकान् घोरान् महारौरवसंज्ञिकानिति काष्ठदंडोप
लक्षितः संन्यासाश्रमो येन परिगृहीतो येन सः सर्वाशी सर्वविषयजातमश्नाति भोक्तुं शीलमस्यास्तीति सर्वाशी वासी
नः करणजयरहित इति यावत् ज्ञानवर्जितः ज्ञानाभ्यासरहित इत्यर्थः यः संन्यस्य शमादिसहितं ब्रह्मनिष्ठत्वं।

या च ब्रह्मणि संस्था विना यमाश्रमांतरस्यास्य न संभवति स्वस्वाश्रमविहितकर्मानुष्ठान
वैषम्यादिति संन्यासरहितयोः त्रिषु वेषयोर्न मुख्यः श्रवणाधिकारः

नानुतिष्ठति सतीर्थांउर्यतीति यावदित्यर्थः यथा संन्यासिनो ज्ञाननिष्ठाविधायकानि संन्यस्य श्रवणं कुर्यात् ग
हस्थस्तितो वापि श्रद्धायुक्तेन मन्यते कालमित्यादीनि स्मृतिवचनानि सहस्रशः सन्ति तथा तमवि मार्गेपाति सर्वोप
कान्यपि स्मृतिवचनानि सहस्रशः सन्ति यदा पर्विवेकाय संन्यासः सर्वकर्मणां श्रुत्या विधीयते यस्मान्नमार्गोपाति
तो भवेत् नित्यं कर्म परित्यज्य वेदान्तश्रवणं विना वर्तमानस्तु संन्यासी पतत्येव न संशय इत्यादीनि सर्वाश्रमसाधार
णेनापि स्वधर्मस्य विगुणस्यापि परित्यागो महाननर्थः स्मर्यते श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्व
धर्मे निधनं श्रेयः परधर्मो भयावह इत्यादौ संन्यासाधिकरणभाष्यकारैरेव तत्सर्वमभिप्रेत्य संन्यासिनोन
न्यव्यापारतया श्रवणादिनिष्पादनमकुर्वतः यातिसंकटे तत्र एवोक्तं तथा च भाष्यं ब्रह्मनिष्ठत्वमेव हि तस्य प्राधान्य
पर्षेहितं स्वाश्रमविहितं कर्म यज्ञादीनीतरेषां तद्व्यतिक्रमे च तस्य प्रत्यवायः यदि ज्ञानस्य तु श्रवणादेर्भिन्नं प्रतिविहि
तत्वात् तदतिक्रमेभिन्नैः प्रत्यवायावगमाच्च संन्यासिनः श्रवणादौ मुख्योधिकारः संन्यासरहितानां प्रति

27

उ॰ १२

ननु संन्यासस्याधिकारिविशेषणतयाऽङ्गतया वा श्रवणापेक्षितत्वपक्षे श्रवणमात्रस्य संन्यासापेक्षत्वावगमात् क्ष-
त्रियवैश्ययोर्विविदिषासंन्यासरहितयोः श्रवणानुष्ठानं नास्त्येवेत्यर्थः पर्यवसितं तेन तयोः श्रवणं संन्यासनिरपेक्षमि-
ति तथा च कथं तयोः श्रवणाद्यनुष्ठाननिर्वाहः तत्राह नहीति देवभावं वा प्रमुमेति नच सगुणोपासकस्य ब्रह्मलोकं
गतस्य उपासनया देवभावं प्राप्तस्य निर्गुणसाक्षात्कारायोपास्यकेन किं प्रमाणे श्रवणादौ संन्यासस्य व्यभिचार इत
युक्तं तस्य सगुणविद्यासामर्थ्याद्देवनिर्गुणसाक्षात्कारसंभवेन श्रवणाद्यनुष्ठानस्याभावादिति वाच्यं देवताधिकरणे
सगुणविद्यया देवभावं प्राप्तस्य उपासकस्यैव प्राधान्येन विषयीकृत्य श्रवणादौ देवानामधिकारस्य निरूपितत्वेन तस्या-
पि श्रवणाद्यनुष्ठानं विना विद्यानुदयस्य प्रागेव श्रवणविधिविचारावसरे दर्शितत्वात् तथा च तत्र व्यभिचारात् संन्यासो
न श्रवणमात्राङ्गं किंतु ब्राह्मणकर्तृकश्रवणस्यैवाङ्गमिति क्षत्रियवैश्ययोः संन्यासाभावेपि श्रवणाद्यनुष्ठाननिर्वा-

नहि संन्यासस्य श्रवणापेक्षितत्वं श्रवणमात्रस्य तदपेक्षानियतं तु शक्यते कर्ममुक्तिफलकसगुणोपासनया

मू

देवभावं प्राप्तस्य श्रवणादौ संन्यासनैरपेक्ष्यस्यानुपपन्नत्वात् देवानां कर्मानुष्ठानाप्रसक्त्या त्यागरूपस्य
संन्यासस्याप्रसक्तेरभावादित्याह अपरेत्वब्रह्मसंस्थोऽमृतत्वमेतीति श्रुत्युदिताया ब्रह्मणि संस्थायाः संन्यासमात्रनिष्ठत्वेनान्यव्याव-
र्त्यन्तन्निष्ठत्वेन तस्य श्रवणादिष्वनुप्रवेशोऽधिकारः गार्हस्थ्ये तु लिङ्गत्वं वा पितृत्वात् ततः स्वपक्षे प्रत्यवानविचारपरं चेतो
यस्यासौ मृतत्वं उच्यते आह तेरामूले कालेन समेहे हंतवितर्पत्यादिस्मृतिषु सर्वदा विचारविधानात्

ह इत्यर्थः ननु देवानामपि ऊतः संन्यासाभावे तत्राह देवानामिति ननु देवकर्तृकश्रवणे संन्यासाश्रमस्याप्रसक्तिव्य-
भिचारः तर्हि त्रैवर्णिकमनुष्यकर्तृकश्रवणे संन्यासाश्रमस्याहेतुत्वमस्तु न तु ब्राह्मणमात्रकर्तृके तथा सङ्कोच इमा-
नाभावात् उक्तं हि प्रागेव चतुर्थाश्रमेषु संन्यासाश्रमपरिग्रहेण वश्रवणादिनिर्वर्तनीयमिति सर्वाश्रमविभागोव-
र्णत्रयस्साधारण एव न तु ब्राह्मणमात्रगतः तथा च संन्यासिनो ब्राह्मणस्येव संन्यासहीनयोः क्षत्रियवैश्ययोः श्रव-
णादौ नाधिकारः संभवतीति स्वरसादाह अपरे त्विति श्रुत्युदिता ब्रह्मणि संस्था यस्य संभवति तस्य तुर्याधि-
कार इति संबंधः संस्थापदस्य व्याख्यानं समाप्तिरित्यपि व्याख्यानं नमन्येतिश्रुतमन्त्रकाम्यस्यैर्वर्तणीत्विचा-
रकर्तव्यतायां स्मृतिवचनान्युदाहरति गाहंतरति स्वपतइति विद्यापानसमर्थः सज्जीवति मनो यस्य मन

सि॰ ले॰
न॰
२८

ननु क्षत्रियवैश्ययोर्विधुरादीनामिवामुख्याधिकारस्य प्रसक्तेर्दृष्टान्तासंप्रतिपत्तेरित्यत आह नहीति वक्तुं हि न शक्य ।
शक्यत इति संबंधः यद्यपि संन्यासिन एव मुख्याधिकार इति पूर्वं प्रतिपादितत्वेन विधुरादीनां संन्यासाभावादेव गौ
णोऽधिकारः सिद्धस्तथापि तेषां गौणोऽधिकारे सूत्रसंगृहीतामप्युपपत्तिमाह अनात्वितरदिति अतः अनाश्रमि
भिरनुष्ठितविद्यासाधनापेक्षया उत्तरदाश्रमिभिरनुष्ठितं विद्यासाधनं कर्म श्रवणादिकं वा ज्यायः प्रशस्तं विद्या
साधनं ज्यायस्त्वावधारणार्थस्तुशब्दः श्रुतिलिंगात् स्मृतिलिंगाच्च तेनैति ब्रह्मवित् पुण्यकृदिति वाक्यं श्रुति ।
लिंगं अनाश्रमी न तिष्ठेत् क्षणमेकमपि द्विजः इत्यादिवाक्यं स्मृतिलिंगं तेन पुण्यलक्षणेन ब्रह्मवेदनेन ब्रह्म

न संतरा चापि तु तद्दृष्टेरित्यधिकरणे विधुरादीनामनाश्रमिणामंगीकृतः श्रवणाद्यधिकारो मुख्य
इति वक्तुं शक्यते अत इतरज्ज्यायो लिंगाच्चेति सूत्रकारेणैव तेषाममुख्याधिकारस्य स्वीकरणात् न
च तत्र तेषां श्रवणाधिकार एव नोक्तः किं तु तदीयकर्मणां विद्यानुग्राहकत्वमित्याशंक्य दृष्टार्थाच
विद्येत्युदाहृततदधिकरणभाष्यविरोधात्

18

एति ब्रह्म प्राप्नोतीति श्रुत्यर्थः अत्र श्रुतौ
पुण्यत्वेन प्रसिद्धानामाश्रमधर्माणामेव विशिष्य ब्रह्मप्राप्तिसाधनत्वप्रतिपादनादनाश्रमिधर्माणां विशेषा
त्वग्रहश्चेति सूत्रोक्तन्यायेन विद्योपयोगिनामपि निकर्षो भाति स च निकर्षो विधुरादीनां विद्यार्थकर्मसु श्र
वणादिषु च मुख्याधिकाराभावप्रयुक्त एवेति वक्तुं शक्यं हेत्वन्तराभावादनाश्रमित्वस्य निंदितत्वाच्च न हि कर्मज्ञा
नयोर्मुख्योऽधिकारी निंद्यो हि इति सूत्रभाष्यकारयोरभिप्रायः इत्यर्थः ननु विधुराधिकरणे विधुराद्यनुष्ठितं
कर्म विद्यासाधनमित्येतावदेवोक्तं न तु विधुरादेः श्रवणाधिकारोऽपि तत्र प्रतिपादितः तथा च श्रवणादौ
विधुराद्यधिकारस्य गौणमुख्यत्वचिंता निरालंबनेत्याशंक्य परिहरति न च तत्रेति विधुराधिकरणे

उ॰
२८

ननु स्त्रियादिकं प्रति श्रवणादिविधानाभावे सत्यधिकार एव नास्तीति कुतो नोच्यत इत्याशंक्यते किं त्विति नित्या
धिकाररूपमुख्याधिकारासंभवेऽपि काम्याधिकाररूपयोग्यताधिकारसंभवात्त्रैवमिति भाष्ययोजनामाह दृष्टा।
योचेति किं त्वमुख्याधिकारमात्रेण श्रवणाद्यनुमतिरिति संबन्धः यथा भुजिक्रियायां दण्डाद्यभावे निवृत्तिरूपदृष्ट
फला तथा विद्यायामपि सर्वाननर्थमूलाविद्यानिवृत्तिरूपदृष्टफला श्रुतिसिद्धा तथा च तस्यां विद्यायामनर्थनिवृत्ति
कामानां सर्वेषामेवार्थित्वलक्षणाधिकारः संभवति तथा च विद्याधिकारिणां सर्वेषामविशेषेण वेदान्त
श्रवणादावधिकारप्रसक्तौ शूद्रस्य वेदश्रवणादिप्रतिषेधान्नाधिकार इत्युक्तमपशूद्राधिकरणे स्त्र्यादी
नां च तत्प्रतिषेधाभावाद्देहान्तरश्रवणाधिकारो भाष्यानुमतो विधुरादेरित्यर्थः नन्वमुख्याधिकारविभि
न्नस्य श्रवणादेरपि विद्योत्पादकत्वम् वक्ष्यमाणवाच्यं अन्यथा योग्यताधिकारनिरूपणपरभाष्यवैयर्थ्यप्रसं

किं तु दृष्टार्थो च विद्या प्रतिषेधाभावमात्रेणाप्यर्थिनमधिकरोतीति श्रवणादिष्विति अन्तरा चापि तु त
द्दृष्टेरित्यधिकरणभाष्योक्तन्यायेन शूद्रवदप्रतिषिद्धयोग्यतया विधुरादेरपि देहान्तरे विद्याप्रापके
णामुख्याधिकारमात्रेण श्रवणाद्यनुमतिः

गात्। विद्योत्पादकत्वावधारणाभावे च तत्काम्याधिकारस्य योग्यतायां मुख्ययोग्यताधिकारयोः फलतो विशेषाभावादित्य
तआह देहान्तर इति अयं भावः अमुख्याधिकारिणामनन्यव्यापारतया अस्मिन्निर्वर्त्यमानं श्रवणादिकं निरं
कुशब्रह्मचर्यादिसाधनसहकारादिप्रयुक्तं अस्मिन्नेव जन्मनि प्रायेण विद्योत्पादकं संपद्यते अमुख्याधिकारिणां तु
श्रवणादिकमनन्यव्यापारत्वासंभवात् संकुचितब्रह्मचर्यादिप्रयुक्तत्वात् चास्मिन्जन्मनि विद्योत्पादन।
योग्यमेव न भवति किं तु बहुजन्मसु किंचित्किंचित्कृतश्रवणादिकं संपाद्यमानं संभूय देहान्तरे क्वचिद्ब्रह्म
न समुत्पादयेदिति महान् फलभेदो योग्यमुख्याधिकारयोः तथा च स्मृतिः अनेकजन्मसंसिद्धस्ततो याति परां गति
मिति अनेकेषु जन्मसु कृतश्रवणादिनाऽऽकलितज्ञाननिष्पन्नसंसिद्धः उत्पन्नविद्यः सन् ततः सिद्धिबलान्मुक्तिं गच्छ

सि॰ले॰ त॰ २९

सत्यसति प्रतिबंधकेऽस्मिन्नेव विद्याजन्मेत्यत्र मानमाह ऐहिकमपीति प्रस्तुतप्रतिबंधे असति विद्याजन्म इह जन्मन्यप
पि भवति अपिशब्दात् सति प्रतिबंधे जन्मांतरे भवति कुतः तद्दर्शनात् तस्य प्रतिबंधकवशात् जन्मांतरे विद्योदय
स्य वामदेवादिषु दर्शनादित्यर्थः दृष्टांतवैषम्येणोत्तरमाह शास्त्रीयांगयुक्तमिति शास्त्रीयांगं संन्यासः तद्युक्तं
संन्यासिनानुष्ठेयमानमिति यावत् तथा च शास्त्रीयांगसहितं श्रवणं श्रवणविधिविहितपक्षे स्वयमेव विद्याल
क्षणफलपर्यंतमदृष्टं जनयति श्रवणविधिर्नियमविधिरिति पक्षे तु तादृशं श्रवणं नियमविशिष्टं सत् फलपर्यं
तं नियमादृष्टं जनयतीत्यर्थः तद्वेति श्रवणजनितादृष्टमित्यर्थः जातीति जातिर्जन्म तत्तत्र यथा जातिस्मरत्वं स

79

ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनादिति सूत्रे अधिकरणे तथा निर्णयात् एवमप्युक्ताधिकारिकृतस्यापि दि
तिपतः शास्त्रीयाऽगयुक्तं श्रवणमपूर्वविधित्वपक्षे फलपर्यंतमपूर्वं नियमविधित्वपक्षे नियमादृ
ष्टं वा जनयति तत्र जातिस्मरत्वप्रापकादृष्टवत् प्राग्भवीयसंस्कारमुद्बोध्य तन्मूलभूतस्य विचारस्य
जन्मांतरीयविद्योपयोगितां घटयतीति युज्यते शास्त्रीयांगविधुरं श्रवणं नादृष्टोत्पादकमिति
कुतस्तस्य जन्मांतरीयविद्योपयोगित्वमुपपद्यते घटकादृष्टं विना जन्मांतरीयप्रमाणव्यापारस्य
जन्मांतरीयावगतिहेतुत्वोपगमेऽतिप्रसंगात्

दकमदृष्टं पूर्वजन्मनि तद्वृत्तांतानुभवजन्यसंस्कारमस्मिन् जन्मन्युद्बोध्य तदुद्बोधनद्वारा पूर्वजन्मवृत्तांतस्मृतिं
घटयति तथा प्राग्भवे श्रवणादिजनितसंस्कारमुद्बोध्य तत्संस्कारकारणभूतस्य श्रवणस्य भाविजन्मनि वि
द्योपयोगित्वं घटयतीत्यर्थः शास्त्रीयांगविधुरमिति संन्यासरहितस्त्रियादिना क्रियमाणं श्रवणमदृष्टोत्पादकं न
भवतीति स्त्रियादिकं प्रत्यविहितत्वाच्छ्रवणादेरिति भावः नन्वविहितश्रवणस्यादृष्टानुत्पादकत्वेपि संस्कार
जनकत्वसंभवात् तद्बलादेव जन्मांतरीयविद्याहेतुत्वं कुतो न स्यादित्यत आह घटकादृष्टं विनेति अतिप्र
संगादिति जन्मांतरानुभूतसकलपदार्थस्मृतिप्रसंगादित्यर्थः

उ॰ २९

ततएवेति संन्यासाभावादेवेत्यर्थः। अस्तु पुनर्वा संन्यासं तन्मरणमस्तमत आह ब्रह्मलोकमिति न स पुनरिति ब्रह्मलोकमभिसंपद्य
पुनरिमं लोकं प्रतिनावर्तत इत्यर्थः। एतच्छ्रुतिमूलं सूत्रमुदाहरति अनावृत्तिरिति ब्रह्मलोकं गतानामुपासकानामा
वृत्तिर्नास्ति शब्दात् हतश्रुतेरित्यर्थः। एतेनाग्नेर्मादि सूत्रसंग्रहार्थमादिपदं तथा च स्मृतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसं
चरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति ते ब्रह्मलोकवासिनः ब्रह्मोपासकाः प्रतिसंचरे महाप्रलये परस्य हिर
ण्यगर्भस्य ब्रह्मलोकस्वामिनः आयुषोन्ते कृतात्मानः साक्षात्कृतात्मानः आत्मा येषां ते तथा। ननु अनन्यव्यापारत्वसंभवेपि संन्यासो ना
स्तीति आशंक्याह क्रममुक्तीति ननु मुख्ये एव संन्यासे मुख्याधिकारप्रयोजकः वर्णाश्रमविभागसमन्वयाविषयत्वा।

नच क्षत्रियवैश्ययोः संन्यासाभावादमुख्याधिकारे तत एव देवानामपि श्रवणादिषु अमुख्य एवाधिकारः स्या
त् तथा च क्रममुक्तिफलकसगुणविद्यया देवभावं प्राप्य श्रवणं कुर्वन्ति एतां विद्यां प्राप्य संन्यासार्हं पुनर्ब्रह्म ।
णा तन्मयत्वमिति ब्रह्मलोकमभिसंपद्यते न स पुनरावर्तत अनावृत्तिः शब्दादित्यादि श्रुतिसूत्रविरोधइति
वाच्यं देवानामनुष्ठेयकर्माद्यभावात् तत एवानन्यव्यापारत्वसंभवतीति क्रममुक्तिफलकसगुणविद्या।
विद्यापि शास्त्रप्रामाण्याद्विनापि संन्यासं तेषां मुख्याधिकाराभ्युपगमादित्याकूतः ननु मुख्याधिकारिणा दृष्ट
फलभूतवाक्यार्थावगमार्थं अविहितत्वात् अनवरविचारवत् किं प्रमाणं वेदान्तविचारः कथं जन्मान्तरीयविद्या
वाप्तावुपयुज्यते नवत्वविचारस्यादिजन्मान्तरीयविचार्यावगति हेतुत्वं युज्यते दूरे जन्मान्तरीयत्वे हेतुत्वं नचवा
च्यं मुख्याधिकारिणां परिव्राजकेन क्रियमाणमपि श्रवणं दृष्टार्थमेवागतेर्दृष्टफलत्वात् न स यथा प्रारब्ध
कर्मविशेषरूपप्रतिबंधादिह जन्मनि फलमजनयतो जन्मान्तरे प्रतिबंधकापगमेन फलजनकत्व॥

दिति भावः अविहितेति न्यायपरास्त्रादिविचारवदित्यर्थः एतज्जन्मीयवेदान्तविचारस्यागामि जन्मीयवेदान्तार्था
वगतिं प्रति हेतुत्वासंभवं केचित् न्यायेन दृष्टयति नवत्विति मुख्याधिकारिकृतविचा[illegible] दृष्टान्तेनयोग्यं धि ।
कारिश्रवणादेरपि जन्मान्तरीयविद्योपयुक्तत्वं शंकते न च वाच्यमिति ततः किं तत्राह तस्येति यथा तस्य मुख्याधि
कारिकृतश्रवणस्य प्रतिबंधादिह जन्मनि विद्यालक्षणं फलमजनयतो जन्मान्तरे फलजनकत्वमेवं अमुख्या
धिकारिकृतमपि श्रवणं जन्मान्तरे फलजनकं स्यादिति न च वाच्यमिति संबंधः मुख्याधिकारिकृतश्रवण ।

सि॰ ले॰
त॰
२०

नानुवर्त्तमानं वृद्धिसंयोगं श्रवणादिकर्त्तव्यताबुद्ध्या संबंधं लभते अपि मिन्नपि जन्मनि प्रतिबंधनिवृत्तिद्वारा विद्यो
दयाय समर्था श्रवणादिकमनुष्ठेयमिति बुध्या प्रवृत्तो भवतीत्यर्थः ततः पूर्वजन्मोपपत्त्यापेक्षया भूयः अधिकं
यतते संसिद्धयर्थमित्यर्थः तस्याश्च योगफलपर्यंतावृत्तिगुणकश्रवणादिरहितो योगभ्रष्टः तस्य नियमादृ
ष्टादेव निर्वाहः कर्त्तव्य इति प्रतिबंधनिवृत्तिरूपफलप्राप्तेः पूर्वं नियमादृष्टानुत्पत्तौ हेतुमाह नस्येति
नियमादृष्टं हि न श्रवणमात्रजन्यं किं तु श्रवणनियमजन्यं तन्नियमश्च श्रवणादेरेव फलपर्यंतमावृत्तेः स
मानिष्पाद्यते न यावत्फलोत्पत्तेरर्वाक् श्रवणादिनियमस्यैवाभावात् न नियमादृष्टोत्पत्तिरित्यर्थः उक्तं च

दृष्टस्यानुत्पत्तेस्तस्य फलपर्यंतावृत्तिगुणकश्रवणानुष्ठाननियमसाध्यत्वात् नहि नियमादृष्टज
नकः श्रवणनियमः फलपर्यंतमावर्त्तनीयस्य श्रवणस्योपक्रममात्रेण निर्वर्तितो भवति येन तज्ज
न्यनियमादृष्टस्यापि फलपर्यंतं श्रवणावृत्तेः प्रागेवोत्पत्तिः संभाव्येत श्रवघातादिवदावृत्तिगुणक
स्यैव श्रवणस्य फलसाधनत्वेन फलसाधनपदार्थनिष्पत्तेः प्राक्तननियमनिर्वर्तितवचनस्य निरालंबन
त्वात् श्रवणवघातायुपक्रममात्रेण नियमनिष्पत्तौ तावतैव नियमशास्त्रानुष्ठानसिद्धमिति तद
नावृत्तावप्यवैकल्यप्रसंगाच्चेत्याकुः

पंचमेति नहीत्यादिना श्रवणनियमः श्रवणस्योपक्रममात्रेण निर्वर्तितो न भवतीत्यत्र हेतुमाह श्रवघाता
दिवदिति आवृत्तिविशिष्टस्यैवावहननस्य तंडुलनिष्पत्तिलक्षणफलसाधनतायाः लोकसिद्धत्वादिति
भावः प्राक्तनादिति फलपर्यंतं श्रवणस्यैवावृत्तौ सत्यां श्रवणस्याप्राप्तांशपरिपूरणलक्षणनियमो निष्पन्नो
भवति न ततः प्रागित्यर्थः श्रवणस्यारंभमात्रे वा कतिपयावृत्तिमात्रे वा जाते सति श्रवणनियमो निष्पन्न इति
वचनं विषयाभावान्निरालंबनमित्यर्थः तदनावृत्तावपीति श्रवणादीनामनुष्ठानमुपक्रम्य श्रवणादिकं
सन्न्यासप्रबंधादिविचारेण खविदलनादौ चावृत्तावपि नियमविधिविरोधाभावप्रसंगादित्यर्थः॥

२०

उ॰
२०

कर्मणां विद्यायां विनियोग इति यत्नमाश्रित्य परिहरन्ति उक्तमिति यज्ञादिभिर्विद्यायां संपादनीयायां द्वारभूतायां
विविदिषायां तस्या उत्पादकं प्राचीनं च यत्क्रियायां यज्ञाद्यनुष्ठानं तत्तन्मोक्षार्थः स्वपदं यज्ञाद्यनुष्ठानजन्मापूर्वं परं वा
सतिमते मुख्याधिकारिकृतश्रवणस्यापि यज्ञाद्यपूर्वेणैव निर्वाह इति इष्टं तामभिप्रायेणाह श्रवणादौ विध्य
भावपक्षे त्विति विवरणपक्षेऽप्येवमेव निर्वाह इत्याह आचार्यास्त्विति अयं भावः प्रमाणासंभावनानिवृ
त्तिः श्रवणफलं प्रमेयासंभावनानिवृत्तिः मननफलं विपरीतभावनानिवृत्तिः निदिध्यासनफलं तथा
च त्रिविधप्रतिबंधकनिवृत्तिलक्षणफलपर्यंतमावृत्तिविशिष्टानि श्रवणादीनि यस्य मुख्याधिकारिणो

उच्यते मुख्याधिकारिणाप्युत्पन्नविविदिषेण क्रियमाणं श्रवणं द्वारभूतविविदिषोत्पादकप्राचीनयज्ञा
द्यनुष्ठानाज्जन्मापूर्वं प्रयुक्तमिति तत्र देवापूर्वं विद्यारूपफलपर्यंतव्याप्रियमाणं जन्मांतरीयायामपि विद्या
यां स्वकारितश्रवणस्योपकारकतां घटयतीति नानुपपत्तिः श्रवणादौ विधिभावपक्षे तु संन्यासपूर्वकश्र
तस्यापि श्रवणस्यादृष्टोत्पादकत्वात्प्रतिबंधे तस्य जन्मांतरीयविद्याहेतुत्वमित्येवमेव निर्वाहं
आचार्यास्तु नियमविधिपक्षेऽप्ययमेव निर्वाहः श्रवणमप्यसतः फलप्राप्तेर्वाक्यप्रमाणेन नियम।

नियमजादृष्टस्य नियमादृष्टमत्रमेव एवं संपन्नस्य विद्यासाधनस्यापि प्रतिबंधवशात् यदि विद्या न जाता।
तदा पुनर्जन्मलाभेन प्रतिबंधक्षये सति पुनर्विचारमनपेक्ष्यैव विद्या जायते यथा वामदेव हिरण्यगर्भादिः य
स्तु क्षपितप्रतिबंधनिवृत्तिपर्यंतश्रवणाद्यावृत्तिर्न जाता मध्ये मृतिश्च जाता तस्य मुख्याधिकारिणोऽपि नियमा।
दृष्टं न जायते स च पुनर्जन्मांतरे उक्तप्रतिबंधनिवृत्तिपर्यंतश्रवणादिकमनुष्ठाय श्रवणादिनियमादृष्टवशे
न विद्याप्रतिबंधककल्मषक्षये सति विद्यां लभते तदुक्तं भगवता श्रीकृष्णेन तत्र तं बुद्धिसंयोगं लभते पौर्व
देहिकं यतते च ततो भूयः संसिद्धौ कुरुनंदन इति तत्र प्राप्तेः प्राग्जन्मनि पूर्वदेहे भवमिदानीं संस्काराम

सि० ले० त० २२

प्रपीतिविद्याप्राप्त्युपायत्वमनुषंगः निर्गुणब्रह्मोपासनं मानसं ध्यानमित्याशंक्य परिहरति न चेत्यादिना अनन्वि
यत्वंकानप्रक्रान्ततत्कारणं मत्संस्थेयितिश्रुतिस्मृत्योरादावेव तत्र प्रमाणत्वेनोदाहृतत्वात् न चोदाहृतश्रुतिस्मृति
गतयोगपदस्य सगुणोपासनपरत्वसंभवादाशंकाप्रसक्तेति वाच्यं भिन्नविषययोरुपासनसाक्षात्कारयोः कार्यकार
णभावासंभवेन निर्गुणविद्याहेतुभूतस्य योगस्य निर्गुणोपासनरूपत्वावश्यंभावान्न च मत्संस्थेति वचन
गतयोगपदस्योपास्तिपरत्वमेवास्ति कृतस्य गीताभाष्ये कर्मयोगपरत्वेन व्याख्यातत्वादिति वाच्यं मत्सं।
स्थेरितिवचनस्य वस्तुतो निर्गुणोपास्तिपरस्यैव सतो भगवता श्रीकृष्णेन कर्मविषये उदाहृतत्वेन तदनुरो

२१

वाप्त्युपायांतरमप्याह तत्कारणं सांख्ययोगाभिपन्नं मत्संस्थे प्राप्यते स्थानं तद्योगैरपि ग
म्यत इति श्रुतिस्मृतिदर्शनात् यथा सांख्यं नाम वेदांतविचारः श्रवणशब्दितो मननादिसहकृतो
विद्यावाप्त्युपायः एवं योगशब्दितं निर्गुणब्रह्मोपासनमपि न च निर्गुणब्रह्मोपासनमेव नास्ती
ति शंक्यं प्रश्नोपनिषदि यः पुनरेतं त्रिमात्रेणोंकारेण परमपुरुषमभिध्यायीतेति
निर्गुणस्यैवोपासनप्रतिपादनात्

धेन भाष्ये तथा व्याख्यानोपपत्तेः योगपदस्य ध्यानेरूढत्वेन वस्तुतः कर्मपरत्वाभावात् तद्वचनमूलभूता
यां तत्कारणमिति श्रुतौ योगपदस्य ध्यानपरतया शारीरकभाष्ये व्याख्याततत्वाच्च कर्मयोगस्य सत्वशुद्धिद्वारा
ब्रह्मावाप्तिसाधनत्वेन तत्साक्षात्वादिति त्वापनापास्य वचनस्य कर्मविषयतया भगवतोदाहरणसंभवाच्च तत्सा
मानाभावाशंकानुप्रसक्तेति चेन्न उदाहृतश्रुतिस्मृतिव्यतिरेकेणान्यत्र क्वापि निर्गुणोपासनं न दृष्टमित्येता
वताभिप्रायेण शंकोपपत्तेः अत एव सर्वास्वपि श्रुतिषु निर्गुणोपासनं दृष्टमिति मंदाधिकारिणामाश्वासना
याह प्रश्नोपनिषदीत्यादिना त्रिमात्रेणेति द्वितीयार्थे तृतीया तिसृभिः अकारोकारमकाराख्याभिः मात्राभिः प

उ० २२

मुख्यामुख्याधिकारिभिन्नं हे किं यथा श्रवणस्य वेदान्तश्रवणस्य प्रतिबन्धकनिवृत्तिरूपदृष्टफलोत्पादकत्ववददृष्टोत्पाद
कत्वमप्यस्ति तथा च नष्टत्वात् जन्मान्तरे विद्योपयोगित्वं विचारस्य घटत इति परिहारान्तरमाह केचिदिति फलमिति
श्रवणफलमित्यर्थः वचनेन शास्त्रेणार्पितं तथा च वेदान्तश्रवणस्य देवतागुरुवेदान्तविषयभक्तियुक्तगुरुशुश्रूषाभ्यामुपा ।
त्ताभ्यामनुपातैश्च शमदमब्रह्मचर्याहिंसादिभिः समुच्चयार्थः तथात्व इति भावः सत्त्वेनेति वेदान्तश्रवणस्य
नेत्र तथा अदृष्टोत्पादकत्वमस्तीत्यर्थः स्वातन्त्र्ये चादृष्टजननेऽश्रवणस्य विद्यायां विनियोगबोधकश्रवणविधिनैरपे
क्ष्यमिति बोध्यं एकस्योभयार्थत्वे दृष्टान्तमाह यथाग्नीति अग्नीनादधीतेति वचनादाधानस्याहवनीयाद्यग्निसंस्कारत्वो
पगमादिति भावः पुरुषसंस्कारेष्विति आपस्तम्बोयमग्निहोत्रमित्यादिपुरुषसंस्कारसंग्राहकसूत्रेऽप्याधान ।

केचित्तु दृष्टार्थस्यापि श्रवणस्य दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् गुरुशुश्रूषया लब्धात् कृच्छ्राशी
तिफलं लभेत् इत्यादिवचनप्रामाण्यात् अदृष्टोत्पादकत्वमप्यस्ति यथाग्निसंस्कारार्थस्याधानस्य पुरु
षसंस्कारेष्वपि परिगणनात्तदर्थत्वमपि एवं वचनबलादुभयार्थत्वोपपत्तेः तथा च प्रतिदिनश्रवण
जनितादृष्टमहिम्नैवामुष्मिकविद्योपयोगित्वं श्रवणमननादिसाधनानामित्याहुः एवं श्रवणमनना
दिसाधनानुष्ठानप्रणष्टाविद्यावाप्तिरित्यस्मिन्नर्थे सर्वसंप्रतिपन्ने स्थिते भारतीतीर्थाः ध्यानदीपे विद्या

प्राप्तिपर्यन्तादित्यर्थः अदृष्टमहिम्नैवेति वेदान्तश्रवणजनितादृष्टस्योपयोगितया विद्यायामेव विनियोगस्य वक्तव्यत ।
या तत्फलजन्मान्तरीयविद्योपयोगित्वमिति भावः एवं उत्तममध्यमाधिकारिणां सांख्यमार्गौ निरूप्य तद्दशाक्रा
न्तानां मन्दाधिकारिणां योगमार्गं निरूपयितुमुपक्रमते एवमिति सर्वसंप्रतिपन्न इति सर्वश्रुतिस्मृतिषु
सम्यक्प्रतिपन्ने निश्चित इत्यर्थः आहुरिति सम्यङ्निरूपितवन्त इत्यर्थः न तु नूतनतया कल्पितवन्त इति भ्र
मितव्यं तथापि श्रुत्यादिसिद्धत्वान्नूतनत्वेन कारणत्वोपलब्धितं ब्रह्मसांख्ययोगाभ्यां विद्याद्वाराप्राप्तिमु
क्त्वा न तत्तत्त्वेन प्राप्तमिति शुद्धमर्थः सांख्यैः श्रवणादिपरैः योगैः कृपासकैः यत्स्थानं ब्रह्मस्वरूपावि
द्याद्वारा गम्यते प्राप्यत इत्यर्थः योगेरपीत्यपिशब्दो योगमार्गस्यानुकल्पत्वं भातीति बोध्यं ॥

सि.लो.
टी.
२२

माण्डूक्यश्रुतिः ओमित्येवं ध्यायथ आत्मानमिति मुण्डकश्रुतिश्चादिपदार्थः। निर्गुणस्योपास्यत्वे सूत्रसंमतिमाह सूत्रकृता
पीति सूत्रकृता निर्गुणे विधिगुणानामुपसंहारस्य दर्शितत्वादिति संबंधः। निर्गुणे गुणोपसंहारो निर्गुणब्रह्मप्रमित्य
र्थ एव न निर्गुणब्रह्मोपास्त्यर्थ इति शंकाव्यवच्छेदाय पापादिविशिष्टिनाष्टि उपास्यगुणपरिच्छेदार्थमिति परिच्छेदेनि
त्यपः निर्गुणे गुणोपसंहारनिरूपणस्य निर्गुणोपास्तिरपि फलमिति वक्तव्यं अन्यथा तन्निरूपणस्याप्रासंगिकत्वापत्तेः स्यादसंगति
प्रसंगादिति भावः। आनंदादयः क्वचिच्छ्रुता अन्यत्राप्युपसंहर्तव्याः प्रधानस्यैव ब्रह्मणः सर्ववेदांतेष्वभेदेन
ब्रह्मविद्याया एकत्वादिति सूत्रार्थः। भावरूपाणामिति विशेषणमस्थूलत्वादिपार्थिव्यधिकरणस्यानंदादयः अधिक
रणेन पौनरुक्त्यपरिहारार्थमिति बोध्यं अक्षरे ब्रह्मणि धीर्येषामस्थूलादिशब्दानां वाच्यार्थभूते रभावे भवति तेऽक्षर
धियः तेषामविरोध उपसंहारः इतरेष्ववेदांतेषु कर्तव्य एवेति सूत्रभागार्थः। स्थौल्यादिनिषेधानां निष्प्रपंच

सूत्रकृताप्युपास्यगुणपरिच्छेदार्थमारब्धो गुणोपसंहारपादे निर्गुणे ह्यानंदादयः प्रधानस्येति
सूत्रेण भावरूपाणां ज्ञानानंदादिगुणानामक्षरधियां त्वविरोध इत्यादिसूत्रेणाभावरूपाणामस्थूल
त्वादिगुणानां चोपसंहारस्य दर्शितत्वाच्च ननु आनंदादिगुणोपसंहारेऽपास्यनिर्गुणमेव न स्यादिति
चेन्न आनंदादिभिरस्थूलत्वादिभिश्चोपलक्षितमखंडैकरसं ब्रह्मेति निर्गुणत्वानुपमर्देनोपासनासंभवा
त्। ननु तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति श्रुतेर्न परब्रह्मोपास्यमिति चेन्न

२२

ब्रह्मत्वप्रमितिहेतुत्वादिति भावः। व्याख्यातमर्थं करोति नन्विति आनंदादिगुणानामुपास्यकोटौ निवेशो नांगीक्रियते
येनोपास्यं ब्रह्म सगुणं स्यात् किं तूपास्यनिर्गुणपदार्थानिर्गुणोपास्त्यावुपयोगमात्रं स्वीक्रियत इति समाधत्ते ने
ति आनंदादिगुणानामस्थूलादिगुणानां चोपसंहारो हि तद्वाचकपदानां सहोच्चारणरूपो विवक्षितस्तथा च
उपाधिविशिष्टचैतन्यवाचकैरानंदादिपदैः स्थौल्याद्यभावविशिष्टचैतन्यवाचकैरस्थूलादिशब्दैश्च सर्वैर्वाच्या
र्थेष्वनुगतमखंडैकरसं पदब्रह्म लक्षणया बोध्यं तदहमस्मीत्युपासनसंभवादित्यर्थः। उक्तं चैतद्यथानंदापेक्षा
नंदादिभिरस्थूलादिभिश्चात्मात्र लक्षितः। योऽखंडैकरसः सोऽहमस्मीत्येवमुपासत इति अत्रेति वेदांतेष्वित्य
र्थः। एवं श्रुतिसूत्राभ्यां निर्गुणस्योपास्यत्वं निरूप्य निर्गुणोपासनस्य श्रुतिमतविरोधमाशंक्य परिहरति न

उ.
२२

ओंकारो निर्गुणमेव ब्रह्म तदभेदेन ध्येयमित्यनुभाष्यादिसंमतमाह तदनंतरमिति ध्यानवाक्यानंतरमित्यर्थः जी
वरूपः परमात्मनो घनः घटाकाशवदुपाधिपरिच्छिन्नश्चेतन्यात्मा जीवघनः तस्मात्परः पुरुषः निरुपाधिकः
परमात्मा नंसः ध्यातापुरि विहार्दाकाशे बुद्धिसाक्षित्वेन शयं वर्तमानमीक्षते साक्षात्करोतीत्यर्थः उपासनावाक्ये
पुरुषमभिध्यायीतेति वाक्ये इत्यर्थः कार्येति ईक्षणवाक्यस्य ध्यानफलभूतसाक्षात्कारप्रतिपादकत्वेन ध्या
नवाक्यैकवाक्यत्वात् ध्यानेक्षणयोः कार्यकारणभावोऽवगम्यत इति भावः नियमादिति अन्यध्यानादन्यसा
क्षात्कारादर्शनादिति भावः ननु कल्पितरो ध्यातव्यस्य सर्वं तस्यानंतत्वे तेजसि सूर्ये संपन्न इति सूर्यसंपत्तिवचनानु

तदनंतरं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इत्युपासनाफलवादे ईक्षतिकर्मत्वेन निर्दि
ष्टपरनिर्गुणं ब्रह्म तदेवोपासनावाक्येऽपि ध्यायतिकर्मेनाप्यत इति ध्यानयोः कार्यकारणभूतयोरेक।
विषयत्वनियमादिमध्यार्थस्येक्षतिकर्माभिकरणे भाष्यकारादिभिरंगीकृतत्वात् अन्यच्चापि तापनीय
कठवल्ल्यादिश्रुत्यंतरे निर्गुणोपास्तेः प्रपंचितत्वात्
त्मा

सारेण विशेषणं दत्तं तथा चोंकारे ध्यातव्यपुरुषस्य निर्गुणब्रह्मरूपत्वं कल्पितककारैर्नांगीकृतमिति प्रतीय
त इति चेन्न सूर्यसंपत्तिवचनस्यार्चिरादिमार्गोपलक्षिप्रपदकतया चतुर्थाध्याये व्यवस्थापितत्वेन सूर्यं तदंतस्थस्य
स्वप्राप्तिपरत्वाभावात् कल्पितककाथामपि नेदीयवचनोत्तरपर्यालोचनया श्रुतेर्मोक्षपरतयाच सूर्यंतस्यानविशे
षणदाने तात्पर्याभावस्य परिमले प्रतिपादितत्वाच्चेति भावः देवाह वै प्रजापतिमब्रुवन् अणोरणीयांसमिम
मात्मानमोंकारं नो व्याचक्ष्वेत्यादितापनीयश्रुतिः अणोः सूक्ष्मादपि सूक्ष्मं तु विज्ञेयमिमं परतत्पूपं पर
परमात्मानं ओंकारगम्यमित्यर्थः एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् कठवल्लीश्रुतिः ओमित्येतदक्षरमिदं सर्वमित्यादि

सि॰ले॰
टी॰
२३

ननु ब्रह्मोपनिषदादावुपासनामात्रमुक्तं मन्त्रवदनुष्ठानप्रकारोऽपीत्याशंक्याह आर्षं छन्दोऽपीति ननु पंचीकरणे वेदांत
लक्ष्ये अखंडैकरसे प्रणवमात्रात्मकत्वेन प्रपंचविलापनोक्तिपूर्वकमहं ब्रह्मास्मीत्यभेदेनावस्थानं समाधिरित्यु
क्तत्वात् अखंडैकरसः सोऽहमस्मीत्येवमुपासीत इत्यादाहृतध्यानदीपवचनाच्च प्रकृते निर्गुणोपासनमहंग्रहरूप
विवक्षितं ब्रह्मोपनिषत्तत्वैव प्रश्नेन ओंकाररूपेणत्रैलोके निर्गुणब्रह्मदृष्टिर्विवक्षिता तथा कठवल्ल्यामपि तथा
च कथं प्रश्नादिवाक्यं प्रकृतोपासने प्रमाणत्वेनोदाहृतमिति चेत् न प्रकृतोपासनेनापनीयमाण्डूक्यमुण्डकश्रुती
नामेव प्रमाणत्वेन विवक्षितत्वात् प्रश्नकठवल्लीश्रुत्युदाहरणं तु निर्गुणस्याप्युपासनमन्यत्रापि दृष्टमित्येतावन्मात्रे
णेति न विरोध इति भावः पंचीकरणादिषु चानिर्धारितानुष्ठानप्रकारमिति संबंधः तत्र दृष्टांतमाह अनेकधा
विति अनेकास्तु शाखा वा शाखाविप्रकीर्णतया विषयाकलिततया स्थितानां पदार्थानामुपसंहारेण यथा अग्निहोत्रादिकर्म

आर्षं छन्दोऽपि स्वशाखासु वा सिद्धादिकल्पेषु पंचीकरणादिषु चानेकधा शाखाविप्रकीर्णं सर्वोपसंहारे
णकल्पसूत्रेष्वग्निहोत्रादिवन्निर्धारितानुष्ठानप्रकारं निर्गुणोपासनं संप्रदायमात्रविद्भ्यो गुरुभ्यो
ऽवधार्य तेन तदनुष्ठाना[illegible]भूतान्निर्गुणब्रह्मसाक्षात्कारः संपद्यतेऽविसंवादिविभ्रम
न्यायेनोपासनैरपि श्रीकृष्णफलकाले प्रमापर्यवसानसंभवात्

२३

निर्धारितानुष्ठानप्रकारं भवतीत्यर्थः उपासनानुष्ठानप्रकारः संप्रदायः तन्मात्रविद्भ्योऽपि गुरुभ्यः सकाशात् ।
तन्निश्चित्येत्यर्थः उक्तं च भगवता श्रीकृष्णेन निर्गुणप्रकरणे श्रुत्वान्येभ्य उपासते इति क्रमेणेति उपासनाय ।
विपाकक्रमेणेत्यर्थः ननु निर्गुणोपासनस्य कथं प्रमालक्षणसाक्षात्कारपर्यवसानमित्यत आह अविसंवादी
ति अयमर्थः क्वचिद्दूरविदेशे स्थितस्य श्रीकृष्णस्य रूपबिंबस्य प्रतिबिंबं यदा बहिः पश्यतो दूरे स्थितस्य पुरुषस्य
प्रतिबिंबे श्रीकृष्णोऽयमिति भ्रमो जायते तेन भ्रमेण प्रतिबिंबाध्यासोपाधिसमीपं गतस्य पुरुषस्य सत्यश्रीकृष्णस्य गोच
रप्रमा जायत इति लोकप्रसिद्धं तत्र प्रतिबिंबे बिंबभूतश्रीकृष्णस्य भ्रमो अविसंवादिभ्रमः विसंवादः फलाभा
वः तद्रहितो अविसंवादिभ्रमः फलवद्भ्रम इति यावत् यथानेन भ्रमेण प्रवृत्तस्य श्रीकृष्णप्राप्तिलक्षणफलका
ले श्रीकृष्णप्रमा जायते तथा निर्गुणोपासने प्रवृत्तस्यापि ब्रह्मप्राप्तिलक्षणफलकाले निर्गुणप्रमा जायत इ
ति

टी॰
२३

उपास्यस्य ब्रह्मत्वनिषेधवद्वेद्यस्यापि ब्रह्मत्वनिषेधात् परब्रह्मवेदनमपि न सिध्येदित्याह अन्यदेवेति वेदनवि।
षयादन्यत् ब्रह्मेत्युक्तेऽर्थात् ब्रह्मवेद्यं न भवतीति सिध्यतीत्यर्थः अस्त्विति वेद्यत्वमुपास्यत्वं वा ब्रह्मणि परमा
र्थतो नास्तीति निषेधश्रुतीनां तात्पर्यमिति भावः निर्गुणोपासनेऽधिकारिणं दर्शयति एवं चेति निर्गुणो
पासने प्रमाणं सिद्धं सतीत्यर्थः केषांचिन्मुमुक्षूणां श्रवणासंभवे प्रमाणमाह श्रवणायापीति बहुभि
र्मुमुक्षुभिर्यः परमात्मा श्रोतुमपि न लभ्यते तस्य श्रुतस्यापि साक्षात्कारो दूरापास्त इत्यर्थः बहूनां श्रव
णालाभे श्रुत्यभिमतं कारणं दर्शयति येषामिति बुद्धीति उक्तं च ध्यानदीपे अत्यंतबुद्धिमांद्याद्वा सामग्र्या
वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सोऽनिशमिति तत्र सामग्र्यभावं विवृणोति न्यायेति

अन्यदेव तद्विदितादथो अविदितादधीति श्रुतेस्तस्य वेद्यत्वस्याप्यसिध्यापादनात् अत्यंतरे प्रब्रह्मवे
दनप्रसिद्धेर्वेद्यत्वश्रुतिर्वास्तवार्थत्वपराचेदापर्यवसानादेतदुपासनाप्रसिद्धेस्तदनुपास्यत्वश्रुति
रपि वस्तुतत्त्वपरास्तु एवं च श्रवणायापि बहुभिर्यो न लभ्य इति श्रवणे येषां बुद्धिमांद्यात्पाप
प्रमादनकुशलविशिष्टगर्वेऽस्त्यामाद्या श्रवणादि न संभवति तेषामध्ययनगृहीतैर्वेदांतैरापा
पाततोऽधिगमितब्रह्मात्मभावानां तद्विचारं विनैव ब्रह्मोपनिषदा युक्तम्

येषामत्यंतबुद्धिमांद्यात् श्रवणादिकं न संभवति येषां चकुशलमतीनामपि सामग्र्यभावात् श्रवणादिकं
न संभवतीत्यर्थः विशिष्टत्वं च असंभिन्नार्यमर्यादत्वकारुणिकत्वादिलक्षणं बोध्यं तेषां ब्रह्मजिज्ञासा हेतु
माह अध्ययनेनेति अधिगमितः अवगमितः ब्रह्मात्मभावो येषां ते तथोक्ताः तेषामित्यर्थः तेषां तद्वि
चारं विनैव गुरुभ्योऽवधार्य तदनुष्ठानात् साक्षात्कारः संपद्यत इति संबंधः निर्गुणब्रह्मविचारं वि
नैव निर्गुणब्रह्मोपासनादित्यर्थः

सि. ले.
र.
२५

निर्गुणोपासनस्य साक्षात्कारहेतुत्वे दृष्टान्तमाह दहराद्युपासनेनैवेति श्रवणं भावादिति समानविषयकध्यान
सामर्थ्याद्विषयाबाधाच्चेत्यर्थः सांख्ययोगमार्गयोस्तुल्यकल्पत्वभ्रममपनयति इयांस्त्विति बुद्धिमान्द्यादिप्र
तिबन्धरहितस्य विशिष्टगुर्वादिलाभसति सांख्यमार्ग एवानुष्ठेयः तदेतत्परासिद्धिहेतुत्वान्न सांख्यालाभे तु यो
गानुष्ठेय इत्यनुकल्पः स इत्यर्थः नन्वसिद्धिरिति सांख्ययोगमार्गद्वयेऽपीत्यर्थः ननु योगमार्गे निर्गुणोपासन
स्य सगुणोपासनदृष्टान्तोदाहरणेन साक्षात्कारणत्वस्यानुपदमुक्तत्वात्प्रत्यक्षप्रमाणाधारणेन प्रश्नानुपप
त्तिरिति चेन्न सदोषः उपासनस्य साक्षात्कारकारणत्वे प्रमाणाभिप्रायेण प्रश्नोपपत्तेरत एव न प्रमाणं

दहराद्युपासनेनैव निर्गुणोपासनेन जन्यस्य स्वविषयसाक्षात्कारस्य श्रवणादिप्रमाणद्वाराजन्यसा
क्षात्कारवद्देवतात्वार्थविषयत्वावच्छेदभावाच्च इयांस्तु विशेषः प्रतिबन्धरहितस्य पुंसः श्रवणादिप्र
माणद्वारा ब्रह्मसाक्षात्कारो झटिति सिद्ध्यतीति सांख्यमार्गो मुख्यः कल्पः उपास्त्या तु विलम्बेनेति योगमा
र्गो नु कल्प इति नन्वस्मिन्पक्षद्वयेऽपि ब्रह्मसाक्षात्कारे किं कारणं केचिदाहुः प्रत्ययाभ्यासरूपं प्रस
ङ्ख्यानमेव योगमार्गे आदित आरभ्योपासनरूपस्य सांख्यमार्गे मनननान्तरनिदिध्यासनरूपस्य च
तस्य सत्वात् न च तस्य ब्रह्मसाक्षात्कारकारणत्वे न मानाभावः ततस्तु तं पश्यते निष्कलं ध्यायमान
इति श्रवणात् कामातुरव्यवहितकामिनीसाक्षात्कारे प्रसंख्यानस्य करणत्वक्लृप्तेश्च

२४

वक्ष्यति नचेमादिना अथवा पूर्वत्र सगुणोपासनदृष्टान्तेन निर्गुणोपासनस्य हेतुत्वमात्रमुक्तं न तु करणत्वं
तथा च योगमार्गेऽपि किमुपासनमेव कारणं किं वाऽन्यदिति प्रश्नाभिप्रायः संगच्छत इति भावः मार्गद्वये
ऽपि साक्षात्कारोदयकाले प्रसंख्यानस्यानुवृत्तिमाह योगमार्गेऽप्यादिना निष्कलं निर्विशेषं परमात्मानं
ध्यायमानः ततो ध्यानात्तं पश्यतीत्यर्थः कामातुरेति कामातुरस्यासंनिकृष्टकामिनीसाक्षात्कारे
इत्यर्थः तत्र सन्निकर्षाभावेन चक्षुषः करणत्वासंभवात् मनसो बहिरस्वातन्त्र्याच्च कामिनीगोचर
प्रसंख्यानमेव कारणमिति भावः

उ.
२५

ननु संवादिभ्रमदृष्टांतेन निर्गुणोपास्तेः प्रमापर्यवसानमङ्गमनुपपन्नं दृष्टांतवैषम्यात् तत्र हि समीपोपसर्पणानंतरं
सम्यक् श्रीकृष्णस्य चक्षुःसन्निकर्षे सति श्रीकृष्णस्य प्रमा जायते तेन तत्संवादिभ्रमप्रमा जाता प्रकृते च निर्गुणोपासनस्य प्र
माजनने सामर्थ्याभावात् सामर्थ्ये तराभावाच्च कथं प्रमापर्यवसानमित्याशंक्य निर्गुणोपासनस्यैव स्वसमानविष
यकप्रमाजनने सामर्थ्यसंभावनात् तस्य यथार्थत्वे सदृष्टांतमाह पाणाविति पिधायेति तदुक्तरवक्तुरविदित
मिति शेषः तदुक्तरेति दैवयोगात् पंचैव वराटकास्तत्र पाणौ संतीत्युक्तरवक्तुरित्यर्थः निर्गुणोपासनं ।
स्यापि वस्तुतो यथार्थत्वेनेति संबंधः अयं देहे कस्मिन्ब्रह्माहमस्मीति प्रत्ययसंततिरूपोपास्तेर्विषयबाधाभावा
द्यथार्थत्वमित्यर्थः ननु प्रकृतोपासनस्य निर्विचिकित्सतत्त्वज्ञानपूर्वकत्वादेव श्रवणमननोत्तरकालीननि

पाणौ पंच वराटकापि धायकेन चित्तः रेकतिवराटकाः इति पृष्टे पंच वराटका इति तदुक्तरवक्तुर्वाक्य
प्रयोगमूलभूतसंख्याविशेषज्ञानस्य मूलप्रमाणाभावेप्याहार्यारोपस्यापि यथार्थत्ववन्निर्गुणब्रह्मोपा
सनस्याप्युत्पत्तिविवेचकनिर्विचिकित्समूलप्रमाणानिरपेक्षस्य दहराद्युपासनावदुपासनाशास्त्र
मात्रमवलंब्य क्रियमाणस्यापि वस्तुतो यथार्थत्वेन

दिध्यासनस्यैव यथार्थत्वसंभवात् किमिति
दैवयोगात् यथार्थत्वं समर्थ्यते तत्राह अर्थात्तथात्वेति अर्थ्यस्य ब्रह्मणः तथात्वं प्रत्यग्रूपत्वनिष्प्रपंचत्वादि त
स्याविवेचकं यन्निर्विचिकित्सं मननपरत्वादिशंकाशून्यं मूलप्रमाणं श्रुतिरूपं तन्निरपेक्षस्येत्यर्थः निदिध्या
सनस्यैव प्रकृतनिर्गुणोपासनस्य विचारपूर्वकत्वाभावात् न निर्विचिकित्सतत्त्वनिर्णयपूर्वकत्वप्रयुक्तं यथा
र्थत्वमिति भावः ननु विचारपूर्वकं प्रत्यगभिन्नब्रह्मनिर्णयाभावे कथमहं ब्रह्मास्मीति प्रत्ययसंततिरूपो ।
पास्तिरनुष्ठीयते तत्राह दहरादीति यथा सगुणस्येश्वरस्य विचारपूर्वकं जीवाभिन्नत्वनिर्णयाभावेपि स्व
स्य सगुणेश्वराभेदचिंतनं कर्तव्यमित्येवंरूपं सगुणोपासनाविधिशास्त्रमवलंब्य सगुणोपासनं क्रियते
तथा निर्गुणोपासनं कर्तव्यमित्येवंमात्मकशास्त्रमात्रमवलंब्य निर्गुणोपास्तिरनुष्ठीयत इत्यर्थः ॥

प्रमाणजन्यस्यापि प्रमाणप्रयोज्यत्वमात्रेण प्रमात्वे संमतमाह उक्तेहीति ज्ञानभावनाज्ञानाभ्यासरूपं प्रसंख्यानं त
ज्जन्यमपरोक्षज्ञानमित्यर्थः मूलप्रमाणं वेदांतवाक्यं तज्जन्यप्रमाभावात् सदा द्वैतमावि प्रतिपन्नप्रामाण्यकत्वमितिवो
ध्यं प्रसंख्यानजन्यसाक्षात्कारनिष्ठप्रामाण्यस्य तन्मूलप्रमाणज्ञप्त्यपेक्षायामपसिद्धांतापातइतिशंकते नचेति प्र
संख्यानजसाक्षात्कारनिष्ठमपि प्रामाण्यं नियमेन स्वाश्रयग्राहकसाक्षिभास्यमेवेति न तत्प्रामाण्यस्य ग्रहणार्थं मूलप्रमा
णानुसरणं किं तु प्रसंख्यानजन्यव्यवहितकामिनीसाक्षात्कारस्याप्रमात्वदर्शनात् प्रसंख्यानजन्यब्रह्मसाक्षात्कारे
पि कदाचिदप्रामाण्यशंकासंभाव्यते तन्निरासाय मूलप्रमाणानुसरणमिति नापसिद्धांत इति भावः अपवादे

उक्तंहि कल्पतरुकारैः वेदांतवाक्यजज्ञानभावनाऽपरोक्षधीः मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते न
च प्रामाण्यपरतस्त्वापत्तिः अपवादनिरासाय मूलशुद्ध्यनुरोधात् इति अन्ये तु पण्णाणरान्याचेतसा वेदितव्यः
इष्यते तत्र आपातृत्वप्रमादिश्रुतेर्मन एव ब्रह्मसाक्षात्कारे करणं तस्य सोपाधिकात्मस्य हं वृत्तिरूपप्रमाकर
णत्वक्लृप्तेः स्वप्नप्रपंचविपरीतप्रमात्रादिज्ञानसाधनस्यांतःकरणस्येत्यादिपंचपादिकाविवरणयोर्येना
पि तथाप्रतिपादनात् ॥

-25

ति अप्रामाण्यशंकापवादः प्रसंख्यानमात्रं न साक्षात्कारे करणं किं तु तत्सहकृतं मन एव तत्र करणमिति मतं दर्शयति
अन्येत्विति अणुर्विक्षेपः अथातं प्रसंख्यानसंस्कृतं मनसैवानुद्रष्टव्यमित्यादिश्रुतिरादिपदार्थः जीवसाक्षात्का
रे मनसः करणत्वे संमतिमाह स्वप्नेति प्रातिभासिकस्वप्नप्रपंचापेक्षया विपरीतो व्यावहारिकः प्रमात्रादिः त
ज्ज्ञानसाधनस्येत्यर्थः आदिपदं प्रमेयादिसंग्रहार्थं तथेति प्रमातृशब्दितसोपाधिकात्मसाक्षात्कारे मनसः क
रणत्वेपि तद्दृष्टार्थः

सगुणोपासनं प्राणप्रयाणपर्यंतमावर्तनीयं ततः तत्रापि मरणकालेपि योगिनो ब्रह्मचिंतनस्य श्रुतिस्मृतिसिद्धत्वात्सद
प्रयाणाभ्यासं विना संमरणकालेन दसंभवादिति सूत्रार्थः अहंग्रहोपासनानां विकल्पः उपास्यदेवतासाक्षात्कारल
क्षणफलस्याविशिष्टत्वादेकार्थानां विकल्पस्य प्रसिद्धत्वादिति सूत्रार्थः ब्रह्मसाक्षात्कारस्य प्रमाकरणजन्यत्वा
भावेपि विषयाबाधात् प्रमात्वमाशंक्य निषेधति नचकाकदंतादाविति याहशिकेमर्थः तज्ज्ञानकरणाजन्य
त्वज्ञानमेव नास्ति प्रमात्वं तु दूरापास्तमित्यभिप्रायेणाह प्रमाणमूलकस्येति अविसंवादिवराटकसंख्यावि
शेषगोचराहार्यप्रवृत्तेरपि ज्ञानत्वमसिद्धमित्याह आहार्यप्रवृत्तेश्चेति अबाधितार्थज्ञानत्वं हि प्रमात्वं न त्वबाधिता
र्थकत्वमात्रमतिप्रसंगादिति मत्वाह उक्तादिवदिति ननु च प्रसंख्यानस्य प्रमाणादिनाप्राप्तं चोद्यं परिहरति मेवमि

आप्रायणात्तत्रापि हि दृष्टमित्यधिकरणे विकल्पोऽविशिष्टफलत्वादित्यधिकरणे च दहराद्यहंग्रहोपास
कानां प्रसंख्यानादुपासनस्य गुणब्रह्मसाक्षात्कारांगीकाराच्च ननु च प्रसंख्यानस्य प्रमाकरणेष्वपरिगण
नात्तज्जन्यो ब्रह्मसाक्षात्कारः प्रमाणं स्यात् नचकाकदंतादौ प्रसंवादिवराटकसंख्याविशेषाहार्यज्ञानव
दर्थाबाधेन प्रमात्वोपपत्तिः प्रमाणमूलकस्य प्रमात्वाभ्युपगमात् आहार्यप्रवृत्तेश्चोपासनावृत्तिवज्ज्ञान
भिन्नमानससत्क्रियारूपत्वादाहार्यादिवदबाधितार्थविषयत्वेपि प्रमात्वानभ्युपगमात् मेवं तर्हि प्रमाक
रणमूलकत्वेपि ईश्वरमायाप्रवृत्तेर्न प्रमात्वोपपत्तेः विषयाबाधितत्वान्मायोद्वयेपि प्रसंख्यानस्य
विचारितादविचारिताद्वा वेदान्तवाक्यादागमस्य मूलकत्वात् प्रसंख्यानजन्यस्यापि ब्रह्मसाक्षात्का

ति मायाप्रवृत्तिवदिति नच मायाप्रवृत्तेरपि मायाज्ञानत्वमितिवाच्यं तथा सतीश्वरीयमायाप्रवृत्तेर्यः सर्वज्ञः सर्वविदित्या
श्रुतिप्रज्ञाप्यार्थत्वाभावप्रसंगादिति भावः नोत्पादिति नचेश्वरादावपि प्रसंगइतिवाच्यं तद्भिन्नत्वेन विशेष
णोपपत्तेरिति भावः प्रसंख्यानजन्यसाक्षात्कारस्य प्रमाणमूलकत्वात् प्रमात्वमिति समाधानांतरमाह मा
र्गद्वयेपीति अविचारितादिति योगमार्गाभिप्रायं वेदांतवाक्याद्ब्रह्मावगतिः तन्मूलकतयेत्यर्थः नचविचारि
तादविचारिताद्वा यदि ब्रह्मावगतिर्जाता तर्हि किमर्थं प्रसंख्यानमितिवाच्यं प्रसंख्यानात्पूर्वमविद्यानिवर्त
का प्रतिबंधकब्रह्मावगतेरत्वाभावात्तद्दर्शनदाढर्यफलकमिति भावः

सि॰ ले॰ तृ॰ २६

महावाक्यमेव तत्र करणमिति मतमाह अपरेत्विति अपरे पितुरुपदेशात् तद्ब्रह्म जनतोऽस्माज्ज्ञात्वा तन्नवान् ह किले
मर्थः पारमर्षिं प्राप्तं भूतं ब्रह्म तत्त्वविदुपलब्धवानेव विलंबो विदेहकैवल्यप्रतिपादकस्मारब्धान्तविमोक्षात इ
त्यर्थः वेदान्तेति अत्र वेदान्तजन्यज्ञानादेव ब्रह्मात्मैक्यलक्षणस्यार्थस्य सुनिश्चितत्वोक्त्या वाक्यार्थविगमनंत
रं प्रसंख्यानानुष्ठानं नापेक्षितमिति प्रतीयते तदुक्तं वृत्तेश्च येदं वाक्याद्देवापरोक्षज्ञानोमन्तिपक्षे संगृह्णन्ते अत्र
यात्रापरोक्षज्ञानापेक्षापेक्षितत्वान्नैरपेक्ष्यं न संगृह्णन्ते अतो वेदान्तविज्ञानसुनिश्चितार्था वाक्यमेवापरोक्षज्ञानेकर
णमिति निश्चीयत इति भावः महावाक्यमेवेति साक्षात्योगमार्गानुष्ठानेन योगमार्गानुष्ठानेन दृष्टादृष्टफलक्षण
सकलप्रतिबन्धक्षये सति प्रतिबन्धरहितं महावाक्यमेव साक्षात्कारजनकमितीति वाक्यस्य करणत्वपक्षेन सांख्ये

अपरे तु ब्रह्मविज्ञानो नमसः पारं दर्शयन्ति आचार्यवान् पुरुषो वेद तस्य तावदेव चिरमित्यादिश्रुति
भ्य आचार्योपदेशानन्तरमेव ब्रह्मसाक्षात्कारोदये जीवन्मुक्तिश्रवणाद्वेदान्तविज्ञानसुनिश्चितार्था इ
ति ज्ञानान्तरनैरपेक्ष्यश्रवणात् तं त्वौपनिषदं पुरुषमिति ब्रह्मण उपनिषदेकगम्यत्वश्रवणाच्चौ
पनिषदं महावाक्यमेव ब्रह्मसाक्षात्कारे करणं न मनः यन्मनसा न मनुत इति तस्य ब्रह्मज्ञानक
रणत्वनिषेधात् ननु वाऽऽपक्षे मनोविषयमिदं येनाहुर्मनो मतमिति वाक्यशेषे मनोमात्रग्रहणात्
नचैवं यद्वाचानभ्युदितमिति शाब्दस्यापि तत्करणत्वं निषिध्यत इति शांक्यं

योगमार्गयोर्वैयर्थ्यशंकेति मन्तव्यं लोको मनसा यच्चैतन्यं न मनुते तदेव त्वं ब्रह्म विद्धीति योजना न मनुत इति
वाक्यश्रुत्या मनस एव ब्रह्मज्ञानकरणत्वं निषिध्यते न तु चेमत्रहेतुमाह येनाहुरिति येन चैतन्येन मनस्तत्र
कामितं मनुत इति वाक्यशेषे प्रक्रमन एव चैतन्याभासमिति वक्तुमशक्यत्वात् मनोमात्रग्रहणमावश्य
कं तदैकरूप्याय न मनुत इति पूर्ववाक्येऽपि मनोमात्रग्रहणमित्यर्थः नचैवमिति मनोमात्रस्य ब्रह्मज्ञानकरण
त्वनिषेधोपगमे इत्यर्थः न च वाचा इत्यस्य वेदान्तातिरिक्तशाब्दत्वं लौकिकमत इति वाच्यम् अत्रापि येन वा
गभ्युद्यत इति वाक्यशेषे शब्दमात्रस्य चैतन्यप्रकाश्यत्वप्रतिपादनेन तदैकरूप्याय पूर्ववाक्येऽपि वाचेत्यस्य

26

तृ॰ २६

निरुपाधिकात्मसाक्षात्कारेऽपि मनसः करणत्वं स्फुटमित्याह अहमेवेति इदं सद्रूपेण सर्ववस्तुष्वनुभूयमा
नं सर्वात्मकं ब्रह्मैवाहमस्मि ततः सर्वोऽस्मीति स्वात्मन्येव ब्रह्मवित् मन्यत इत्यर्थः ननु स्वात्मनि ब्रह्मविदो महावाक्यानुसं
धानसंभवाद्वाक्यमेव करणं किं न स्यादित्यत आह नदेति स्वात्मनि महावाक्यानुसंधानस्यानियतत्वाद्वाक्यस्या
परोक्षधीहेतुत्वाच्च प्रमा नैवेति वाक्यार्थेति महावाक्यार्थ इत्यर्थः स्थूलसूक्ष्मकारणोपाधीनां नेति नेती
त्यादिवाक्यैर्निषेधद्वारा शोधितो यः त्वंपदार्थः स्वप्रकाशचैतन्यात्मकः तस्य पूर्णत्वमाविर्भवति आ

अहमेवेदं सर्वं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक इति श्रुतेः स्वात्मनि ब्रह्मसाक्षात्कार एव मनसः
करणत्वं संप्रतिपन्नेऽस्य तस्यान्यकरणान्तराभावात् प्रसंख्यानेन तु मनः सहकारिभावेनोपयुज्यते वा
क्यार्थभावनापरिपाकसहितमतः करणत्वं पदार्थस्यापरोक्षस्य तत्त्वमुपाध्याकारनिषेधनेन तत्पद
र्थेनाभाविर्भावयतीति भामतीवचनात् ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्या
यमान इति श्रुतावपि ज्ञानप्रसादशब्दितं चित्तैकाग्र्यं हेतुत्वेनैव ध्यानोपादानात् न तु प्रसंख्यानस्य
करणत्वं क्वचिदपि ज्ञानकरणत्वात् नेः कामातुरकामिनीसाक्षात्कारादावपि प्रसंख्यानसह
कृतस्य मनस एव करणत्वोपपत्तेः तेन ज्ञानकरणान्तरकल्पनायोगादिमाद्रुः

र्विर्भावश्च श्रुतिसाक्षात्कार इत्यर्थः (स्वप्रकाशचैतन्यात्मकः) ततो निष्कलं ध्यायमानस्ततो ध्यानात्तं पश्यतीत्यु
क्तियोजना मूलाभिप्रेतध्यानस्य साक्षात्कारकरणत्वं श्रुतमित्युक्तं तदूषयति ज्ञानप्रसादेनेति करणत्वस्य
मात्ज्ञानपदं चित्तपरं ज्ञानस्य प्रसादः ऐकाग्र्यं तथा च ध्यायमानो ध्यानात्मकेन ज्ञानप्रसादेन पश्यतीति श्रुति
योजना विवक्षितेति भावः एवं योजनायां विनिगमकं पूर्वोक्तमिति हि ज्ञानिमनसः करणत्वबोधकवचनान्त
रेत्यभिप्रेत्य प्रसंख्यानमात्रस्य करणत्वं दूषयति नन्विति ॥

सि. ले. त. २२

नच स्वमताभिप्रायेणाऽज्ञप्रमाणविरोधादिति भावः ननु तथापीति शब्दस्य ब्रह्मसाक्षात्कारकरणत्वपक्षे श्रुति।
भाष्यविरोधाभावेपि शब्दप्रमाणस्वभावविरोधान्न महावाक्यं ब्रह्मसाक्षात्कारकरणमित्यर्थः शब्दस्वभावमेव व्
यक्तीवत्स्यापरोक्षज्ञानकरणत्वं साधयति अत्र केचिदिति प्रचयः समूहः प्रचयलब्धं पदमसाधारणैकाग्र्यं तद्वि
तमेव दर्पणान्तर्गृहीतरूपमर्थः यथा चक्षुः स्वतः प्रतिबिम्बानुभवजननासमर्थमपि दर्पणानुगृहीतं सत्तदनु
भवं जनयति तद्वदिति सूचयति चित दर्पणेति शास्त्रीयेति यथाऽऽधानादिजनितसंस्काररहिताग्न्यधिक
रणको होमस्तावदपूर्वं न जनयति अग्न्यधिकरणक होममात्रस्यापूर्वजननस्वभावाभावात् शास्त्रीयसंस्का
रविशिष्टाग्न्याधिकरणक होमस्त्वपूर्वं जनयति तद्वदित्यर्थः ननु दृष्टान्ते शास्त्रबलात्तथा लोकिऽपि तत्प्रकृते

ननु तथापि शब्दस्य परोक्षज्ञानजनकत्वस्वभावस्यनापरोक्षज्ञानजनकत्वं संगच्छत इति चेन्न अत्र केचि
त्वतोऽसमर्थोऽपि शब्दः शास्त्रीयश्रवणमननपूर्वकप्रमयाभ्यासजनितसंस्कारप्रचयलब्धैकाग्र्यैका।
ग्रचित्तदर्पणेऽनुगृहीतोऽपरोक्षज्ञानमुत्पादयति यात्त्रीयसंस्कारसंस्कृतोऽग्न्यधिकरणेऽग्निहो
मोऽपूर्वमिति कल्प्यते तत्र यति शोकमात्मविदिति शास्त्रप्रामाण्यात् अपरोक्षसत्कर्तव्याय ध्यासस्या
परोक्षाधिष्ठानज्ञानं विना निवृत्त्ययोगात्

27

तथा च शास्त्रेणोपलभ्यत इत्यत आह नचेतीति ननु श्रवणाद्युपायाविद्यमानमध्यासस्यशोकोपलक्षितकर्तृत्वाद्य।
ध्यासस्यात्मवेदनान्निवृत्तिरुच्यते तथापि शब्दस्यापरोक्षज्ञानकरणमित्यत आह अपरोक्षेति यथा दृष्टान्ते होमा।
धिकरणस्याग्नेराधानादिसंस्कृतश्रवणाद्युपायानुपपत्त्या शास्त्रीयसंस्कारसहकृताग्न्यधिकरणको होमोऽपूर्वज
नयतीति कल्प्यते तथात्मज्ञानस्यापरोक्षाध्यासनिवर्तकत्वं श्रवणाद्युपायानुपपत्त्या आत्मज्ञानजनकवेदान्तानामे
वापरोक्षज्ञानकरणत्वं कल्प्यत इत्यर्थः अपि यथापीति सत्यपि श्रवणजनितपरोक्षज्ञाने कर्तृत्वाद्यध्यासनिवृत्त
दर्शनात् परोक्षज्ञानमात्रेणाध्यासनिवृत्तौ मननादिविधिवैयर्थ्यप्रसंगाच्च अपरोक्षाध्यासस्य दिग्भ्रमादिषु
दिग्याथात्म्यादिसाक्षात्कारं विना निवृत्त्यदर्शनाच्चेति भावः ॥

कृ. २२

सत्यं शास्त्रमात्रस्य ब्रह्मज्ञानकरणत्वं निषेधति तथापि शास्त्रस्य शास्त्राद्ब्रह्मज्ञानकरणत्वनिषेधपरं तद्वचनं न तु लक्षणा
यापि तत्करणत्वनिषेधपरं औपनिषदत्वश्रुतेर्निरालंबनत्वप्रसंगादिति समाधानमभिप्रेत्याविपक्षे परेषामपिबाध
कत्वं सूचयति मनःकरणत्ववादिनापीति वेदान्तानां लक्षणयापि ब्रह्मबोधकत्वानभ्युपगमे ब्रह्मण एवासिद्ध्यापत्त्या
मनःकरणत्ववादिभिरपि तेषां ब्रह्मज्ञानकरणस्याभ्युपगंतव्यत्वादित्यर्थः परं तु वाक्यजन्यं ब्रह्मज्ञानं परोक्षम
वतां मतेऽस्माकं मते तत्तदपरोक्षमिति विशेषः तदाशयेनाह परोक्षेति वेदान्तानां शास्त्राद्ब्रह्मबोधकत्वनिषेध
परं यद्वाचानभ्युदितमिति वचनमिति व्यवस्थायां श्रुतेरननुकूलयति तस्येति यद्वाचानभ्युदितमितिनिषेधव

मनःकरणत्ववादिनापि शास्त्रस्य निर्विशेषपरोक्षज्ञानकरत्वस्याभ्युपगतत्वेन तस्य यतो वाचो निवर्तन्ते अप्रा
प्य मनसा सहेति श्रुत्यनुरोधेन शाब्दार्थप्राप्तिरूपशक्तिमात्रेण तस्य तत्करणत्वनिषेधे तात्पर्यस्य वक्तव्यतया
शक्यत्वं वक्तुं रूपलक्षणयाप्रवृत्तेन तस्य तत्करणत्वाविरोधात् न च मनसैवानुद्रष्टव्यमिति श्रुतिसिद्धं मनसोपि
तत्करणत्वेन परोक्षत्वं शक्यमिति वाच्यं यान्महमात्माकारजननेपि तदेकाग्र्यस्यैव प्रतिपादितत्वेन हेतुत्वमात्रे
ण तन्नीयोपपत्तेः मनसा ह्येव पश्यति मनसा शृणोतीत्यादौ तथादर्शनात् गीताविवरणे भाष्यकारीयम
नःकरणत्ववचनस्य मतान्तराभिप्रायेण शंकनीयत्वात्

वचनस्येत्यर्थः अप्रमेयेति श्रुत्या ब्रह्मणि विषयेषामानां प्राप्तिर्निषिध्यते सा च प्राप्तिः शक्तिरेव तस्याः शब्दानामौत्प
त्तिकत्वादिति भावः वस्तुत्वं येनेति मनःकरणत्ववादिभिरपीति शेषः तस्येति शब्दस्येत्यर्थः तदिति ब्रह्मसाक्षात्का
रेत्यर्थः ब्रह्मगोचरवृत्तिं प्रतिकरणत्वेन तन्नीयाश्रुत्यर्थः पूर्वोदाहृतश्रुतिविरोधात् किं तु एकाग्र्यस्य मनसः तां।
प्रत्युपादानतया हेतुत्वमात्रं तद्दर्शयन्नाह यान्महमात्माकारजननेपीति तथेति चात्तमनानादौ मनसः कर
णत्वाभावेन हेतुत्वमात्रेणापि तन्नीयादर्शनादिति भावः शमदमादिसंस्कृतं मन एवात्मदर्शने करणमिति गी
ताभाष्यवचविरोधं परिहरति गीतेति मतान्तरेति वृत्तिकारमतेत्यर्थः ॥

सि·ले·
न·
२८

ननु प्रमातृचैतन्याभिन्नत्वरूपस्यार्थापरोक्षत्वस्य जडरूपापरोक्षार्थेऽव्याप्तिः चैतन्यजडयोरैक्यस्य बाधितत्वादित्यत आह
अन्तःकरणेति तदभेदसत्त्वादिति साक्षिभाषितप्रमातृचैतन्याभेदसत्त्वादित्यर्थः तथा चार्थापरोक्षत्वनिर्वचने कल्पि
ताकल्पितसाधारण्येनाभेदस्य विवक्षितत्वेन प्रमातृचैतन्यब्रह्मचैतन्ययोरिव प्रमातृचैतन्यजडयोरकल्पिताभे
दाभावेऽपि जडे सदादिसामानाधिकरण्यानुभवसिद्धकल्पिताभेदसत्त्वान्नाव्याप्तिरिति भावः आन्तरजडपदार्थेषु
प्रमातृचैतन्याभिन्नत्वमुपपाद्य वासापरोक्षार्थेषु तदुपपादयति वासेति अन्तःकरणतद्धर्माणां तदभेदसत्त्वात्
घटादीनां तदभेदसत्त्वाच्च न काप्यान्तरार्थे वा वासार्थे वाऽव्याप्तिरिति संबन्धः घटादीनां तत्तत्स्फुरणीयचैतन्याभेदस
त्वे हेतुमाह वासचैतन्ये तत्तत्स्फुरणीयचैतन्याभेदाभिव्यक्तेरिति ननु वासचैतन्यस्य तत्तत्स्फुरणीयचैतन्यस्य च वा।

अन्तःकरणतद्धर्माणां साक्षिणि कल्पितत्वात् तदभेदसत्त्वात् वासचैतन्ये कल्पितानां घटादीनां वासचै
तन्ये वृत्तिकृततत्स्फुरणीयचैतन्याऽभेदाभिव्यक्त्या तदभेदसत्त्वाच्च न काप्यव्याप्तिः॥

28

स्ततः सदाऽप्यभेदसत्त्वेऽपि तदभिव्यक्तिः कुत इत्यत आह वृत्तिकृतेति वासे विषयावच्छिन्नचैतन्ये चक्षुरादिद्वारा निर्ग
ताया वृत्तेः संसर्गसत्त्वे वृत्तिवृत्तिमतोरभेदाद् वृत्तिमदन्तःकरणस्यापि तत्र संसर्गो लभ्यते तथा च वृत्तिसंसृष्टवास
चैतन्यमेवान्तःकरणसंबन्धात् तत्स्फुरणीयचैतन्यं भवतीत्यनेन प्रकारेण वासचैतन्ये वृत्तिकृततत्स्फुरणीयचै
तन्याभेदाभिव्यक्तिर्भवतीत्यर्थः ननूक्तप्रकारेण बाह्यचैतन्यस्य प्रमातृचैतन्याभिन्नत्वसिद्धावपि घटादीनां
प्रमातृचैतन्याभिन्नत्वमसिद्धमेवेत्याशंक्याह वासचैतन्यकल्पितानामिति वासचैतन्ये तावत् घटादीना
मभेदः प्रागेव सिद्धः तत्र तेषां कल्पितत्वात् तथा च वासचैतन्यस्य वृत्तिकृततत्स्फुरणीयचैतन्याभेदाभिव्यक्ति
दशायां घटादीनामपि तत्स्फुरणीयचैतन्याभिन्नत्वं सिध्यतीति भावः

टी·
२८

ननु कर्तृत्वाद्यध्यासनिवर्तकमपि ब्रह्मात्मत्वसाक्षात्काररूपं ज्ञानं मनसैव संभवति किं शाब्दस्य तत्करणत्वकल्प
नयेति तत्राह औपनिषद इति। अंतरिंद्रियस्य मनसः प्रमात्वप्रमाणत्वेन ब्रह्मण्यलक्ष्यत्वेउपनिषदेकगम्यत्वश्रुति
पादकश्रुतिबाधप्रसंगादिति भावः। नन्वौपनिषदत्वश्रुतिविरोधेन ब्रह्मणि मानान्तराप्रवृत्तौ शाब्दस्वभावविरोधे
न शाब्दस्यापि ब्रह्मसाक्षात्कारजनने प्रवृत्तिर्न संभवति। तथा च ब्रह्मसाक्षात्कारकरणस्यैवालाभात्तस्तु तत्साक्षा
त्कार इत्यत आह शब्दादपीति। तथा च मोक्षशास्त्रप्रामाण्यप्रयोजकत्वात् शाब्दस्यैव साक्षात्कारकरणत्वकल्पनीयमिति भावः।
शास्त्रप्रामाण्यमनुपपत्त्यापि शाब्दस्यापरोक्षज्ञानकरणत्वं साधयति अन्यथेति। इदानीं शाब्दस्यापरोक्षज्ञानज
ननस्वाभाव्यमेवासिद्धं मत्वा नित्यापरोक्षे ब्रह्मणि वेदान्तानां साक्षात्कारकरणत्वं निरुपपादमिति मतान्तरमाह

औपनिषदे ब्रह्मणि मानान्तराप्रवृत्तेः शाब्दादप्यपरोक्षज्ञानमन्यथानिर्मोक्षप्रसंगादित्येके। अन्ये
त्वभावनाप्रचयसहितमेव सन्निदहितस्य मर्थस्यापि मनसो नष्टवनितासाक्षात्कारजनकत्वदर्शनान्निदिध्या
सनसहितेनैव शाब्दस्याप्यपरोक्षज्ञानजनकत्वं युक्तमिति दृष्टान्तानुरोधेन समर्थयन्ते। अपरे त्वपरोक्षार्थ
विषयत्वं ज्ञानस्यापरोक्षत्वं नाम। सर्वस्य निरुक्तेः अर्थापरोक्षत्वं च नापरोक्षज्ञानविषयत्वं येनान्योन्याश्रयो
भवेत्। किन्तु तत्तत्पुरुषचैतन्याभे ॥५॥

अपरे त्विति। नन्विन्द्रियजन्यज्ञानत्वादिकमेव ज्ञानस्यापरोक्षत्वं ब्र
सागोचरशाब्दज्ञानस्य तदभावान्नापरोक्षत्वमिति मतस्थाह ब्रह्मानिरुक्तेरिति। इन्द्रियजन्यत्वादेः स्वप्नप्रमापरिच्छेदा
व्यापकत्वेन निरस्तत्वादिति भावः। नन्वर्थस्यापरोक्षत्वमपरोक्षज्ञानविषयत्वमन्यस्यानिर्वचनात् तथा चान्योन्याश्रयः
अर्थस्यापरोक्षत्वं तद्धीज्ञानस्यापरोक्षत्वं तद्धि ज्ञानस्यापरोक्षत्वं तद्धी चार्थस्यापरोक्षत्वं तदधीनमित्याशंक्यानिर्वच
नमसिद्धमित्यभिप्रेत्याह अर्थापरोक्षत्वं त्विति। तत्तदिति। तत्तत्प्रमातृचैतन्याभिन्नत्वं तत्तत्स्वविषयस्य तत्तत्
प्रमातारं प्रत्यपरोक्षत्वं तत्तत्प्रमातृचैतन्याभिन्नस्य विषयकं ज्ञानं तत्प्रमातुः। तत्तत्प्रमातृचैतन्याभिन्नविष
यस्य परोक्षज्ञानमित्यर्थः। न चार्थापरोक्षत्वादावननुगमइति वाच्यं ज्ञानगतस्यानुगतापरोक्षत्वस्यजातिरूप
स्योपाधिरूपस्य वा प्राङ् निरस्तत्वेन तदभावादेवार्थापरोक्षस्याप्यननुगतस्यासंभवेन तत्संदोषत्वादिति भावः।

यथेति अर्थस्य स्वव्यवहारानुकूलचैतन्याभिन्नत्वमपरोक्षत्वं अस्ति चांतःकरणतद्धर्माणां स्वव्यवहारानुकूलेन सा
क्षिचैतन्येनाभिन्नत्वं तत्र तेषामध्यस्तत्वात् तथा च घटादीनामपि स्वव्यवहारानुकूलेन घटादिगोचरवृत्त्युपहितेन घ
टाद्यधिष्ठानचैतन्येनाभिन्नत्वमस्ति तथा च सुखादेरपि स्वव्यवहारानुकूलेन सुखगोचरवृत्त्युपहितेन साक्षिचैतन्येना
भिन्नत्वमस्तीति न काप्यव्याप्तिः घटादेर्यथा स्वचैतन्ये कल्पितत्वस्य चैतन्याभिन्नत्वं सदा न तथा तेऽपरोक्षत्वं तु सदा नास्तीति
व्यवहारानुकूलत्वस्य तत्र घटादिगोचरवृत्तिदशायामेव घटाद्यधिष्ठानचैतन्यं घटादिव्यवहारानुकूलं भवति न सर्व
देति नातिप्रसंगः ननु तत्तद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभिन्नत्वमपरोक्षत्वमस्तु नाम तथापि ज्ञानापरोक्षं
विनोक्तमेव वृत्तिरूपज्ञानस्य चैतन्याभेदापाभिन्नत्वादित्यत आह तथा चेति चैतन्यस्यैव तत्तदर्थव्यवहारानुकूलत्वेवि
वक्षिते सतीत्यर्थः तथा च ज्ञानापरोक्षत्वमित्यत्र ज्ञानपदं चैतन्यपरमेव न वृत्तिज्ञानपरमिति नानुपपत्तिः दोष इति भावः
तत्तदर्थव्यवहारानुकूलत्वे सतीति तत्तदर्थाभिन्नत्वरूपं ज्ञानापरोक्षत्वं चैतन्यधर्म एवेत्यत्र युक्तिमाह अतएवेति चैत

तथा च चैतन्यधर्म एवेदमापरोक्ष्यं न तन्त्रमिति तेषां तदाकारान्तःकरणवृत्तिधर्मः अतएव सुखादिप्र
काशरूपे साक्षिणि स्वरूपस्य स्वप्रकाशरूपे चैतन्ये चापरोक्ष्यं न च घटाद्येंद्रियकवृत्तौ तदनुभवविरोधः
अनुभवस्य तदवच्छिन्नचैतन्यगतापरोक्ष्यविषयत्वोपपत्तेः

स्वधर्मत्वाभ्युपगमादित्यर्थः तस्य वृत्तिधर्मत्वे तु सुखदुःखादिगोचरापरोक्षत्वमनंगीकाराव सुखदुःखादिभासक
साक्षिचैतन्ये वृत्तिधर्मस्यापरोक्ष्यस्यासंभवाच्च सुखदुःखादेरपरोक्षत्वानुभवविरोधः स्यादिति भावः लक्षणे समंतं
वह्निगोचरानुमितिवृत्त्युपहितेजीवचैतन्ये वह्निव्यवहारानुकूले गतमिति तत्रातिव्याप्तिवारणाय विशेष्यं अनुमिति
वृत्तेः विषयदेशे गमनाभावेन तद्वृत्त्यवच्छिन्नचैतन्यस्य न वह्न्यभिन्नत्वमिति नातिव्याप्तिः घटादिगोचरवृत्त्यभाव
दशायां घटाद्यवच्छिन्नचैतन्ये घटाद्यपरोक्षत्वविरहिते घटाद्यर्थाभिन्नत्वमस्तीति तद्वारणाय समंतं तत्रासतस्यचै
तन्यस्यावृत्तत्वेन घटादिव्यवहारानुकूलाभावान्नातिव्याप्तिरिति भावः नचेति ज्ञानापरोक्षस्य चैतन्यधर्मत्वे घटा
दिगोचरवृत्तौ घटं साक्षात्करोमीत्यादिप्रकारेणापरोक्षत्वानुभवविरोध इत्यर्थः वृत्तिचैतन्ययोस्तादात्म्येन वृ
त्तिसाक्षात्कारत्वानुभवस्य चैतन्यगतापरोक्ष्यविषयकत्वोपपत्तेरित्यर्थः

अर्थापरोक्षत्वलक्षणस्यातिव्याप्तिमाशंक्य निराकरोति नचैवमित्यादिना धर्मेति धर्मादीनामधिष्ठानभूतप्रमातृचैतन्ये
नसहाभिन्नसत्ताकत्वरूपाभेदसत्त्वादिति भावः उद्भूतत्वे सति प्रमातृचैतन्याभिन्नत्वमर्थापरोक्ष्यं उद्भूतत्वं च फल
बलकल्प्यस्वभावविशेषः स च धर्मादेर्नास्तीति परिहारार्थः एवं शाब्दस्थले ब्रह्मसाक्षात्कारे करणत्वाभिधर्यप्रमुपो।
द्घाटं कृत्वा प्रकृतं दर्शयति एवं चेति ज्ञानापरोक्ष्यस्यार्थापरोक्ष्यप्रयुक्तत्वे सतीत्यर्थः अभिन्नत्वादिति जीवरूप।
प्रमातुः ब्रह्माभेदस्य श्रुतिसिद्धत्वादिति भावः उक्तं च ब्रह्मणो जीवाभिन्नत्वं तेन तदुपस्य प्रमातृचैतन्याभिन्नत्ववत्त्वका।
स्यानिकं न भवति किं त्ववास्तवैक्यरूपमित्याशयेनाह तत्त्वमसीति ब्रह्मणो नित्यापरोक्षप्रमातृचैतन्याभेदश्रुति
माह तत्त्वमस्यादिति ब्रह्मणस्तत्त्वतः स्वव्यतिरिक्तप्रमातृचैतन्यमपेक्ष्यापरोक्षत्वं न भवति किं तु साक्षात्प्रमातृचैतन्यस्व
रूपत्वादेकपरोक्षमित्यर्थः ज्ञानापरोक्ष्यमर्थापरोक्ष्यं च प्रकारान्तरेण निरूपयति यद्वेत्यादि तद्विषयाकारवृत्तीति पूर्वा

नवीनः करणाद्धर्माणां ज्ञानादीनामिव धर्माधर्मसंस्काराणामपि साक्षिणि कल्पितत्वाविशेषादपरोक्षा
पत्तिः तेषामनुद्भूतत्वात् उद्भूतस्यैव तदुपस्य चैतन्याभेदः आपरोक्ष्यमित्यभ्युपगमात् एवं च सर्वेषु
वृत्तिचैतन्याभिन्नत्वायत्तत्वात्तदपरोक्षत्वाद्बोधेति श्रुत्वा स्वतन्त्रज्ञानापरोक्ष्यं ज्ञेयापरोक्ष्यार्थविषयत्वादर्थरूपा
पित्रसत्तानस्यापरोक्षत्वस्याचोपपत्तिरिष्टैकाएवं तेनाह यद्वेत्यादि तद्विषयाकारवृत्त्या ज्ञानापरोक्ष्यार्थविषयत्वं ज्ञान
स्यापरोक्ष्यं स्वरूपसत्त्वापरोक्षस्वरूपत्वाद्व्यापनात् स्वविषयत्वलक्षणस्वप्रकाशत्वनिषेधात् किंतु
पातनदर्थस्यत्वव्यवहारानुकूलचैतन्याऽभेदोऽर्थापरोक्ष्यमेवं तत्तद्व्यवहारानुकूलचैतन्यसत्ताऽदर्थाभेदोऽस्या
तीत्ताज्ञानापरोक्ष्यलक्षणमव्याप्त्या दूषयति नापरोक्षेति स्वरूपसत्त्वापरोक्षस्वरूपे स्वरूपज्ञानेऽव्यापनादित्यर्थः
ननु आत्मस्वरूपस्याद्वाभ्युपगमात्स्वादिचैतन्यरूपस्य स्वप्रकाशत्वाभ्युपगमात् स्वप्रकाशत्वस्य च स्वविषयकत्वरूप
त्वात् स्वरूपसत्त्वविषयकत्वेन तदपरोक्षस्वरूपस्वरूपज्ञानेनिरवद्यवादमिमतमाह स्वविषयकत्वलक्षणेति एक।
स्मिन् चैतन्ये विषयविषयीभावलक्षणसंबंधो न भवति संबंधस्य द्विनिष्ठत्वात् स्वविषयत्वं विनापि स्वसत्तायाः प्रयुक्त
संशयाद्ययोग्यत्वादिलक्षणस्वप्रकाशत्वस्याकरे प्रतिरूपितत्वादिति भावः किं तर्हि ज्ञानापरोक्ष्यमिति पृच्छ
ति किं त्विति ज्ञानापरोक्ष्यनिर्वचनं प्रतिदृष्टान्तव्याजेन प्रथममर्थापरोक्ष्यं निर्वक्ति

सि॰ले॰
त॰
३०

स्यादेवं स्फुरतीत्युक्तः एवं स्फुरतीत्याकारानुभवप्रमादापेवमुक्तः त्वादिप्रत्यये स्फुरणविषयाभेदाभिव्यक्तिमत्वसत्वात् नच घ
टं स्फुरतीत्यनुभवे घटस्य स्फुरणाश्रयत्वमेव भाति न तु स्फुरणाभेद इति वाच्यं घटं स्फुरतीति प्रयोगे देवदत्तो गच्छती
त्यत्र गमनकर्तृः भिन्नो देवदत्त इति वाक्यार्थवत् स्फुरणाश्रयाभिन्नो घट इति वाक्यार्थस्यैव वक्तव्यत्वेन घटः स्फुरतीति
प्रयोगमूलभूते घटः स्फुरतीत्यनुभवेपि स्फुरणाश्रयभूतचिदात्माभिन्नत्वं तत्पार्थघटस्य भानावश्यंभावात् नच घ
टस्य स्फुरणाश्रयस्य स्फुरणाश्रयाभेदाभिव्यक्तावपि स्फुरणाभेदाभिव्यक्तिर्यायिनोपपादितैवेति वाच्यं घटस्य
स्वरूपमिति प्रमत्वं हि घटमेव घटस्य स्वरूपत्वापपत्त्या विषयीकरोति तत्पार्थघटः स्फुरतीति प्रमत्वमपि घटादिस्फु
रितस्य तार्थघटाधिष्ठानभूतमनावृतचिदात्मानमेव स्वप्रकाशाविदात्माश्रितस्फुरणरूपेण विषयीकरोतीत्य
भ्युपगमेन घटे स्फुरणाश्रयाभेदः भानस्यैव स्फुरणाभेदभानरूपत्वात् एतदुक्तं भवति घटस्य स्वरूपमिति

विषयावच्छिन्नचैतन्यगताज्ञाननिवर्तनात्तमत्यात्तथाज्ञानेनावृतत्वस्य विषयचैतन्यस्यानावृतेनदृ
श्यवच्छिन्नसाक्षिचैतन्येनाभेदाभिव्यक्तेरभावादापरोक्ष्याप्रसक्तेः ॥

30

शब्दप्रयोग एव च घटतत्स्वरूपयोर्भेदाभासत्वेन तन्मूलभूते घटस्य स्वरूपमिति प्रत्यये भ्रमयात्वमत
स्य भ्रमत्वप्रसंगात् घटतत्स्वरूपयोर्भेदाभावात् नच तस्य भ्रमत्वमभ्युपगंतुं शक्यं तत्र बाधकाभावात् ए
वं स्फुरतीति शब्दप्रयोग एव स्वप्रकाशात्मनः स्फुरणतादात्म्यप्रभावेन भेदभानं न तु स्फुरतीति प्रत्यये।
नन्वस्फुरणं द्वितीयानुपलंभादिति नच ब्रह्मगोचरशाब्दवृत्तेर्विषयसंसृष्टत्वाद्विषयगताज्ञाननिवर्त
कत्वमत्वदर्शनेन हृदयादिगोचरशाब्दवृत्तेरपि विषयसंसर्गाविशेषेण कथं तस्यास्तद्विषयगताज्ञान
निवर्तकत्वमतत्वेनेति वाच्यं हृदयादिगोचरशाब्दवृत्तेः सत्यपि विषयसंसर्गे तस्या वृत्तेरज्ञानानि
वर्तकत्वप्रयोजकाभावेनाज्ञानानिवर्तकत्वस्य प्रथममुपरिष्टे दोवस्यानेदर्शितत्वादितिभावः ॥

ब्र॰
३०

ननु हृदयनाडीधर्माधर्मादिगोचरशाब्दवृत्तिरन्तःकरणे शरीरं व्यापिनी जायमाना दैवयोगात् हृदयनाड्यादिव
च्छिन्नान्तःकरणप्रदेशे यदि जायेत तदा हृदयादिरूपविषयावच्छिन्नचैतन्यस्य हृदयादिगोचरशाब्दवृत्त्यवच्छिन्न
स्य चाभेदाभिव्यक्तिरपरिहार्या घटादिस्थले इव वृत्तेः विषयसंसर्गे सति वृत्तिविषयावच्छिन्नचैतन्ययोरभेदाभिव्यक्तेः।
स्वीकारात् तथा च हृदयादिगोचरशाब्दज्ञानानुमित्यादिष्वभिन्नचैतन्यरूपे परोक्षज्ञाने हृदयाद्यर्थाभिन्ने हृदयादिव्यव।
हारानुकूले ज्ञानापरोक्षत्वलक्षणमतिव्याप्तं तथा हृदयादिरूपे परोक्षार्थे स्वव्यवहारानुकूलशाब्दादिवृत्त्यवच्छिन्न
चैतन्याभिन्नेऽर्थापरोक्षत्वलक्षणमतिव्याप्तमिति शंकते ननु तत्त्वमिति यथोक्तचैतन्ययोरभेदाभिव्यक्तिरिष्यते तयोरभ
योरप्यनावृततत्त्वमस्यादिजन्यान्तरचैतन्यप्रमाकरणदशायां तयोरभेदस्य प्रमत्तत्वलक्षणाभिव्यक्तेरयोगात्तथा च
हृदयादिगोचरशाब्दवृत्तिस्थले नातिव्याप्तिः न च चैतन्यस्यावृतत्वादिति परिहरति न परोक्षवृत्तेरिति आपरोक्षा

ननूक्तज्ञानार्थयोरपरोक्षत्वं हृदयादिगोचरशाब्दवृत्तितद्विषययोरतिव्याप्तं तत्र दैवात्कदाचिद्वृत्तिविषय
संसर्गे सति तद्रूपावच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चाभेदाभिव्यक्तेरवर्जनीयत्वादिति चेन्न परोक्षवृत्ते

प्रसक्तेरिति परोक्षहृदयादिविषयस्य हृदयादिगोचरशाब्दवृत्त्यवच्छिन्नचैतन्यरूपपरोक्षज्ञानस्य चेति शेषः तथा च
हृदयादिगोचरशाब्दवृत्त्यवच्छिन्नचैतन्यरूपपरोक्षज्ञानस्य हृदयादिव्यवहारानुकूलज्ञानत्वे सत्यपि हृदयादिवि
षयेण सहाभिव्यक्त्यभावादभिव्यक्तानन्तर्याभिन्नत्वे सति तत्तद्व्यवहारानुकूलज्ञानत्वलक्षणं ज्ञानापरोक्षत्वं
नास्ति तथा हृदयाद्यर्थस्यापि स्वव्यवहारानुकूलशब्दवृत्त्यवच्छिन्नशब्दादिचैतन्याभेदसत्त्वेऽपि तदभेदाभिव्यक्त्यभा।
वेन स्वव्यवहारानुकूलचैतन्याभेदाभिव्यक्तिशालित्वरूपमर्थापरोक्षत्वं नास्तीत्यर्थः न चाहं सुखी अहं दुःखीत्याका
रको सुखादिसाक्षिणि सुखदुःखादिरूपविषयाभेदो विद्यमानोऽपि नाभिव्यज्यते सुखादिसाक्षिणो जीवस्य सुखा
देश्चाधाराधेयभावप्रतीतेः तथा च सुखदुःखादिप्रमत्वेऽप्यभिव्यक्तविषयाभेदाभावादव्याप्तिरिति वाच्यं घटादिव
मत्त्वरूपेण घटादिस्फुरणे घटः स्फुरति पटः स्फुरतीत्याकारानुभववन्मादृशघटाद्यर्थाभेदाभिव्यक्तिमत्त्वस्यैव।

सि. ले. टी. ३२

तमिति द्वेष्यं प्रतिजीवप्रतियोगिकभेदाप्रयोजकत्वादित्यर्थः तं प्रतिजीवानावरकस्यापि जीवभेदापादकत्वं किं न
स्यादित्यत आह यं प्रतीति यं जीवं प्रति पटज्ञानं विषयचैतन्यावारकं तं प्रत्येव तस्याज्ञानस्य स्वाश्रयभूतविष
यचैतन्यप्रतियोगिकभेदापादकत्वाभ्युपगमादित्यर्थः उक्तव्यवस्थायां नियामकमाह अत एवेति यं प्रतिप
टज्ञानमित्यादिव्यवस्थाभ्युपगमादेव चैत्रस्य घटापरोक्षत्वानुभवानुपपत्तिः स्यादिनेति संबंधः घटावच्छि
न्नचैतन्ये चैत्रं प्रति घटचैतन्यावरकमज्ञानं यथावर्त्तते तथा मैत्रं प्रत्यपि घटचैतन्यावारकमज्ञानं तत्रा
स्ति तथा च चैत्रीयघटज्ञानेन चैत्रस्य घटाज्ञाने चैत्रं प्रति स्वाश्रयभूतविषयचैतन्यप्रतियोगिकभेदापाद

यं प्रत्यावरकं तस्य तं प्रत्येव स्वाश्रयभेदापादकत्वात् अत एव चैत्रज्ञानेन तस्य घटाज्ञाने निवृत्ते ऽनिवृ
त्ते मैत्राज्ञाने मैत्रं प्रत्येव विषयचैतन्यस्य भेदापादकमिति चैत्रस्य घटापरोक्षत्वाऽनुपपत्तिरपि ॥

31

ननु मैत्राज्ञानं चैत्रं प्रति घटचैतन्यानावारकमपि चैत्रं प्रति स्वाश्रयीभूतचैतन्यप्रतियोगिकभेदापादकं ॥ टीका

के निवृत्ते सति चैत्रीयघटज्ञानेनानिवृत्तं तु घटचैतन्यगतं मैत्रं प्रति घटावारकाज्ञानं मैत्रं प्रत्येव स्वाश्रयभूतघटचै
तन्यप्रतियोगिकभेदापादकं तथा सति चैत्रीयघटज्ञानेन निवृत्ते सति तत्कृतभेदनिवृत्तावपि चैत्रस्य घटचै
तन्यस्य च मैत्राज्ञानकृतभेदसत्त्वेनाभेदाभिव्यक्त्यभावात् चैत्रस्य घटापरोक्षत्वानुभवानुपपत्तिरेव स्यादतो मैत्राज्ञा
नं मैत्रं प्रत्येव चैत्रं प्रति स्वाश्रयभेदापादकं न भवति चैत्रं प्रति स्वाश्रयचैतन्यानावारकत्वादिति वक्तव्यं तथा
चोक्तव्यवस्थासिद्धेरित्यर्थः ॥

ई. ३२

र्थस्य सर्वव्यवहारानुकूलचैतन्याभेदाभिव्यक्तिमत्त्वमेवापरोक्ष्यं न तु तादृशाभेदवत्त्वमात्रमित्यत्र लिंगमाह अत
एवेति अभेदाभिव्यक्तेरेवापरोक्षत्वप्रयोजकत्वस्वीकारे देवेत्यर्थः संसारेति तत्त्वसाक्षात्कारात्पूर्वकाल इत्यर्थः
जीवस्य ब्रह्माभेदे सत्यपीत्यनेन ब्रह्मणः सर्वव्यवहारानुकूलजीवचैतन्याभिन्नत्वे सत्यपीत्यर्थो विवक्षितः तथा च सं
सारदशायां सर्वव्यवहारानुकूलजीवचैतन्याभिन्नस्यापि ब्रह्मणो जीवं प्रत्यपरोक्षत्वाभावस्तयोरभेदाभिव्यक्त्यभा
वादेवेति वक्तव्यं तथा चाभेदाभिव्यक्तेरपरोक्षप्रयोजकत्वं युक्तमिति भावः नचैवमिति अज्ञानकृतभेदस्या
भेदाभिव्यक्तिप्रतिबंधकत्वादित्यर्थः असंभवादिति जीवं साक्षात्करोमि जीवो मम परोक्ष इति जीवगोचरव्यवहा
रानुकूलं ज्ञानं ब्रह्मणो मायोपाध्युपहितं ब्रह्मचैतन्यमेव तथा च ब्रह्मकर्तृकव्यवहारविषयस्य जीवस्य ब्रह्मक
र्तृकव्यवहारानुकूलज्ञानाश्रयब्रह्मचैतन्याभिन्नत्वे सत्यप्यभिव्यक्त्यभेदस्याभिव्यक्तत्वाभावात् जीवस्य ब्रह्म प्रत्यपरो

> अत एव जीवस्य संसारदशायां वस्तुतः सत्यपि ब्रह्माभेदे न तदापरोक्ष्यं अज्ञानावरणकृत
> भेदसत्त्वात् न चैवं ब्रह्मणोऽपि जीवापरोक्ष्यासंभवादसर्वज्ञत्वापत्तिः अज्ञानस्येश्व
> रं प्रत्यनावारकत्वात् प्रत्यग्जीवं भेदाऽज्ञानाभावात् तदज्ञानं

क्ष्यं न संभवति न च ब्रह्मणो जीवगोचरापरोक्षत्वासंभवेऽपि न सर्वज्ञत्वभंगः जीवगोचरपरोक्षज्ञानमात्रेणापि
तत्संभवादिति वाच्यं ईश्वरस्य परोक्षज्ञानानंगीकारादिति भावः अज्ञानं हि जीवधर्मिकब्रह्मप्रतियोगिकभे
दप्रयोजकं जीवस्य नाहं ब्रह्मेति ब्रह्मभेदानुभवसत्त्वात् न तु ब्रह्मधर्मिकजीवप्रतियोगिकभेदप्रयोजकं ब्रह्मणो
नाहं जीव इत्यननुभवे मानाभावात् तथा च ब्रह्म प्रति जीवस्य ब्रह्माभेदाभिव्यक्तिप्रतिबंधकस्याज्ञानकृतभेदस्याभावा
त् नोक्तदोष इति परिहरति अज्ञानस्येति अनावारकत्वादिति ईश्वरस्याहमज्ञ इत्यननुभवे मानाभावादज्ञानमीश्वरं प्रति
जीवावारकं न भवति न चेश्वरस्यापि लीलाविग्रहशरीरकव्यवहारकाले तदीयैर्वचनैस्तस्याज्ञानानुभवोऽस्तीति
गम्यत इति वाच्यं तदीयस्य तदीयाज्ञानगमकवचनस्यान्यथासिद्धेरीश्वरस्य परिच्छेदे प्रमाणत्वादिति भावः ॥

सि॰ले॰
टी॰
३२

ब्रह्मगोचरवृत्तेः स्वविषयसंसर्गनियमे कारणमाह सर्वोपादानभूतेति ज्ञायमानस्य सर्वस्य ब्रह्मसंसर्गनियमे स
ति ब्रह्मगोचरवृत्तेः स्वविषयसंसर्गनियमे किं वक्तव्यमित्याशयेन सर्वोपादानेत्युक्तं कार्यस्योपादानसंसर्गनि
यमात्तथा च ब्रह्मगोचरवृत्तेर्नानुमेयवह्न्यादिगोचरानुमितिवृत्तितुल्यतेति भावः आपरोक्ष्यं चेति ननु ज्ञाना
परोक्षस्याज्ञाननिवृत्तावप्रयोजकत्वमत एवेदं तज्जन्यज्ञानस्यापरोक्षत्वे प्रसाधनमभिन्नत्वाद्वा परोक्षत्वादेर्व्यभि
ति चेन्न अज्ञाननिवर्तकज्ञानमपरोक्षरूपमिति नियमस्य चक्षुरादिजन्यज्ञाने घटपटस्य ब्रह्माज्ञानानिवर्तके ब्रह्म
गोचरशाब्दज्ञाने व्यभिचारवारणार्थं तथा तत्साधनस्यापर्यवसितोपपत्तेः मूलाज्ञाननिवर्तके ब्रह्मगोचरशाब्दज्ञा

सर्वोपादानभूतस्वविषयब्रह्मचैतन्यसंसृष्टमेवोत्पद्यत इति तस्याज्ञाननिवर्तक
त्वमज्ञाननिवृत्तौ तन्मूलकभेदप्रविलयाद्वापरोक्ष्यं चेत्युपपद्यतेतराम्॥
नन्वेवमप्यपगृहीतवेदान्तजन्येनापि तज्ज्ञानेन मूलाज्ञान
निवृत्त्यापरोक्ष्यं किं न स्यात्॥

32

नेत्यापरोक्ष्यस्य तन्द्वैतं पश्य[illegible]त्यादिश्रुत्या ब्रह्मसाक्षात्करोमीति विद्वदनुभवेन च सिद्धस्य तत्त्वं तस्य साधनं
विना अनुपपत्तेश्चेति भावः घटादौ घटादिगोचरवृत्तिकालस्यापरोक्ष्यं तद्वृत्त्युपरमे तु पुनरज्ञानान्तरकृतभेद
प्राप्त्या लब्धव्यवहारानुकूलचैतन्याभेदाभिव्यक्त्यभावान्नापरोक्ष्यं ब्रह्मणि तु मूलाज्ञाननिवृत्तौ पुनरावरणकृत
भेदासत्त्वाद्ब्रह्मसाक्षात्कारानन्तरं सदैवापरोक्ष्यमिति विशेषं सूचयति तरामिति नन्वेवमप्यपगृहीतेति निय
मेन यज्ज्ञानविषयसंसृष्टतयोदेतीति तज्ज्ञानं निवर्तयमेवेति नियमोपगमे सतीत्येवं शङ्काशयः आपातज्ञान
स्यापि स्वविषयब्रह्मसंसर्गितया वक्तव्यत्वादिति भावः

टी॰
३२

मज्ञान

अन्यपरोक्षज्ञानमज्ञाननिवर्तकमिति तदीयाज्ञानस्य अज्ञाननिवर्तकत्वेऽप्यपरोक्षत्वं प्रयोजकमिति वक्तुं न शक्यते
ज्ञानगतापरोक्षत्वस्यैवाज्ञाननिवृत्त्यधीनत्वात् न च मास्तु ज्ञानापरोक्ष्यस्याज्ञाननिवृत्तिप्रयोजकत्वमिति वाच्यं
तथा सति ज्ञानमात्रस्याज्ञाननिवर्तकत्वापत्त्यापरोक्षज्ञानस्यापि अज्ञाननिवर्तकत्वप्रसंगादित्याशयेन शंक
ते नन्वेवमिति एवंशब्दार्थमेवाह वृत्तीति वृत्त्यवच्छिन्नचैतन्यस्य रूपज्ञाने घटादिरूपविषयेऽवच्छिन्न
चैतन्यविषयावच्छिन्नचैतन्ययोरभेदाभिव्यक्तिर्घटितस्येत्यर्थः अज्ञाननिवृत्तिप्रयोज्यत्वइति प्रमातारं प्रति
विषयचैतन्यावरणद्वारा विषयचैतन्यप्रतियोगिकभेदापादकस्याज्ञानस्य निवृत्तिं विना अर्थस्य ज्ञानस्यैवाप्रय

नन्वेवं प्रतिविषयचैतन्याभेदाभिव्यक्तिलक्षणस्यापरोक्ष्यस्य विषयचैतन्यगताज्ञाननिवृत्तिप्रयो
ज्यत्वे तस्याज्ञाननिवृत्तिप्रयोजकतायोगात् ज्ञानमात्रमज्ञाननिवर्तकं भवेदिति चेत् न मत ज्ञान
मुत्पद्यमानं स्वकारणमहिम्ना विषयसंसृष्टमेवोत्पद्यते तदेवाज्ञाननिवर्तकमिति विशेषणा ऐं
द्रियकज्ञानानां तथात्वात् एवं च शब्दादुत्पद्यमानमपि ब्रह्मज्ञानं

रोक्ष्यासंभवस्योक्तत्वादापरोक्ष्यस्याज्ञाननिवृत्तिप्रयोज्यत्वमित्यर्थः ज्ञानस्याज्ञाननिवर्तकतायामापरो
क्ष्यप्रयोजकताभावेऽपि न हानिः प्रयोजकान्तरस्य प्रथमपरिच्छेदान्ते दर्शितत्वादित्याशयेन परिहरति ।
नेति तथात्वादिति संनिकर्षरूपकारणमहिम्ना विषयसंसृष्टतयैवोत्पद्यमानत्वादित्यर्थः अनुमित्या
दि वृत्तीनां तथात्वेनातिप्रसंगाभावाच्चेत्यपि द्रष्टव्यं नन्वनुमेयवह्न्यादिगोचरानुमितिवृत्तेरिव ब्रह्मगो
चरशाब्दवृत्तेरपि स्वविषयभूतेन ब्रह्मचैतन्येन संसर्गाभावान्मूलाज्ञाननिवर्तकत्वं न स्यात् तथा च तत्त्वज्ञा
नानन्तरमपि ब्रह्मापरोक्ष्यं न स्यादित्यत आह एवं चेति एवमेवेत्यर्थः ॥ ऐन्द्रियकवृत्तिवदेवेति यावत् ॥

सि· ले·
त·
३३

घटाद्यवच्छिन्नचैतन्यस्य घटादिवृत्तिविषयत्वं पूर्वोक्तदोषमाशयति तदभावइत्यादिना चैतन्यस्य घटादिवृत्तिविष
यत्वाभावे सतीत्यर्थः ननु यद्विघटमात्रविषयकज्ञानेन घटावच्छिन्नचैतन्यविषयकाज्ञाननिवृत्तिर्न संभवति
तयोः समानविषयकत्वाभावात् तर्हि घटज्ञानेन सहाज्ञानस्य समानविषयकत्वसंपत्तये अज्ञानमपि घटादिज
डमात्रविषयमेवास्त्वित्याह पूर्ववादी जडस्येति जडस्य जडत्वादेव प्रमाणेनैव तद्भ्रमापाम प्रकाशोपपत्त्याज
डस्याप्रकाशार्थमावरणकल्पनायोगादित्यर्थः कृतमफलं तथा च वेदांतजन्यज्ञानवत् घटादिज्ञानस्य ब्रह्मचै
तन्यविषयकत्वाबसंभावेन मूलाज्ञानसमानविषयकत्वात्तेनापि तन्निवृत्तिप्रसंगइति भ्रांतं तत्रासिद्धेः।
त्तीयकते न चेति तर्हि वेदांतजन्यज्ञानमपि ब्रह्माज्ञाननिवर्तकं न स्यादिति पूर्ववादी दूषयति वेदांतजन्येति

तदभावे घटविषयं ज्ञानं तदवच्छिन्नचैतन्यविषयमज्ञानमिति भिन्नविषयत्वाज्ज्ञानेन तन्निवृत्तेर
योगात् जडे आवरणकृत्याभावेन घटस्याज्ञानाविषयत्वात् न च घटादिवृत्तेस्तदवच्छिन्नचैत
न्यविषयत्वेप्यविच्छिन्नानंदाकारभावान्न ततो मूलाज्ञाननिवृत्तिरिति वाच्यं वेदांतजन्यसाक्षात्कारे
पि तदभावात् नहि तत्राविच्छिन्नत्वमानंदत्वं वा कश्चिदस्ति प्रकारः वेदांतानां संसर्गागोचरप्रमाजनक
त्वलक्षणाखंडार्थत्वहानापत्तेः न च वेदांतजन्यज्ञानादेव तन्निवृत्तिनियम इति वाच्यं लक्षणाज्ञान
निवर्तकत्वप्रयोजकरूपस्य ज्ञानांतरेपि सद्भावे तथानियमस्य वक्तुमशक्यत्वात्॥

अखंडत्वमनवच्छिन्नत्वं वेदांतजन्यज्ञानस्याखंडत्वादिधर्मवैशिष्ट्यावगाहित्वोपगमे बाधकमाह वेदांतनामिति
मूलाज्ञाननिवर्तकज्ञानस्य वेदांतजन्यत्वमपि विशेषणं विवक्षितमतो घटादिज्ञानेनातिप्रसंग इत्याशयवती
माशंकामनूद्य दूषयति पूर्ववादी न च वेदांतेत्यादिना वेदांतजन्यज्ञाने लक्षणस्य मूलाज्ञाननिवर्तकत्वे प्रयोज
करूपस्य मूलाज्ञानसमानविषयकत्वस्य ज्ञानिश्चयरूपत्वाप्रतिबद्धत्वलक्षणस्य निदिध्यासनपरिपाककाले।
ले च घटादिजन्यघटादिज्ञानेपि सत्त्वे सति वेदांतजन्यज्ञानादेव मूलाज्ञाननिवृत्तिर्न तु घटादिज्ञानादिति नि
यमस्य वक्तुमशक्यत्वात् वेदांतजन्यत्वस्यापि सत्त्वानिश्चयरूपत्वादेव प्रयोजकविशेषणत्वे गौरवान्मानाभावाच्चेति भावः

उ·
३३

33

सत्तानिश्चयरूपत्वनिवर्तकज्ञानविशेषणमतो नोक्तानि प्रसंगादुक्तिं शंकते नचतदपीति विचारप्राचीनमध्ययनगृ
हीतवेदांतजन्यज्ञानं नमानमित्यर्थः विशेषणमभ्युपगम्याप्यतिप्रसंगमाह तथापीति श्रवणनिवद्धत्वमपि निवर्तक
ज्ञानविशेषणमतो नोक्तानि प्रसंगोपीति समाधत्ते नमननमपीति ननु मननादेर्विक्षेपशांतिःतासंभावनाविपरी
तभावनानिवृत्त्यर्थत्वे यस्याविद्याधिकारिणो जन्मांतरीयमननादिसहितश्रवणानुष्ठानेन समस्तो विक्षेप
दोषो निरस्तः तस्योपदेशमात्रेणापि सत्तानिश्चयरूपमप्रतिवद्धं च ब्रह्मज्ञानं जायते तत्पापाच तस्येह जन्मनि
श्रवणमननाद्यनुष्ठानं विनापि मूलाज्ञाननिवृत्तिः ब्रह्मापरोक्षं च स्यादित्यत आह भवांतरेमेति तथाचेष्टा

नचलत्सत्तानिश्चयरूपत्वाभावात् ज्ञाननिवर्तकमिति वाच्यं तथापि कृतश्रवणस्य निर्विचिकित्स
शाब्दज्ञानेन तन्निवृत्त्या मननादिवैयर्थ्यापत्तिरिति नेत्तस्यापि श्रवणान्निर्विचिकित्सज्ञानेऽपि चित्तविक्षेप
दोषेण प्रतिबंधात् अतस्तन्निवृत्त्या तन्निरावरणे मननादिध्यासननियमविध्यर्थानुष्ठानस्यापे
क्षत्वात् भवांतरीयमननाद्यनुष्ठाननिरस्तचित्तविक्षेपस्योपदेशमात्रात् ब्रह्मापरोक्षस्य प्रमाणत्वा
च्चेत्याहुः अयोग्यतममपिकृतनिदिध्यासनस्य वेदांतजन्यब्रह्मज्ञानेनैव घटादिज्ञानेनापि ब्रह्माज्ञाननिवृ।
त्तिः किं न स्यात् नचतस्य ब्रह्माविषयत्वाज्ञततो ब्रह्माज्ञाननिवृत्तिरिति वाच्यं घटः सन्नित्यादिबुद्धिवृ
त्तेः सद्रूपब्रह्मविषयत्वोपगमात् नचतत्र घटाद्याकारवृत्त्याविद्धत्वाज्ञाननिवृत्तेरुक्तत्वात्: स्फुरणादेव त
दवच्छिन्नचैतन्यस्याभिव्यक्तिप्रकाशाने न तस्य घटाद्याकारवृत्तिविषयत्वमिति वाच्यं॥

पत्तिरितिभावः अयोग्यतममपीति विक्षेपदोषनिवृत्त्यर्थं मननाद्यपेक्षणमपीत्यर्थः कृतनिदिध्यासनस्याधिका
रिणो घटादिज्ञानेनापि मूलाज्ञाननिवृत्तिः किं न स्याद्घटादिवृत्तेरपि मूलाज्ञानविषयकत्वाविशेषादिति।
शेषाभिप्रायः मूलाज्ञानघटज्ञानयोः समानविषयत्वमसिद्धमिति सिद्धांतिनः शंकामनूद्य निराकरोति नच
तस्येति घटादिज्ञानस्येत्यर्थः घटः सन्नित्याकाराया वृत्तेर्ब्रह्मचैतन्यविषयकत्वाभ्युपगमाच्चासिद्धइति
सिद्धांती शंकते नचतत्रेति तत्रेत्यादि स्फुटत्वं घटादिपरं तस्येति ब्रह्मण इत्यर्थः

सि. ले. टी. ३४

घटादिज्ञानस्यापि वेदान्तजन्यज्ञानस्येव मूलाज्ञानसमानविषयकत्वादिति भावः । अत्राहुरिति घटादिज्ञानमपि
मूलाज्ञाननिवर्तकं स्यात् तत्समविषयकत्वाद् वेदान्तजन्यज्ञानवदिति चोद्येन हेत्वसिद्धिमाहुरित्यर्थः । अस्यात्मनो
रूपं संदृशे संदर्शनविषयत्वे चक्षुषो योग्यत्वेन न तिष्ठति रूपादिहीनत्वात् । अतो न कश्चिदेनमात्मानं चक्षुषा पश्यति पराञ्चि
पराग्विषयाणि खानि इन्द्रियाणि व्यतृणद् हिंसितवान् ईश्वरः जडार्थविषयकत्वेनैव करणेन सृष्टवानिति या
वत् । तस्मात्तथा सृष्टत्वात् पराङ् पराञ्चं सर्वलोक इन्द्रियैरुपलभते न प्रत्यगन्तरात्मानं चैतन्यस्वभावमित्यर्थः । न च
चक्षुषा गृह्यत इत्यादिश्रुतिवाक्यादिपदार्थः । तस्येति चैतन्यस्येत्यर्थः । ननु पराग्दृष्टियोग्यतोपदेशादुपनिषदेक

अत्राहुराचार्याः । न चैतन्यं चक्षुरादिजन्यवृत्तिविषयः । न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति क-
श्चिदेनं पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन् इत्यादिश्रुत्या तस्य परमात्मनो
दिव चक्षुराद्ययोग्यत्वोपदेशादौपनिषदमिति विशेषणाच्च । न च सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे
व्यवस्थिते इत्यादिवार्त्तिकविरोधः । तस्य घटाद्याकारवृत्तिदर्पणे समावरणाभिभवात् तत्प्रतिभासरूपत्व
सत्त्वे च सन्निति घटव्यवहारं भवतीत्युपचारकघटादिवृत्तिवेद्यत्वपरत्वात् ।

गम्यत इत्यत्र वक्ष्यमाणरूपेण चैतन्यं घटादिवृत्तिविषयो न भवतीत्युपपत्ते तर्हि वार्त्तिकविरोध इति शंकते न च सर्वेति
मयहस्तप्रतीपत्तेन सर्वं सदिमेव प्रतीपत्ते तथा चानुभवबलात् सद्रूपं ब्रह्म सर्वप्रत्ययवेद्यतया व्यवस्थि
तमित्यर्थः । चैतन्यस्य सर्वप्रत्ययवेद्यत्वं गौणमेव वार्त्तिककारेणाभिमतं न च घटादिवन्मुख्यमित्युदाहृत्य श्रु
तिविरोधात् तथा च न वार्त्तिकविरोध इति समाधत्ते तस्येति वार्त्तिकवचनस्येत्यर्थः । यथा घटस्य घटत्वो
चितसंबन्धीन व्यवहारविषयत्वं तथा घटाद्यधिष्ठानसद्रूपब्रह्मणोऽपि घटादिसंबन्धीन व्यवहारविषयत्व
मस्तीत्यनेन गुणेन सद्रूपं ब्रह्म घटादिप्रत्ययवेद्यमिति वार्त्तिककारेणोच्यत इत्यर्थः । न चैवं परोक्षवृ
त्तिविषये घटावरणाभिभवाद् उक्तगतिस्तत्र भवतीति वाच्यम् । वार्त्तिके प्रत्ययपदस्यावरणाभिभावक

सिद्धान्ते पद्मपादाचार्यमतम् ॥

पृ. ३५

नहि वेदान्तजन्यज्ञानेनैतं तं प्रत्यप्रयोजकं न देव घटादिज्ञानेनास्तीति शंकाते न घटाद्याकारेति अवच्छिन्नत्वं कल्पि
तत्वे हेतुः अनवच्छिन्नत्वस्य सत्वे हेतुः घटादिवृत्तीनां कल्पितचैतन्यविषयकत्वेन सत्यब्रह्मविषयकत्वाभावा।
दित्यर्थः घटादिवच्छिन्नचैतन्यं कल्पितमित्यत्र चैतन्यांशस्याकल्पितत्वं कल्पितत्वं वा विवक्षितं तत्राद्य उत्साह॥
तत्वेति अवच्छिन्नचैतन्यस्य इत्यर्थः अवच्छिन्नचैतन्यांशस्य घटादिवृत्तिविषयस्याकल्पितत्वं यन्मूलाज्ञानविषय।
ब्रह्मचैतन्यं तद्रूपत्वादित्यर्थः तथा च घटाद्यवच्छिन्नचैतन्यगोचरवृत्तेरपि निवर्तित्वाभिमतमूलाज्ञानस
मानविषयकत्वं तद्रूपं वेदान्तजन्यज्ञाने तं प्रयोजकमस्तीति भावः द्वितीयकल्पेपि घटादिवृत्तौ तं प्रयोज
कमस्तीति दर्शयन्नुक्तकल्पं दूषयति तस्य कल्पितत्व इति अवच्छेद्यचैतन्यांशस्येत्यर्थः वक्ष्यमाणेति अव

न च घटाद्याकारवृत्तिविषयस्यावच्छिन्नचैतन्यस्य कल्पितत्वेन यन्मूलाज्ञानविषयभूतं सत्यमनवच्छि
न्नचैतन्यं तद्विषयत्वाभावात् घटादिवृत्तीनां निवर्तकत्वाभिमताज्ञानसमानविषयत्वलक्षणं तत्प्रयोज
कमेव नास्तीति वाच्यं तत्रावच्छेदकांशस्य कल्पितत्वेप्यवच्छेद्यांशस्याकल्पितमूलाज्ञानविषयचैत
न्यरूपत्वात् तस्य कल्पितत्वे तु वक्ष्यमाणरीत्या अवस्थाज्ञानं प्रत्यपि विषयत्वायोगेनावस्थाज्ञानसमूलाज्ञा
नविषयाकल्पितचैतन्यविषयत्वस्य वक्ष्यमाणतया तन्निवर्तकघटादिज्ञानस्यापि तद्विषयत्वावश्यं
भावेन तस्य दोषित्वेपि मूलाऽज्ञाननिवृत्तिप्रसंगस्यापरिहारात्

अवच्छेद्यचैतन्यांशस्य कल्पितत्वपक्षे तस्य जडत्वापत्त्या तदुपहितस्य ज्ञानविषयत्वासंभवाद् अवस्थाऽज्ञानं प्रतिमू
लाज्ञानविषयब्रह्मचैतन्यमेव विषय इति वक्तव्यं निर्विषयकत्वासंभवात् तथा च ब्रह्मचैतन्यविषयकाव
स्थाज्ञाननिवर्तकतया घटादिवृत्तीनामपि मूलाज्ञानविषयब्रह्मचैतन्यविषयकत्वमपरिहार्यं घटादिवृत्ती
नां समब्रह्मविषयकत्वाभावेऽवस्थाज्ञानेन सह समानविषयकत्वाभावात्तासामवस्थाज्ञाननिवर्तकत्वं न स्या
दित्यर्थः तन्निवर्तकेति अवस्थाज्ञाननिवर्तकेत्यर्थः तस्य दोषेपीति अवच्छेद्यांशस्य कल्पितत्वमिति द्विती
यकल्पेपीत्यर्थः तत इति घटादिज्ञानादित्यर्थः परिहारादिति॥

चैतन्यस्य स्वप्रकाशतया तस्य यथा सदा प्रसक्तप्रकाशत्वमावरणकल्पकमस्ति तथा जडस्यापि सदा चैतन्यप्रकाशसंसृष्ट
तया सदा प्रसक्तप्रकाशत्वमावरणकल्पकं तस्यास्तीति सूचयति नित्यचैतन्यप्रकाशसंसर्गेपीति तु शब्दः प्रकाशाव
चनः ननूक्तरीत्यावच्छिन्नचैतन्यनिष्ठमवस्थाज्ञानं जडतदवच्छिन्नचैतन्ययोरुभयोरप्यावारकमिति लभ्यते तथा
च घटादिज्ञानस्य जडमात्रविषयकत्वस्वीकारेण तस्याज्ञानेन सह सर्वांशे समानविषयकत्वाभावात् ज्ञाननिव
र्त्तकत्वं न स्यादित्यत आह साक्षादिति ज्ञानस्याज्ञानसमानविषयकत्वं स्वीकारे प्रयोजकशरीरे प्रविष्टं न तु
सर्वांशेपि समानविषयकत्वं गौरवादिति भावः नचैवमिति ज्ञानाज्ञानयोः सर्वांशे समानविषयकत्वानादरे इत्य
र्थः उक्तरीत्येति अवच्छिन्नचैतन्यस्य स्वरूपेण समतयात्र स्वरूपस्यावस्थाज्ञानविषयत्ववत् मूलाज्ञानविषयत्वम

नित्यचैतन्यप्रकाशसंसर्गेपि जडस्य नास्ति प्रकाशात्तु तस्माद्व्यवहारयोग्यत्वमिति परं परमाज्ञानविषय
त्वाभ्युपगमात् साक्षात्परंपरया वा यज्ज्ञानावरणीयं तद्विषयस्यैव ज्ञानस्य तदज्ञाननिवर्त्तकत्वप्रयोजक
शरीरे निवेशात् नचैवं घटादेरप्युक्तरीत्या मूलाज्ञानविषयत्वमपि स्यादिति घटादिसाक्षात्कारादेव मू
लाज्ञाननिवृत्त्यापत्तिः फलबलात्तदज्ञानकार्यातिरिक्ततद्विषयमविषयस्यैव तन्निवर्त्तकत्वे तन्त्रत्वात् ॥

प्यस्ति तथा चावस्थाज्ञानकृतचैतन्यावरणबलाज्जडस्यापि परंपरयावस्थाज्ञानविषयत्वमित्युक्तरीत्या मूलाज्ञा
नकृतचैतन्यावरणबलात् मूलाज्ञानविषयत्वमपि जडस्य घटादेरपरिहार्यं स्यादित्यर्थः ततः किं तत्राह घटादी
ति यथाऽवस्थाज्ञानं वृत्तिपरंपरयाविषयभूतजडसाक्षात्कारादेवावच्छिन्नचैतन्यनिष्ठावस्थाज्ञानस्य निवृत्तिस्त
था मूलाज्ञानवृत्त्यपि परंपराविषयभूतजडसाक्षात्कारादेव ब्रह्मचैतन्यनिष्ठमूलाज्ञानस्यापि निवृत्त्यापात इत्य
र्थः मूलाज्ञाननिवृत्त्यापातो न चेष्टस्तत्र हेतुमाह फलबलादिमादिना घटादिसाक्षात्कारे सत्यपि मूलाज्ञानानुवृ
त्तिरूपफलबलादित्यर्थः मूलाज्ञानतत्कार्यातिरिक्तो यो मूलाज्ञानविषयस्तन्मात्रं तद्विषयकत्वस्यैव ज्ञा
ने मूलाज्ञाननिवर्त्तकत्वे तन्त्रत्वकल्पनात् घटादिसाक्षात्कारे च तदभावान्न मूलाज्ञाननिवर्त्तकत्वापात इत्यर्थः

ननु घटादिज्ञाने घटाद्यवच्छिन्नचैतन्यविषयकत्वाभावे चैतन्यावारकाज्ञानाभिभावकत्वं न संभवति ज्ञानाज्ञानयोः स
मानविषयकत्वाभावादित्यत आह आवरणाभिभावकत्वं चेति जडस्याप्यज्ञानविषयत्वमनुभवबलात्स्वीकार्य
मित्याह घटादेरपीति अवस्थापदं मूलाज्ञानविच्छेदाय घटमहं न जानामीति अज्ञमात्रविषयकत्वानुभवात्
न जडविषयकत्वमिति भावः न च तदिति जडवस्तुनीत्यर्थः न युक्त इति अज्ञानप्रपत्तं जडेन युक्तं तत्रावरणाभि
वात्तद्भावस्य फलाभावादित्यर्थः घटं न जानामीत्यनुभवस्तु घटतदधिष्ठानचैतन्ययोरभेदाध्यासाच्चैतन्यविषयक
त्वेनाप्युपपद्यत इति भावः ननु जडस्यावरणाभावे कथं तदप्रकाशः संभवति न च तत्प्रकाशकचैतन्यसंसर्गाभा
वादेव प्रकाशो न त्वावरणबलादिति वाच्यं जडस्य स्वप्रकाशचैतन्ये अध्यस्तत्वात्तस्य सदावभासकचैतन्यसंसर्गस
त्वात् ततो जडस्याप्रकाश एव जडावरणफलमित्यत आह तदप्रकाशकस्येति अत्र तच्छब्दद्वयं जडपरं इत्यभिप्रायेणेति तत्रा

आवरणाभिभावकत्वं च घटादिज्ञानस्य घटादिविषयत्वादेवोपपन्नं घटादेरप्यज्ञानविषयत्वात् घटं न
जानामि घटज्ञानेन घटाज्ञानं नष्टमित्यवस्थाज्ञानानां घटादिविषयत्वानुभवात् न चैतन्यावरणाभिभावकत्वाभावा
दज्ञानांगीकारो न युक्तः तदप्रकाशकस्य तदवच्छिन्नचैतन्यस्यावरणादेव तदप्रकाशोपपत्तेरिति वाच्यं उक्तानुभ
वस्याजडस्य साक्षादज्ञानविषयत्वप्रतिक्षेपेऽपि जडावच्छिन्नचैतन्यप्रकाशस्याज्ञानेनावरणे ततो

रणकृत्याभावादज्ञानांगीकारो न युक्त इति वाक्ये न जडे साक्षादज्ञानाश्रयत्वस्य साक्षादज्ञानविषयत्वस्य च प्रतिक्षे
पेपीत्यर्थः ननु तद्वाक्यस्य जडे साक्षादज्ञानविषयत्वप्रतिक्षेपपरत्वे किमिति कल्प्यते साक्षात्त्वमेव परासाधारणा
ज्ञानविषयत्वमात्रप्रतिक्षेपपरत्वसंभवादित्याशंक्य तथात्वे तदिति न तत्प्रकाशकस्य तदवच्छिन्नचैतन्यस्यावरणादेव तदप्र
काशोपपत्तेरिति पूर्ववाक्ये न जडेऽपि परंपरयाज्ञानविषयत्वाभ्युपगमविरोधप्रसंगादित्याशयेनाह जडावच्छिन्ने
त्यादिना यं कार्यं यथा तदप्रकाशोपपत्तेरित्यनेनांशेन जडे अस्ति प्रकाशते प्रियं चेत्येवमात्मकव्यवहारायोग्यत्व
लक्षणमावरणमभ्युपगतं चैतन्यस्यावरणादेवेत्यनेनांशेन जडावरणप्रकारकत्वेन चैतन्यावरणमभ्युप
गतमिति प्रतिपादयति अज्ञानेनेति तत इति चैतन्यावरणादित्यर्थः ॥

सि॰ ले॰ टी॰ ३६

गगनेति यथा घटादिद्रव्याणां गगनभेदकत्वमस्ति तथा गंधादीनां गगनभेदकत्वं नास्ति गंधादिभेदेन गगन
भेदाननुभवादिति भावः गंधादिभेदेन चैतन्यभेदाभावे सिद्धे चंदनचैतन्याभिव्यक्त्या नभिव्यक्ति कृतो पूर्वो
दोषो दुष्परिहार एवेत्याह तेषामिति शुक्तीति यथा शुक्तीदमंशावच्छिन्नचैतन्ये रजतस्याध्यासात् रजतस्य
शुक्तीदमंशचैतन्येनैवावभासनं न त्विदमंशावच्छिन्नचैतन्यापेक्षया पृथग्भूतेन स्वावच्छिन्नचैतन्येनावभा।
सनं तथा द्रव्यावच्छिन्नचैतन्ये कल्पितानां रूपादयोपि द्रव्यावच्छिन्नचैतन्येनैव प्रकाश्या इत्यर्थः ननु चंदनगंधस्या
भिव्यक्तचैतन्यप्रकाशसंसृष्टस्यापि गंधगोचरवृत्त्यभावादपरोक्षत्वाभावइतिशंकामनूद्य निराकरोति न च गं

गगनावच्छेदकत्वस्येव चैतन्यावच्छेदकत्वस्याप्यसंभवात् तेषां स्वाश्रयद्रव्यावच्छिन्नचैतन्येनैव शुक्तीद
मंशावच्छिन्नचैतन्येन शुक्तिरजतवत्प्रकाश्यत्वात् तस्याभिव्यक्तौ गंधस्यापि प्रकाशस्यानभिव्यक्तौ रूपा
देरप्यप्रकाशस्य चापत्तेः न च गंधाकारवृत्त्युपरक्त एव चैतन्ये गंधः प्रकाशत इति नियमः प्रकाश
संसर्गस्यैव प्रकाशमानशब्दार्थत्वेनासत्यामपि तदाकारवृत्तावनावृतप्रकाशसंसर्गेऽप्रकाशमानत्व
कल्पनस्य विरुद्धत्वात् अभिव्यक्तस्य च गंधोपादानचैतन्यस्य गंधाऽसंसर्गोऽप्यसंभवात्

36

धाकारेति नियमानुचेमत्र हेतुमाह प्रकाशसंसर्गस्यैवेति ननु वृत्त्युपहितानावृतप्रकाशसंसर्गस्य प्रका
शमानशब्दार्थत्वं सुखादिगोचरवृत्त्युपहितसाक्षिप्रकाशसंसर्गिणि सुखादौ प्रकाशमानशब्दार्थत्वा
भावप्रसंगादित्यर्थः गंधस्याभिव्यक्तचैतन्यसंसर्ग एव नास्तीत्याशंक्याह अभिव्यक्तस्येति चकारस्यासंभ
वादित्यनेनसंबंधः उपादानपदमधिष्ठानपरं असंभवादिति तथा च जडस्यानावृतत्वपक्षे चंदनचैत
न्याभिव्यक्तिदशायां गंधस्याप्यपरोक्षत्वापत्तिरपरिहार्येति भावः

उ॰ ३६

जडमात्रगोचरस्य तस्याकथमवच्छिन्नचैतन्यावारकाज्ञाननिवृत्तिर्भिन्नविषयत्वादिति शंकायामवस्थाज्ञानमवच्छि-
न्नचैतन्यावरणद्वारा जडमप्यावृणोतीत्यतो जडमात्रगोचरत्वेपि तस्यावस्थाज्ञाननिवृत्तिः संभवतीति प्र-
तिपादितमिदानीं तस्यामेव शंकायां प्रकारान्तरेण समाधानं दर्शयति_ अथवेति अथवावस्थाज्ञानानां तत्तज्ज-
डमेव विषय इति संबंधः घटं न जानामीत्यादिपूर्वोक्तानुभवादेवेति भावः ननु अवस्थाज्ञानानामाश्रयोपि तत्तज्ज-
डमेव स्यात्तथा चापसिद्धान्त इत्यत आह अवच्छिन्नचैतन्याश्रितानामिति ननु जडस्याज्ञानविषयत्वोपगमे ज-
डमज्ञानस्य विषयो न भवतीति सिद्धान्तस्य का गतिरित्यत आह मूलाज्ञानस्यैवेति जडस्याज्ञानाविषयत्वमि-
ष्टं तो मूलाज्ञानमात्रविषय इति भावः अन्यथेति जडस्यानावृतत्व इत्यर्थः चंदनखंडगोचरचाक्षुषवृत्त्या

अथवा मूलाज्ञानस्यैव जडं न विषयः अवस्थाज्ञानानां तदवच्छिन्नचैतन्याश्रितानां तज्जडमेव विषयः
अन्यथा चाक्षुषवृत्त्या चंदनखंडचैतन्याभिव्यक्तौ तत्संसर्गिणो गंधस्याप्यपरोक्षापत्तेः तदनभिव्यक्तौ
चंदनतद्रूपयोरप्यप्रकाशापत्तेः न च चाक्षुषवृत्त्या चंदनतद्रूपावच्छिन्नचैतन्ययोरभिव्यक्तत्वात्तयोः प्र-
काशः गंधाकारवृत्त्यभावेन गंधावच्छिन्नचैतन्यस्यानभिव्यक्तत्वात्तस्याप्रकाश इति वाच्यं न चैतन्यस्य।
द्विगुणीकृत्यभावेनैकद्रव्यगुणानां स्वाश्रये सर्वत्र व्याप्य वर्तमानानां एकत्वा

तदवच्छिन्नचैतन्यमभिव्यक्तं स्यात्तेन वा आद्यदोषमाह तत्संसर्गिण इति चंदननिष्ठगंधस्यापि चंदनस्येवापरोक्ष्या-
पत्तिरभिव्यक्तचैतन्यसंसर्गित्वस्योभयत्राविशेषात् जडस्यावृतत्वपक्षे तु नायं दोषः चाक्षुषवृत्त्या गंधावरणा-
निवृत्तेरित्यर्थः द्वितीयदोषमाह तदनभिव्यक्ताविति अप्रकाशापत्तेरिति चंदनगोचरचाक्षुषवृत्तिकाले चंदन।
तद्रूपप्रकाशाभावोऽनिष्ट इति भावः चंदनखंडघटपटादिद्रव्याणामिवैकद्रव्यवृत्तिगुणानामपि चैतन्यावच्छे-
दकत्वमस्तीत्यभिप्रेत्याशंकते नचेति एकत्रद्रव्ये रूपरसगंधादिभेदेन चैतन्यभेदो नास्ति मानाभावादित्याह
चैतन्यस्येति चैतन्यस्य निरवयवत्वात् द्रव्ये द्रव्यावच्छेदेनैकगुणावच्छेदेनापवृत्तिर्न संभवतीत्यर्थः यद्येक
द्रव्यप्रदेशाभेदेन गंधादयः स्युः तदा तत्र द्रव्ये गंधादिभेदेन चैतन्यभेदशंकापि स्यात् न तु तदस्ति गंधादीनां द्रव्या

सि॰ ले॰
त॰
३२

भ्युपगमे पसिद्धांतापत्तिरूपानुपपत्तिरपि नास्ति जडावरणस्याभ्युपगमस्य मूलाज्ञानविषयत्वात्तथात्वेन जडा
वरकाज्ञाननानात्वाभ्युपगमे तदेकत्वसिद्धांतविरोधरूपानुपपत्तिरपि नास्ति तदेकत्वाभ्युपगमस्यापि मूला
ज्ञानविषयत्वात् जडावरकाज्ञानानां चावस्थारूपत्वादिमादिकमभिप्रेत्य न काचिदनुपपत्तिरिति मुक्तं परमप्र
कृतमाह नवेति घटादिवृत्तीनामपि मूलाज्ञाननिवर्तकत्वापत्तिरिति यत्पूर्ववादिनश्चोद्यमादौ प्रकृतं तत्
न्नान्येव घटादिवृत्तीनां मूलाज्ञानविषयचैतन्यविषयकत्वानभ्युपगमादित्यर्थः नन्वेवमपीति घटादि
वृत्तीनां चैतन्यविषयत्वाभावेप्यहमर्थरूपजीवस्य चिदचित्संवलितरूपतया ग्रहवृत्तेः चैतन्यविषयकत्वा

नन्वेवमपि जीवविषयायाअहमाकारवृत्तेर्मूलाज्ञाननिवर्तकत्वापत्तिस्तस्याः स्वयंप्रकाशमानचि
त्संवलिताः चिदंशमात्रविषयत्वात् सोहमिति प्रतिभिज्ञायामपि स्वयंप्रकाशचैतन्यस्यांतःकर
णावैशिष्ट्येन सह पूर्वापरकालवैशिष्ट्यमात्रविषयत्वेन चैतन्यविषयत्वाभावादिति

37

वश्यंभावादित्यर्थः तस्या इति स्वप्रकाशतया स्वयमेव प्रकाशमानायां चिति संवलितः चित्तादात्म्येनाध्य
स्तो योयमचिदंशः तन्मात्रविषयकत्वादहमाकारवृत्तेर्न तस्याश्चपि चैतन्यविषयकत्वमोपनिषदत्वश्रु
तिविरोधादेवेत्यर्थः ननु योहस्वप्ने श्रीकृष्णमन्वभूवं सोहं जागरे तमस्मि इत्यादि प्रत्यभिज्ञायाश्चैतन्यवि
षयकत्वमावश्यकमन्यथा तस्याचिदात्मनः स्यापितत्वसंघातव्यतिरिक्तत्ववचनासिद्धेरित्यत आह सोहमि
ति प्रत्यभिज्ञायामपि स्वयमेव प्रकाशमाने चैतन्ये ग्रहमित्यंतःकरणतादात्म्यमिवतत्तत्कालाद्विवैशिष्ट्यमपि विष
यीकरोति न तु स्वप्रकाशचैतन्यमात्मापि न्नते चिदात्मनः स्थापितत्वादेः श्रुतिबलादेव सिद्धेः न प्रत्यभिज्ञाया

सिद्धान्तलेशः
सि॰ ले॰
३२

जडस्याच्छन्नत्वपक्षे तन्नोक्तदोषप्रसक्तिरित्याह तस्मादिति जडेऽप्यावरणस्य सिद्धत्वादित्यर्थः ननु जडस्याच्छन्नत्वपक्षे
पि वेदनगोचरत्वात् घटस्येव गन्धादावरणस्यापि निवृत्तिः स्यात् गुणगुणिनोस्तादात्म्यात् तथा च वेदनापरोक्षदशायां
तद्गन्धापरोक्ष्यदोषोऽत्रापि तदवस्थ इति शङ्कां हृदि कृत्वा तेन परिहरति यद्यपीति नान्यप्रमात्रावरकाज्ञानस्यापि निवृत्तिरि
त्येवकारार्थः तस्यैवेति चैत्रस्यैव घटप्रकाशो नान्यस्य मैत्रादेरित्यर्थः तथेति गुणगुणिनोस्तादात्म्येऽपि भेदस्या
पि सत्त्वान्न वेदनगोचरघटस्य गन्धादेरपरोक्ष्यप्रसक्तिरित्यर्थः ननु वेदनसंविदोरभिन्नत्वे गन्धस्य घटत्वस्यापि
वेदनापरोक्ष्यमित्याशङ्क्यानात्मनां तादात्म्यादावेव संविदभेदस्यापरोक्ष्यप्रयोजकत्वदर्शनान्नैवमित्याह अनात्मत्वाच्चे
स्यैवेति नन्वेकत्र वेदनावच्छिन्नचैतन्ये घटवस्याज्ञानस्य चैत्रगतवेदनावरकस्यैकत्वात्तस्य च वेदनगोचरघटस्या

तस्मात्तथा चैत्रस्य घटस्फुरणे तत्प्रमात्रावरकस्यैवाज्ञानस्य निवृत्तिरिति तस्यैव विषयप्रकाशो नान्यस्य न
षयाद्विषयाकारवृत्त्यानन्तरं तदवरकाज्ञानस्यैव निवृत्तेर्न विषयान्तरस्यापरोक्ष्यमनात्मत्वात्तस्यैव सवि
द्भेदापरोक्ष्यमित्युपगमादिति प्रमातृभेदेनैव विषयभेदेनाप्येकत्र चैतन्ये वस्याज्ञानभेदस्यावश्य
मतया वस्याज्ञानानां तत्तज्जडविषयकत्वमिति तत्तदादिवृत्तीनां नानावस्याज्ञाननिवर्तकत्वे काचिदनुप
पत्तिर्नवा मूलाज्ञाननिवर्तकत्वापत्तिः

निवृत्तत्वाच्च वेदनवृत्तिकाले गन्धस्यावरणमयुक्तमित्याशङ्कां निराकरोति इति प्रमातृभेदेनैवेति यथा प्रमातृ
विषये चैत्रमैत्रादिभेदेनाज्ञानमनेकमकल्पि तथा एकत्रापि वेदनावच्छिन्नचैतन्ये गन्धादिविषयभेदेनाप्यज्ञान
मनेकमकल्पि नत्वा वेदनापरोक्ष्यदशायां गन्धापरोक्ष्यादर्शनादेवेत्यत्र हेतुः प्रकृतपरामर्शिनेति पदेन
समर्प्यते तथा च वेदनापरोक्ष्यकाले गन्धादेरावरणसंभवान्नोक्तदोष इति भावः जडविषयकत्वमितीति
जडविषयकत्वादित्यर्थः न काचिदनुपपत्तिरिति तत्तद्वृत्तीनां चैतन्यविषयकत्वाभावेनाज्ञानाज्ञानयोः
समानविषयकत्वरूपं विरोधप्रयोजकं न भवति तासां जडमात्रगोचरत्वादज्ञानस्य च चैतन्यमात्रविषयक
त्वादिति पूर्वोक्तानुपपत्तिर्नास्ति यद्यवस्थाज्ञानस्यापि जडमात्रविषयकत्वाभ्युपगमात् तथा जडस्यावरण

अप्रतिबद्धमिति नियमाद्दृष्टेन श्रुतिबंधकदुरितस्य क्षीणत्वादिति भावः तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस
साधनमिति नारदवचनदर्शनात् तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः तादात्म्यविषयं ज्ञानं तत् ।
इदं मुक्तिसाधनमिति भगवत्पादीयवचनदर्शनाच्च मूलाज्ञानस्य जीवब्रह्माभेदावारकत्वाच्च जीवब्रह्म
णोरैक्यलक्षणतादात्म्यविषयकं यज्ज्ञानमिदमेव मुक्तिसाधनमतो नोक्तातिप्रसंगइति समाधानान्तरं द
र्शयति अन्येत्विति इत्यन्तेन वाक्यजन्याभेदज्ञाननिवर्तकमिति स्थिते तदभेदागोचरात् घटादिज्ञानात्
मूलाज्ञाननिवृत्तिप्रसंगइत्यर्थः नचेति जीवब्रह्माभेदः चैतन्याभेदरूपातिरिक्तइति वक्तुं नशक्यते

अन्येतु तत्त्वमस्यादिवाक्यजन्यं जीवब्रह्माभेदगोचरमेव ज्ञानं मूलाज्ञाननिवर्तकं मूलाज्ञानस्य
तदभेदगोचरत्वादिति नचैतन्यस्वरूपमात्रगोचरात् घटादिज्ञानात् तन्निवृत्तिप्रसंगः नचाभेदस्य
तत्त्वावेदकप्रमाणबोध्यस्य चैतन्यातिरेके द्वैतापत्तेः चैतन्यमात्रमभेदइति तद्गोचरघटादिज्ञा
नमप्यभेदगोचरमिति वाच्यं नह्यभेदज्ञानमिति विषयतो विशेषं ब्रूमः ॥

38

नैतथा सति वेदान्ततात्पर्यगोचरस्याभेदस्य सत्यत्वावश्यंभावेन चैतन्यात्स्यात् द्वितीयत्वहानापत्तेर्वेदान्ततात्प
र्यविषयस्याभेदस्यासत्यत्वे वेदान्तानां तत्त्वावेदकत्वलक्षणस्य प्रामाण्यस्यासिद्धौ तत्त्वमस्यभंगापत्तेरिति
भावः अत्र तत्पदं परमार्थवस्तुपरं नहीति घटादिज्ञाने चैतन्यविषयकेपि जीवब्रह्माभेदो न विषयः म
हावाक्यार्थज्ञाने तु तयोरभेदो विषयइत्येवं घटादिज्ञानापेक्षया महावाक्यजन्यज्ञानस्य विषयतो वि
शेषं न ब्रूमः येनोक्तदोषतादवस्थ्यं स्यादित्यर्थः

घटादिवृत्तीनामपि विषयकत्वाविशेषाद् वेदांतजन्यज्ञानवन्मूलाज्ञाननिवर्तकतापत्तिरिति चोद्ये हेतोरेवास
त्वान्नोक्तातिप्रसंगः इति समाधानमुक्तं मिदानीं तासां चैतन्यविषयत्वाभ्युपगमेपि नोक्तातिप्रसंग इत्या
ह केचिदिति यद्यप्यभ्युपगम्यते इति नचैवमभ्युपगमे चैतन्यस्य चक्षुरादिविषयत्वनिषेधश्रुतीनां बाधः स्या
दिति वाच्यं तासां निरुपाधिकचैतन्यविषयत्वाभ्युपगमेनावच्छिन्नचैतन्यस्य चक्षुरादिवृत्तिविषयत्वे
तद्विरोधाभावादिति भावः अत एव ब्रह्मचैतन्यस्य सर्वप्रमेयत्वे यत्तत्प्रतिपादकं पूर्वोदाहृतं वार्तिक
वचनमपि संगच्छते अज्ञाततज्ञापकत्वं हि प्रामाण्यमज्ञातं च वस्तु चैतन्यमेव तत्स्वेव स्वप्रकाशतया सदाप्र

केचित्तु घटादिवृत्तीनां तदवच्छिन्नचैतन्यविषयत्वमभ्युपगम्य सर्वमानप्रसक्तौ च सर्वमानफला
प्रमात् श्रोतव्येति वचः प्राह वेदांतान्वहन्त्येति वार्तिकोक्तश्रोतव्यवाक्यापूर्ववेदांतनियमविध्य
नुसारेण वेदांतजन्यमेव नियमादृष्टसहितं ब्रह्मज्ञानं [illegible] ब्रह्मज्ञाननिवर्तकमिति घटादि
ज्ञानानां न निवृत्तिप्रसंग इत्याहुः

न प्रकाशप्राज्ञानविषयत्वकल्पनैव चित्सातत्यव भासकचैतन्यस्यावरणोपहितजडानवभासप्रसंगभवेन त
स्य पृथगावरणकल्पनायोगाद् ज्ञानस्य चैतन्याश्रितत्वनियमेन तस्य तमःसद्व्यस्यापादनस्याज्ञानावरणहे
तुत्वानुपपत्तेश्च तथा च प्रत्यक्षादीनामपि प्रामाण्यप्रसिद्ध्ये घटाद्यवच्छिन्नचैतन्यविषयकत्वमेव स्वीकर्तव्यं
न तु जडमात्रविषयकत्वमेवं सर्वेषामेव मानानां फलशालितचैतन्यविषयत्वादमृतत्वसाधनत्वप्रसक्तौ दर्शी
ते सर्वेषां मानानां कारणत्वप्रसक्तौ वेदान्तानामेवावरोधेऽपूर्वया नियमेन हृदया श्रोतव्येति वचनं वेदांतानां
मेव विचारः कर्तव्य इत्यस्मिन्नर्थे प्राह इति वार्तिककार्थः घटादिवृत्तीनां तु चैतन्यविषयकत्वेपि वेदांतजन्य
त्वाभावेन श्रोतव्यविधिसिद्धनियमादृष्टसाहित्याभावान्न मूलाज्ञाननिवर्तकत्वप्रसंग इति भावः

सि॰ ले॰ त॰ ३१६

महिम्नात्वस्तुगत्याऽऽगन्तीरविषयकस्य भ्रमानधिकविषयस्यापि तस्य भ्रमनिवर्तकत्वमिति वक्तव्यं तथा कपाले
न तु घोषणवापः कर्तव्य इति शाब्दबोधस्य स्वविषयकपालांतरव्यावर्तकविशेषविषयत्वाभावेऽपि तादृशशाब्दबोधहेतु
पदार्थोपस्थितिकाले कपालस्य घटोऽत्र संबंधित्वेन उपस्थितिसत्त्वात् तदुपस्थितिमहिम्ना तस्य भ्रमानधिकविषय
स्यापि भ्रमनिवर्तकत्वमिति वक्तव्यं तथा च ज्ञानस्य भ्रमविरोधित्वे सामग्रीविशेषप्रयोज्यत्वं प्रयोजकं न तु भ्रमाधिक
विषयत्वं व्यभिचारात् किंच महावाक्यजन्यज्ञानस्य संसारमूलभ्रमविरोधित्वं श्रुतिस्मृतिविद्वदनुभवैः सिद्धं महा
वाक्यानां च चैतन्यस्वरूपमात्रबोधकत्वं द्वितीयपरिच्छेदे मुक्तिसाधनमहावाक्यजन्यज्ञानं प्रति चैतन्यमात्ररूपवि
षयनियामकश्रुतिदाहरणेनास्माभिः साधितं स्वयं चिंतनीयं धनेषु तत् तथा च शुक्तिरजतादिस्थले भ्रमाधि
कविषयकशुक्तिज्ञानादेर्भ्रमविरोधित्वे भ्रमाधिकविषयत्वस्य दोषाभावादिघटितसामग्रीविशेषाधीन
त्वस्यापि दृष्टत्वेनावैशर्यकवेदांतानुसारेण सर्वोदाहृतव्यभिचारस्थलानुरोधेन च ज्ञानस्य भ्रमविरोधित्वे सामग्री
विशेषाधीनत्वमेवानुगतं प्रयोजकं कल्प्यमित्युक्तं न तु भ्रमाधिकविषयत्वमित्यभिप्रेत्य महावाक्यार्थज्ञानस्य
भ्रमाधिकविषयस्यापि भ्रमनिवर्तकत्वं संभवतीति समाधत्ते तत्त्वमिति तत्त्वंपदयोर्वाच्यार्थभूतौ जीवेश्वरा

39

वेव धर्मि — यतस्य तत्त्वंपदाभ्यां प्रथमं तयोरास्मितिरूपः परामर्शस्तदनंतरं तत्त्वंपदसामानाधिकरण्यबला
त्तज्जीवईश्वरश्चेति न तु ते तयोर्विशेषणविशेष्यभावेनावगतिः तदनंतरं च विशिष्टयोरैक्यं न संभवतीति वि।
रोधप्रतीतिः तदनंतरं च तत्त्वंपदाभ्यां वाच्यार्थरूपविशिष्टांतर्गततयोर्विशेष्यचैतन्यांशयोरभेदयोग्यतया
लक्षणया प्रतीतिस्तत्त्वविशेष्यरूपाभेदगोचरशाब्दबोध इति क्रममभिप्रेत्य आदिपदं वाक्यजन्यज्ञानस्य
स्वविषयचैतन्येन सह यः स्वरूपसंबंधविशेषः सामग्रीविशेषाधीनत्वप्रयुक्तस्तेन संबंधेन चैतन्यगोच
रत्वं घटज्ञानादिव्यावृत्तं तदेव तस्याभेदज्ञानत्वं तद्बलादेव तस्य मूलाज्ञाननिमित्याज्ञानविरोधित्वमि
त्यर्थः ॥

तु॰ ३१६

नन्विदं रजतमिति भ्रमे यावानधिष्ठानांशोऽवभासते तावद्रूपेत्तयाऽधिकस्तु नीलत्वादिविशेषविषयकस्तु तथा दिङ्-
न एव रजतादिभ्रमविरोधित्वं दृष्टं तथा च समनुखेदः स्फुरति इदं रुप्यादिभ्रमे यावदधिष्ठानभूतं चैतन्यं विषयः ताव-
द्रूपेत्तयाऽधिकाभेदविषयकत्वस्य वाक्यजन्यज्ञानेनाभ्युपगमे वाक्योत्थज्ञानस्य भ्रमनिवर्तकत्वमेव न स्यादतो
विषयतो विशेषोऽभ्युपगन्तव्य इति शंक्यते किं तिति भ्रमाधिकविषयाणामेव ज्ञानानां भ्रमनिवर्तकत्वमिति
नियमो नास्ति भ्रमानधिकविषयाणामपि भ्रमनिवर्तकत्वदर्शनेन व्यभिचारात् तथा हि वल्लतोऽघोषाधारभू-
ते गंगातीरे यस्य तटाकतीरत्वभ्रमेण तटाकतीरे घोष इति भ्रमोऽस्ति तं प्रति गंगायां घोष इति वाक्यप्रयोगे सति
तस्माद्वाक्यात्तस्य पुरुषस्य गंगातीरे घोष इति बोधो जायते तेन च बोधेन तस्य गंगातीरे तटाकतीरत्वभ्रमो
निवर्तितेन च तत्र भ्रमविषयगंगातीरे भ्रमापेक्षया वाक्यजन्यबोधे कश्चिद्विशेषो विषयो दृष्टः न च तत्र वाक्य

किं तु तत्पदवाच्यार्थधर्मैकस्वरूपपरामर्शादिरूपकारणाविशेषाधीनेन स्वरूप-
मेव यद्विशेषेण चैतन्यविषयत्वमेव तदभेदज्ञानत्वे

जन्यज्ञानेन तटाकतीरत्वव्यावर्तकस्य गंगातीरत्वरूपविशेषस्य विषयत्वदर्शनाद्विशेषाविषयकत्वमसिद्धमिति
वाच्यं यत्र तीरत्वमात्रप्रकारकतात्पर्येण गंगायां घोष इति प्रयोगः तत्रैव तस्य तात्पर्यग्रहे तत्र गंगातीरत्व
प्रकारकबोधाभावेऽपि भ्रमनिवृत्तिदर्शनेन व्यभिचारस्यैव स्यात् तथा येन केनचित् कपालेन तुषोपवापः क-
र्तव्य इति भ्रमवंतं पुरुषं प्रति कपालत्वमात्रप्रकारकतात्पर्येण प्रयुक्तात् तन्मात्रतात्पर्यवत्तया गृहीतात् पुरोडा-
शकपालेन तुषानुपवपतीति वाक्यात् कपालेन तुषोपवापः कर्तव्य इत्येवं तस्य पुरुषस्य बोधो जायते तेन
च कपालांशे कपालांतरव्यावर्तकविशेषाग्रहणेऽपि पुरोडाशकपालातिरिक्तकपाले तुषोपवापस्य सा-
धनत्वभ्रमनिवृत्तिदर्शनेन तत्रापि व्यभिचारात् तस्मात्तीरे घोष इत्यादिशाब्दबोधे गंगातीरत्वरूपविशे-
षविषयकताऽभावेऽपि तद्धेतुपदार्थोपस्थितिकाले तीरस्य गंगासंबंधित्वेनोपस्थितत्वात्तदुपस्थितिः ।

स्वरूपसंबंधेषु वैलक्षण्यस्य क्वाप्यदृष्टत्वेन तथा कल्पनानुपपत्तेरित्यत आह अभावसादृश्यादीनामिति ननु वृत्तीनां विषयैः
सह विषयविषयीभावः स्वरूपसंबंधः कुतो न भवति किं तु संयोगादिकं नः तथा च तासां तैः सह स्वरूपसंबंध एवास्तु
त्वात् तेषु वैलक्षण्यात्मकविशेषकल्पनानुपपत्तेरित्यत आह संयोगेति वृत्तिसंयोगस्य वृत्तिविषयत्वप्रयोजकत्वे चक्षु-
र्गोलकादेर्घटादिवृत्तिसंयोगित्वेन तद्विषयत्वप्रसंगात् वृत्तितादात्म्यस्य वृत्तिविषयत्वप्रयोजकत्वे वृत्त्यधिष्ठानतया वृ-
त्तितादात्म्यापन्नस्य घटाद्यवच्छिन्नचैतन्यस्य घटादिवृत्तिविषयत्वसंभवेऽपि घटादेर्वृत्तितादात्म्यरहितत्वेन तद्विषयत्वप्रसं-
गाद्वृत्तिपरिणामत्वतः करणस्य घटादेर्वृत्तिविषयत्वप्रसंगाद्वृत्तिपरिणामपरिणामिनोस्तादात्म्यादित्यर्थः ननु तत्तम-
स्यादिवाक्यजन्यज्ञानस्य विषयेण सह यः स्वरूपसंबंधस्तेन सत्यत्वज्ञानं च ज्ञानानां यः स्वरूपात्मकः तत्र सामग्रीविशेषबला-

अभावसादृश्यादीनामधिकरणप्रतियोग्यादिभिः स्वरूपसंबंधयुक्तानामधिकरणेनाधाराधेयभावरूप-
स्वरूपसंबंधविशेषः प्रतियोगिना प्रतियोगित्वयोगिभावरूपस्त्वादिप्रकारेण स्वरूपसंबंधेऽवान्तरविशेषकल्प-
नवद्वृत्तीनां विषयैरपि संयोगतादात्म्ययोरतिप्रसक्तया विषये विषयविषयिभावरूपस्वरूपसंबंधवतीनां
विषयविशेषनिरूपणासंभवे

40

ऽपि विषयस्वरूपात्मके संबंधे विशेषो निरूपयितुं न शक्यत इत्यत आह विषयविशेषनिरूपणासंभवे इति विषये निर्वि-
शेषचैतन्यात्मके विशेषाधानासंभवेऽपि स्वरूपसंबंधान्तर्गततया वृत्तिरूपज्ञानस्वरूपात्मके संबंधे सामग्रीविशेषब-
लाद्विशेषाधानसंभवान्नोक्तदोष इति भावः यद्वा वृत्तीनां विषयैः संयोगतादात्म्ययोरतिप्रसक्त्या विषयविशेषनिरू-
पणासंभवे विषयैर्विषयविषयीभावरूपस्वरूपसंबंधवतीनामिति संबंधः अभावसादृश्यादीनामधिकरणादिवद्वृ-
त्तीनामपि विषयसंयोगतादात्म्ययोरतिप्रसक्तत्वेन ताभ्यां वृत्तिप्रतिविषयविशेषनियमनासंभवे सति परिशेषाद्विष-
यविषयीभावप्रयोजकस्वरूपसंबंधवतीनामित्यर्थः रूपपदं नियामकपरं विषयविषयिभावस्य स्वरूपसंबंधानियम्य-
त्वेन तयोरभेदस्य स्वरूपशब्दार्थस्यायोगात्

महावाक्यजन्यज्ञानस्य घटादिज्ञानापेक्षया चैतन्यांशे विषयतो विशेषाभावेऽपि सामग्रीविशेषादेव घटादिज्ञान
पेक्षयाऽभेदज्ञानत्वरूपवैलक्षण्यं पेक्षितमाह यथाहीति विशिष्टज्ञानस्येति दंडी पुरुष इति ज्ञानस्येत्यर्थः
विशेषणविशेष्ययोः संसर्गाग्रहणाद्यपदार्थः समूहालंबनेनेति दंडः पुरुषः संयोग इति ज्ञानेनेत्यर्थः तद्भिन्नं वि
लक्षणं कृतं कारणकृत इति विशिष्टज्ञानस्य समूहालंबनापेक्षया विशेषणज्ञानादिरूपकारणकृतो विशेष
इति तदर्थः यथापीति यथा एव विरुद्धपुरुषत्ववानिति निश्चयः संशयसमानविषयको यथाहार्यं इति रूपः
तद्व्यावृत्तमित्यर्थः विशेषदर्शनदशायामनाहार्यनिश्चयासंभवादाहार्य इत्युक्तं विषयत इति विशिष्टज्ञानेष्वा।
एवं पुरुषो वेति संशये चेति शेषः नकेवलं तत्त्वमसि वाक्यजन्यज्ञानस्याभेदज्ञानत्वे इयं रीतिः सोऽयं घटः सोऽयं दे
वदत्त इत्यादिवाक्यजन्यज्ञानस्यापि केवलघटग्राहिदेवदत्तग्राहिजन्यज्ञानव्यावृत्ताभेदज्ञानत्वेऽपीयं रीतिरस्त्येव

यथाहि विशेषणविशेष्यतत्संबंधगोचरत्वाविशेषेऽपि विशिष्टज्ञानस्य विशेषणज्ञानादिकारणविशेषा
धीनस्वरूपसंबंधविशेषेण चित्रितगोचरत्वमेव समूहालंबनव्यावृत्तं विशिष्टज्ञानत्वं यथा वा स्था
णुत्वपुरुषत्ववानित्याहार्यव्यावृत्तसंशयत्वं विषयतो विशेषानिरूपणात् तथा घटादावपि सोऽयं घट इ
त्यादिज्ञानस्य स्वरूपसंबंधविशेषेण घटादिविषयत्वमेव केवलघटग्राह्यादिजन्यज्ञानव्यावृत्तं तद। ६९
भेदज्ञानत्वमतिरिक्ताभेदानिरूपणात्

तेनेत्याह तथा घटादावपीति अतिरिक्तेति केवलघटग्राहिदे
वदत्तग्राह्यादिजन्यज्ञानविषयघटस्वरूपापेक्षया सोऽयमित्यादिवाक्यगम्याभेदस्यातिरिक्तत्वे मानाभावान्
न चाविषयतो विशेषाभावात् सोऽयं घट इत्यादावपि तत्त्वमसीत्यत्रैव स्रोपमितिपदस्य वाच्यार्थरूपधर्मिस्वरूप
मपर्यादिरूपकारणविशेषाधीनस्वरूपसंबंधविशेषेण घटादिस्वरूपविषयकत्वमेव घटादिभेदज्ञानत्वं ना
न्यदिति वक्तव्यमिति भावः ननु केवलघटग्राह्यादिजन्यज्ञानस्यापि विषयेण स्वरूपसंबंध एव तथा चकथं स्व
रूपसंबंधकृतमभेदज्ञानत्वादिव्यवस्थानं चहृतिज्ञानानां विषयैः सह विषयविषयिभावप्रयोजकरूप
संबंधानामविशेषेऽपि तेष्वेव विषयतज्ज्ञानस्वरूपात्मकसंबंधेषु सामग्रीविशेषाधीनतत्प्रयुक्तपरस्परवै

नादित्यर्थः । ननु तत्राग्निसंयोगस्य नाशकत्वदर्शने भ्रान्तिरिति मत्वाशंकते नचाग्नीति प्रक्रिययेति अग्निसंयोगानंतं तु
षु क्रियाततस्तेषां विभागः ततस्तेषां पटासमवायिकारणसंयोगनाशः ततः पटनाश इति वैशेषिकप्रक्रिया तन्तुषु वि
भागप्रक्रियैव भ्रान्तिमूलेत्याह दग्धपटेपीति पूर्वसंस्थानसंयुक्तावस्थाव्यतिरेकदृष्टान्तमाह मुद्गरेति यथा मुद्गर
चूर्णीकृतस्य घटस्यावयवेषु विभागो दृश्यते तथा पटदाहानन्तरं दग्धतन्तुविभागादर्शनादित्यर्थः तत्रेति तन्तुष्वि
त्यर्थः वैशेषिकप्रक्रियान्तरमपि भ्रान्तिमूलमेवेत्याह नापीत्यादिना तत्रेति पटदाहस्थल इत्यर्थः अग्निसंयोगस्यैक

ग्निसंयोगे सत्यवयवविभागप्रक्रियया असमवायिकारणसंयोगनाशादेव पटनाशो नाग्निसंयोगादितियोग
दितिवाच्यं दग्धपटेपि पूर्वसंस्थानानुवृत्तिदर्शनेन मुद्गरचूर्णीकृतघटवदवयवविभागादर्शनात्
तत्रावयवविभागादिकल्पनाया अप्रामाणिकत्वात् नापि तन्तूनामपि दाहेन समवायिकारणनाशा
त्पटनाश इति फलकेऽणुतन्त्वादिभिः सह युगपदेव पटस्य दाहदर्शनेन क्रमकल्पनायोगात् येनानाद्य
स्तादवयवनाशस्तत्रावयवेऽग्निसंयोगादेव नाशस्य वाच्यत्वात्

41

स्वोपादानद्रव्यनाशकताया अवश्यकत्वात् पटनाशकत्वमपि तस्यैवेत्याह यत इति यतो द्व्यणुकादधस्ताद्द्व्य
णुकावयवस्य परमाणोर्न नाशः तत्र द्व्यणुके विद्यमानादग्निसंयोगादेव तदुपादानस्य तद्व्यणुकनाशस्य वाच्यत्वा
न्न च तत्रावयवविभागप्रक्रियया परमाणुद्वयसंयोगनाशादेव द्व्यणुकनाश इति वाच्यं अवयवावयविविभाग
प्रक्रियाया निरस्तत्वात् तथा चाग्निसंयोगस्य स्वोपादानपटनाशकत्वदर्शनेन भ्रान्तिरिति भावः

ननु संयोगतादात्म्ययोर्विषयविशेषनियामकत्वाभावेपि वृत्तीनां विषये स्वरूपसंबंधत्वं परिशेषात्सिध्यति स्वरूपसंबंधान्तरि-
क्तस्य संबंधान्तरस्य कल्पनेनोपपत्तेरित्यत आह स्वरूपेति स्वरूपसंबंधस्य वृत्त्यादिस्वरूपतया नः(?) तस्य तत्वात्तस्य एव स्वरूपसं-
बंधे विशेषकल्पनायोग्यत्वात् संबंधान्तरे कल्पयितव्ये तस्मिन् संबंधान्तरे अभेदज्ञानत्वादिनिर्वाहकविशेषकल्पनायां गौरवं वृ-
त्तीनां विषये सहस्वरूपसंबंधत्वमेवेति भावः ॥ ननु तत्त्वमस्यादिवाक्यात् जीवस्य ब्रह्माभेदज्ञानोपगमे तदभेदस्यैव संसर्गवि-
धया भानात् द्वैतानां संसर्गगोचरप्रमितिजनकत्वरूपाविरुद्धार्थत्वाभ्युपगमहानिरित्याशंक्य(?) तज्ज्ञाघनिरवकाशमित्याह एवंचे-
ति महावाक्यजन्यज्ञानगताभेदज्ञानत्वस्यासत्यार्थापपादितत्वेनाभेदसंसर्गभानानपेक्षत्वात् संसर्गमित्यर्थः ॥ हानिरपीति
ब्रह्मादिवृत्तीनां मूलाज्ञाननिवर्तकत्वापत्तिरपि अविरुद्धार्थत्वहानिश्च नास्तीत्यपि द्रष्टव्यार्थः ॥ वेदान्तजन्यज्ञानस्यापि मूलाज्ञा-
त्वस्यैव स्वरूपसंबंधस्यावान्तरविशेषकल्पनेनाभेदज्ञानत्वादिपरस्परवैलक्षण्यनिर्वाहाच्च एवंच ब्रह्मज्ञान-
स्याभेदाद्यविषयकं चित्संसर्गगोचरत्वानभ्युपगमाद्वेदान्तानामविरुद्धार्थत्वहानिरप्यत्याह्वः ॥ ननु वृत्त्यादिज्ञानवद्ब्र-
ह्मज्ञानस्यापि न मूलाज्ञाननिवर्तकत्वं युक्तं निवर्तकत्वेन तदवस्थानासहिष्णुत्वरूपस्य विरोधस्य तत्त्वात् कार्य-
स्य चोपादानेन सहतादृशविरोधाभावादिति चेन्न कार्यकारणयोरन्यत्र तादृशाविरोधादर्शनेप्येकविषयज्ञा-
नाऽज्ञानप्रयुक्तस्य तादृशविरोधस्यावश्यकतया कार्यकारणयोरप्यग्निसंयोगपटयोस्तादृशविरोधदर्शनाच्च नचा-
ननिवर्तकत्वमाशंक्यते नन्विति तादृशेति कार्यस्य लोके उपादानस्थितिविरोधित्वादर्शनादित्यर्थः ॥ ब्रह्मगोचरवृत्तेः प्रत्य-
तः करणस्येव उपादानत्वेन तत्प्रत्यज्ञानस्यानुपादानत्वात् तन्निवर्तकत्वसंभवतीति समाह नेति उपादानत्वमुपपा-
द्याह कार्येति उपादानोपादेययोर्निवर्त्यनिवर्तकभावप्रयोजकविरोधो नास्तीत्युत्सर्गः ॥ स च ब्रह्मज्ञानतदुपादानस्थले
बाध्यते निवर्त्यनिवर्तकभावप्रयोजकतया लोके एकविषयमानविषयज्ञानाज्ञानभावस्य विशेषरूपतया तेन सामान्यरू-
पस्य उपादानोपादेयभावप्रयुक्ताविरोधस्य बाधोपपत्तेरित्यर्थः ॥ लोके उपादानोपादेययोर्निवर्त्यनिवर्तकभावप्र-
योजकविरोधादर्शनमसिद्धमित्याह कार्यकारणयोरपीति अग्निसंयोगरूपकार्यस्य स्वोपादानपटनाशकत्वदर्श-

सि॰ ले॰
ट॰ टी॰
४२

उक्तं व्यभिचारं स्वयं वादी परिहरति निरिंधनेति अतिप्रसंगस्यैवाशिधाया धूमे प्रतियोग्यतिरिक्तकारणजन्यत्वनियमस्याप्र
योजकत्वमित्याशयेन दूषयति सिद्धान्ती अतिप्रसंगापरिज्ञानादिति ननूक्तेनापरिज्ञानमिति चेन्न तत्र वह्नित्वं व्याप्यज्ञानधूम
स्य प्रतियोग्यतिरिक्ताजन्यत्वे तद्दाहादिधूमस्यापि प्रतियोग्यतिरिक्तकारणानपेक्षः स्यादित्यतिप्रसंगो वा भ्रमज्ञानधू
मस्य वह्निघटज्ञानादिधूमस्यापि कारणान्तरानपेक्षः स्यादित्यतिप्रसंगो वा भ्रमज्ञानस्य स्वोत्पत्तिनिहितोपादानप्रयुक्तत्वेन नाशः स्या
दित्यतिप्रसंगो वा विवक्षितः तदेतिन्न ग्राह्यमन्तरेण दूषयति नचेति धूमसमानेऽरणिधूमत्वावच्छिन्नस्यार्थः अनभिधानादि

निरिंधनदहनादिधूमस्यापि कालादृष्टेश्वरेच्छादिकारणान्तरमस्तीति वाच्यं अतिप्रसंगापरिज्ञानात् नच
घटादिधूमस्यापि कारणान्तरनिरपेक्षत्वं स्यादित्यतिप्रसंगो धूमसमानेऽकारणान्तरानपेक्षत्वाऽनभिधा
नात् नच वह्निघटधूमसदृष्टान्तेन भ्रमज्ञानधूमस्य कारणान्तरापेक्षासाधने तद्दृष्टान्तेन भुक्तिरूपतनापेक्षाया
अपि साधनापत्तेः नापि ज्ञानधूमस्य सामान्याद्वह्निज्ञानादिधूमस्यापि कारणान्तरानपेक्षत्वं स्यादित्यतिप्रसंगः
सेंधनानलधूमस्य जलसेकादिदृष्टकारणापेक्षत्वेऽपि निरिंधनानलधूमस्य तदनपेक्षत्ववज्ज्ञाताज्ञानधू
मस्य विशेषगुणान्तरापेक्षत्वेऽपि सुषुप्तिसर्वज्ञानधूमस्य तदनपेक्षत्ववत्प्रलयाज्ञाननिवर्तकज्ञानधूमस्य तद
नपेक्षत्वोपपत्तेः

ति नच सिद्धान्तिना तथानभिधानेऽपि धूमत्वाविशेषात् तत्तदापादनमिति वाच्यं अप्रयोजकत्वादिति भावः द्विती
यमतिप्रसंगेन दूषयति घटधूमसदृष्टान्तेनेति धूमत्वहेतुनेति शेषः स्वतीयमनस्याप्रयोजकत्वेन दूषयति नापिज्ञा
नधूमस्य सामान्यादिति भ्रमज्ञानधूमस्य दृष्टान्तेनेति शेषः सुषुप्तीति सुषुप्तिसर्वज्ञानादिगुणस्य नाशकगुणान्तरापेक्षायां त
स्यापि नाशकालगुणान्तरकल्पनापत्त्या सुषुप्त्युच्छेदप्रसंगः स्यादिति तत्परिहाराय सुषुप्तिसर्वज्ञानादिगुणस्य नाश
कान्तरानपेक्षत्ववदित्यभिमतिभावः प्रलयाज्ञाननिवर्तक इति भ्रमज्ञान इत्यर्थः

42

४२

नन्वस्त्वेतदेव मिति यत्तु ब्रह्मज्ञानमेव मेन : करणद्वारा स्वोपादानाज्ञाननाशकमस्त्वित्यर्थः । तथापीति ब्रह्मज्ञानस्य सवि
लासाज्ञाननाशकत्वेपीत्यर्थः । सकार्याज्ञाननाशकस्याज्ञाननाशकालेऽवशिष्यमाणस्य ब्रह्मज्ञानस्य नाशेन सिद्धे
त्वस्य स्वनाशकत्वायोगात् नाशकान्तरानुवेश इत्यर्थः । अथ च ब्रह्मज्ञानव्यतिरिक्तस्य सकलस्य ब्रह्मज्ञानेन नाशः
पश्चादवशिष्टस्य ब्रह्मज्ञानस्य नाश इति क्रमेणोपपत्ते किं तु ब्रह्मज्ञानेन सविलासाज्ञाननाशकाले सविलासाज्ञानेन स
हैव ब्रह्मज्ञानस्यापि नाश इत्युपपत्ते ब्रह्मज्ञानस्यैव स्वनाशकत्वापि हेतुत्वाभ्युपगमात्तन्न चैकस्यैव स्वस्वपरविलापकत्वं
न दृष्टमिति वाच्यं कतकरजसि दृष्टत्वादिति परिहरति यथेति एवं तिकतकरजः संयोगात् एवं जलेन संपृक्तरजोऽन
न्तैर्जलस्याविशेषमित्यर्थः । एवं ब्रह्मज्ञानाध्यासान्तं वेत्यर्थः । अन्यत्रेति यथा वह्नितप्तलोहपिण्डे प्रक्षिप्तं जलं
नन्वस्त्वेतदेवं तथापि सविलासाज्ञाननाशकमिदं ब्रह्मज्ञानं कथं नश्येन्नाशकान्तराभावादिति चेत् यथा क
तकरजः सलिलेन संपृज्य एवं संपृक्तरजोऽन्तरविशेषजननपत्त्वविश्लेषमोपजनयते तथा स्वन्यध्यासमानं ब्रह्म
ज्ञानं एवं ध्रुवलसर्वप्रपंचं निवर्त्तयत्स्वात्मानमपि निवर्त्तयतीति केचित् अन्येत्वन्यत्रिवृत्तस्वपमपि निर्दह्येद
ग्धलोहपीताम्बुन्यायमुदाहरन्ति अपरेत्वदग्धतृणकूटदहनोदाहरणमाहुः । न च धूमस्य प्रतियोग्यतिरि
क्तजन्यत्वनियमः प्रतियोजकत्वात् निरिंधनदहनादिधूमे व्यभिचाराच्च न च धूमस्य प्रतियोगिमात्रजन्यत्वेऽतिप्र
हगतमग्निनाशयदात्मानमपि नाशयति तथा ब्रह्मज्ञानमपीत्यर्थः । ब्रह्मज्ञानस्य स्वातिरिक्तं सर्वं निवर्त्तयत् तदेव स्वस्यापि
निवर्त्तने दग्धलोहे न पीताम्बु दृष्टान्तमुदाहरन्तीत्यपराद्य । अपरेत्विति यथा भूषकूटस्य तृणसमूहस्य प्रतिष्ठाद दहनस्तृणकू
टं नाशयन्नात्मानमपि नाशयति तथा ब्रह्मज्ञानं तत्कार्यसमुदायसम्बन्धं ब्रह्मप्रत्ययः । तन्नाशयन्नात्मानमपि नाशयतीत्य
र्थः । ननु दग्धतृणदहनादिन्यायेन ब्रह्मज्ञानादेव ब्रह्मज्ञाननाश इत्युपपादनमयुक्तं तदादिनाशे प्रतियोगिव्यतिरि
क्तसमुद्ररूपानादिकारणान्तरदर्शनेन धूमस्य प्रतियोगिव्यतिरिक्तकारणजन्यत्वनियमादिति शंकते नेत्यादि धूमस्येति निरिंध
नेति इंधनानीति शेषः नाशान्तरदहनस्य स्वतनप्रवनाशदर्शनेन निरिंधनदहनधूमस्य तापाद्य वह्नितप्ते काले न ज्ञाना

वाच्यं लक्षणे ज्ञानपदस्य जैवज्ञानपरत्वात् आत्मन्यतिव्याप्तिवारणाय विशेष्यमिति भावः ननु कार्यमात्रे कालादृष्टा
देः कारणत्वमित्यङ्गीकृत्य ब्रह्मज्ञानध्वंसेपि कालादृष्टादेः कारणत्वाभ्युपगमे मूलाज्ञानध्वंसरूपे मोक्षेपि कालादेः
कारणत्वं स्यात् कार्यत्वाविशेषात् न चेष्टापत्तिः नान्यः पन्था इति श्रुतिविरोधादित्यत आह नान्यः पन्था इति श्रुत्याः
श्रुतेः ज्ञानमेकमेव मोक्षसाधनमित्यत्र न तात्पर्यं किं तु मोक्षस्य ज्ञानादृते किमपि साधनं नास्तीत्यत्र तात्पर्यमतो

ज्ञानिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वस्य तदर्थत्वात् नान्यः पन्था इति श्रुतेरपि तत्रैव तात्पर्यात् अतो युक्तरू
वद्दग्धदाह्यदहनादिन्यायेन यः केचित्तद्रूपे ब्रह्मज्ञानेनाज्ञानतन्मूलस्य च निवर्तके अज्ञानस्य प्रका
शनिवर्त्यत्वनियमेन जडरूपवृत्तेर्निवर्त्यत्वायोगात् किं तु नष्टारूढचैतन्यप्रकाशस्तन्निवर्तकः स्वरूपे
णतस्याज्ञानादिसाक्षितया न तन्निवर्तकत्वेपि अखण्डाकारवृत्त्युपाधिरूढस्य तन्निवर्तकत्वोपपत्तेः

43

न श्रुतिविरोध इत्यर्थः अत एव श्रुतिविरोधाद्रूपबाधकाभावादित्यर्थः तद्रूपस्य ब्रह्मज्ञानस्याविद्यादिना
शकत्ववद्देहनाशकत्वमप्यस्तीत्युक्तमिदानीं तद्रूपब्रह्मज्ञानस्याविद्यादिनाशकत्वे स्वनाशकत्वं वा नास्ति
किं तु तद्रूपारूढचैतन्यमेव तद्वृत्तिसहितसर्वनाशकमिति मतमाह केचित्त्विति ननु चैतन्यस्याज्ञानादिसाधक
त्वात्कथं तस्य नाशकत्वमत आह स्वरूपेणेति

चरितार्थमिति प्रसंगमन्यद्यतस्येष्टत्वमाह नाधिकारणांतरनैरपेक्ष्यादिति ब्रह्मज्ञानध्वंसस्येति शेषः ननूदाह न निरिंधनदहन
ध्वंसादौ जलसेकादिविशेषकारणेनाव्यभिचारदर्शनेपि साधारणकारणेनाव्यभिचारादर्शने ब्रह्मज्ञानध्वंसस्यापिसा
धारणकारणापेक्षा दुर्वारेत्यत आह निरिंधनदहनध्वंसन्यायेनेति ननु प्रथमक्षणे ब्रह्मज्ञानस्य जन्म द्वितीयक्षणे सविला
साज्ञाननिवृत्तिः तृतीयक्षणे ब्रह्मज्ञानस्य निवृत्तिरिति क्रमस्तत्र ब्रह्मज्ञानस्य नाशात् एवं तृतीयक्षणे कालादृष्टादीनामसत्वात् येन तेषां
ब्रह्मज्ञाननाशहेतुत्वाभ्युपगमे विरोधाभाव इत्यत आह सत्वप्रपंचेति स्वमतेनाह चिदेवेति परमतेनाह इत्यानतरेति प.
ब्रह्मसमतेपीश्वरस्य कालत्वमभिप्रेत्याह इत्यानतरेति स्वमतेनैवादृष्टस्य द्विप्रकारत्वमाह ईश्वरेति प्रसादग्रहणमुपलक्षणं
पुण्यमीश्वरप्रसादरूपं पापमीश्वरक्रोधरूपमभिमतं द्रष्टव्यं अतः करोतीति आत्मनः स्वमते निर्गुणत्वादिति भावः अन्यथा चेति
नाधिकारणांतरनैरपेक्ष्येणान्यत्रानन्तरक्षणएवनाशस्यापादितमिति प्रसंगः इष्टापत्तेः तदुक्तमनन्तरक्षणएवब्रह्मसाध्यत्वं
निर्विकल्पप्रपंचदाहेन नष्टेन रागेनस्यान्तस्यापि तद्देहदाहाभ्युपगमात् निरिंधनदहनध्वंसन्याय येन ब्रह्मज्ञानध्वंसस्या
पि कालादृष्टेश्वरेच्छादिकारणान्तरजन्यत्वेप्यविरोधाच्च सर्वप्रपंचनिवृत्तौ तत्रैकदेशस्य ब्रह्मज्ञानस्यापि निवृत्तिरि
त्यनभ्युपगमेन क्षणपक्षे दोष एवं तत्र चिदेवविद्यासंबंधरूपस्य इत्यानतररूपस्य वा कालस्येश्वरप्रसादरूपस्यादृष्टस्य करण
गुणविशेषरूपस्य वादृष्टस्यान्यथा च सत्वात् न च तत्र ज्ञानातिरिक्तकारणापेक्षणे ब्रह्मज्ञानस्यापि मिथ्यात्वप्रसंगः ज्ञाने
ईश्वरादिरागादीनामपीत्यर्थः न च तत्रैवेति ब्रह्मज्ञानध्वंसस्यार्थः ज्ञानैकनिवर्त्यत्वे हि ज्ञानातिरिक्तानिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वरूपं
यथाशक्तेन भवति ज्ञानसाध्यायामज्ञाननिवृत्तौ ज्ञानातिरिक्तस्य प्रतियोगिनोपि हेतुत्वात् किं तन्मदेवनदित्याह ज्ञानाद्वैदि
नेति ज्ञानाद्वैतिनामस्माकमज्ञानादिनिवृत्तेरज्ञानेत्यर्थः प्रपंचसत्यत्वमतेपि द्वैतादेर्ज्ञाननिवर्त्यत्वमस्ति द्वैतनाशस्यामीत्यादि ज्ञा
न एवैकमुद्गरपातादिनातन्नाशदर्शनादिति न द्वारणपक्षेपस्यत्वे द्वैतादिनाशस्य ज्ञानएवैकत्वेनियमाभावेन ज्ञानाद्वैतिनाम
ग्रीनिवर्त्यज्ञातीये घटादौ न द्वैतिनामस्माकं ज्ञाननिवर्त्यत्वस्याभावात् न च परमते नाशमात्रस्येश्वरज्ञानाद्वैतिनामस्मदीसाध्य
त्वान्नदीपज्ञानमात्रव्यापकार्पमाज्ञे ज्ञानाद्वैतिनामस्माकं ज्ञाननिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वमस्तीति तन्मिथ्यात्वलेवचनमिति

अस्य मतस्य जीवन्मुक्तिशास्त्रानुगृहीतत्वं दर्शयति एवं चेत्यादिना अज्ञानातिरिक्तस्य जगतस्याज्ञानेन सह साक्षाद्वि-
रोधाभावे सतीत्यर्थः ननु तत्त्वसाक्षात्कारेणाज्ञाननाशे तस्योपादानाभावात् देहादेरवस्थानासंभवे सति कथं वि-
द्योदयेऽपि देहादिप्रतिभास इत्यत आह प्रारब्धेति तत्त्वसाक्षात्कारोदये समस्ताज्ञानस्य निःशेषनिवृत्तिप्रसक्तौ प्रारब्धक-
र्मकृतप्रतिबंधवशादज्ञानलेशस्य निवृत्तिर्न संभवतीति तल्लेशानुवृत्तौ च तत्त्वज्ञानानन्तरमपि प्रारब्धकर्मणः तत्-
कार्यस्य देहादिप्रतिभासस्यापि अनुवृत्तिर्युज्यते देहाद्युपादानभूतस्याविद्यालेशस्यानुवृत्तेरित्यर्थः एवं मते जी-

एवं च तत्त्वसाक्षात्कारोदयेऽपि जीवन्मुक्तस्य देहादिप्रतिभास उपपद्यते प्रारब्धकर्मणा प्रतिबंधेन तत्त्वसाक्षा-
त्कारोदयेऽपि प्रारब्धकर्मतत्कार्यदेहादिप्रतिभासानुवृत्त्युपादानाविद्यालेशानिवृत्त्युपपत्तेः अज्ञानव-
त्प्रपंचस्यापि साक्षाद्ब्रह्मसाक्षात्कारनिवर्त्यत्वे नाप्यनुपपद्यते इति विरोधिनि ब्रह्मसाक्षात्कारे सति प्रार-
ब्धकर्मणः स्वयमवस्थानासंभवेनाविद्यालेशनिवृत्तिप्रतिबंधकत्वायोगादित्याहुः इति श्रीमत्सिद्धा-
न्तलेशसंग्रहे तृतीयः परिच्छेदः

वन्मुक्तिसिद्धिमाह अज्ञानवदिति नाप्यमिति जीवन्मुक्तस्य देहादिप्रतिभास इत्यर्थः विरोधिनीति अज्ञानस्ये-
व प्रारब्धकर्मणोऽपि साक्षाद्विरोधिनीत्यर्थः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसर-
स्वतीदिव्यश्रीचरणारविंदसंलग्नरजोभक्तस्य अच्युतकृष्णानंदतीर्थस्य कृतौ श्रीसिद्धांतलेशसंग्रहव्याख्या-
यां श्रीकृष्णालंकाराख्यायां तृतीयः परिच्छेदः समाप्तः संवत्

45

नचेदृष्टान्ते शाकेन दर्शयति स्फाटिकेति एवमुत्पन्ना सूर्यदीप्तिः स्वरूपेण स्फाटिके प्रकाशिकापि सूर्यकान्तमणिमुपा
रूढा स्फटिकादिकं दहतीति प्रत्यक्षसिद्धं तत्तु न्यायेन चैतन्यं योजयति चैतन्यं स्वरूपेणाज्ञानादिप्रकाशकमपि हन्ति विशेषस
हकृतवृत्त्यज्ञानादेर्नाशकमिति निष्प्रत्यूहमापादेव न च साधकस्य कष्टव्यवसानकं तत्त्वमित्यसंभावनया प्रमाणसिद्धमर्थमुपेक्षेतेति
शाकतात्पर्यं ननु मणिमूढा सूर्यदीप्तिः मणिव्यतिरिक्तमेव स्फटिकादिकं दहति न तु मणिमपि तथा च वृत्त्यारूढं चैतन्यं
वृत्तिव्यतिरिक्तमेवाज्ञानादिकं नाशयेन्न तु वृत्तिमपि तथा च ब्रह्मज्ञानेक कथं न स्वयं न नाशकं तत्राभावादिति शंकायाः
समाधानं कैमुत्यलक्षणन्यायेनाह एवं चेति चैतन्यस्य वृत्त्यारूढस्य नाशकत्वे प्रकाश्यप्रकाशयोरेव लोके निवर्त्यनिवर्त्तकभा
स्फाटिकेभासिकापि सा सूर्यदीप्तिः स्फटिकं दहेत् सूर्यकान्तमुपादह्यतेन्यायेन योजयेद्वित्यमियुक्तोक्तेः एवं च
तथा किंचित्काष्ठमुपारूढस्याग्नेस्तृणादिकं दहन्नपि दहत्येव न दीपकाष्ठं तथा च स्वमपि हन्ति प्रपञ्चकल्पितान्निविलेप
पञ्चमुपलक्षणमिति चैतन्यप्रकाशस्य निवर्तनेपि प्रगल्भनादिति न तत्राभावकांचिदनुपपत्तिरित्याह अन्ये त
ब्रह्मज्ञानमज्ञानस्येव निवर्तकं ज्ञानाज्ञानयोरेव साक्षाद्विरोधात् प्रपञ्चस्य तूपादाननाशद्वारा इति प्रपञ्चा
न्तर्गतस्य ब्रह्मज्ञानस्यापि तत एव नाशः न च प्रपञ्चस्याज्ञाननिवर्त्यत्वे मिथ्यात्वानुपपत्तिः प्रपञ्चनिवृत्तेः साक्षा
दाज्ञानेजन्यताभावेपि ज्ञानजन्याज्ञाननाशजन्यत्वात् साक्षात् परम्परया वा ज्ञानैकनिवर्त्यत्वे मिथ्यात्वमित्ययो
वदर्शनात् प्रकाशस्यापि सहकारिविशेषवशेषानाशकत्वाविरोधादिति युक्तिरूपेण सिद्धमित्यर्थः उन्मूलयतीति
मूलभूताज्ञानेन सह नाशयतीत्यर्थः प्रगल्भत इति समर्थो भवतीत्यर्थः तन्नाश इति चरमवृत्तिनाश इत्यर्थः अज्ञा
ननाश एव ब्रह्मज्ञाननाशहेतुरिति मतं दर्शयति अन्ये त्विति अज्ञानस्येवेति उक्तप्रपञ्चपादिकार्याज्ञानमज्ञानस्येव
निवर्तकमिति साक्षादिति विरोधप्रयोजकस्य समानविषयत्वादेर्ज्ञान एव संभवादित्यर्थः तत एवेति उपादान
नाशादेवेत्यर्थः साक्षात्परंपरया वेति मूलाज्ञानमात्रस्य ज्ञानैकनिवर्त्यतया मिथ्यात्वसिद्धो मूलाज्ञानातिरिक्त